# संस्कृताध्ययनविधिः ।

COURSE CODE: B21SN01DC



**BACHELOR OF ARTS**
**SANSKRIT LANGUAGE AND LITERATURE**

SELF LEARNING MATERIAL

SREENARAYANAGURU OPEN UNIVERSITY


SREENARAYANAGURU OPEN UNIVERSITY

The State University for Education, Training and Research in Blended Format, Kerala

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

* To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

# संस्कृताध्ययनविधिः।

Course Code: B21SN01DC

Semester -I

## Bachelor of Arts
## Sanskrit Language and Literature
## Self Learning Material

SREENARAYANAGURU
OPEN UNIVERSITY


**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

# DOCUMENTATION

## Academic Committee

Dr. C.T. Francis
Dr . Jeena George
Dr. Geetha H.
Dr. J.P. Prajith
Dr. K. Retheesh
Dr. M. Harinaryanan Mankulathillath
Dr. P.K. Somarajan
Dr. Smitha Sabu
Dr. Susanth S.
Major K.S. Narayanan
Uma A.K.

## Development of the content

Dr. G. Sahadevan, Unnikrishnan Nair S.

## Review

Content : Dr. V. Sisupala Panicker
Format : Dr. I.G. Shibi
Linguistics : Dr. G. Sahadevan

## Edit

Dr. V. Sisupala Panicker

## Scrutiny

Dr. Vincent B. Netto, Dr. Vijayarajan K.U.,
Dr. Jothilekshmi M., Dr. Sreeja J.

## Co-ordination

Dr. I.G. Shibi and Team SLM

## Design Control

Azeem Babu T.A.

## Production

November 2022

## Copyright

© Sreenarayanaguru Open University 2022

SREENARAYANAGURU
OPEN UNIVERSITY

All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar SGOU, Kollam.

# MESSAGE FROM VICE CHANCELLOR

Dear

I greet all of you with deep delight and great excitement. I welcome you to the Sreenarayanaguru Open University.

Sreenarayanaguru Open University was established in September 2020 as a state initiative for fostering higher education in open and distance mode. We shaped our dreams through a pathway defined by a dictum 'access and quality define equity'. It provides all reasons to us for the celebration of quality in the process of education. I am overwhelmed to let you know that we have resolved not to become ourselves a reason or cause a reason for the dissemination of inferior education. It sets the pace as well as the destination. The name of the University centres around the aura of Sreenarayanaguru, the great renaissance thinker of modern India. His name is a reminder for us to ensure quality in the delivery of all academic endeavours.

Sreenarayanaguru Open University rests on the practical framework of the popularly known "blended format". Learner on distance mode obviously has limitations in getting exposed to the full potential of classroom learning experience. Our pedagogical basket has three entities viz Self Learning Material, Classroom Counselling and Virtual modes. This combination is expected to provide high voltage in learning as well as teaching experiences. Care has been taken to ensure quality endeavours across all the entities.

The university is committed to provide you stimulating learning experience. The UG programme in Sanskrit Language and Literature is considered to be special due to its emphasis on the components of grammar and comprehension, although the discussions on literature are do find adequate share in the curriculum. Being a discipline with high potential of employability, the Sanskrit education requires a realistic convergence of both grammar and literature. The present programme runs on this presumption and the SLM is expected to reflect it. We assure you that the university student support services will closely stay with you for the redressal of your grievances during your studentship.

Feel free to write to us about anything that you feel relevant regarding the academic programme.

Wish you the best.

Regards,
Dr. P.M. Mubarak Pasha

21.11.2022

# C O N T E N T S

## Table of Contents


Block-1 सुबन्तपरिचयः। 1

Unit-1 अजन्तपुल्लिङ्गशब्दाः- बाल, हरि, गुरु, पितृ, गोः। 2

Unit – 2 अजन्तस्त्रीलिङ्गशब्दाः- लता, मति, नदी, धेनु, मातृ। 9

Unit – 3 अजन्तनपुंसकलिङ्गशब्दाः - फल, वारि, दधि, मधु, दातृ। 15

Unit- 4 सर्वनामशब्दाः-अस्मद्, युष्मद्, तत्, एतत्, इदम्, यत्, किम्। 22

Block-2 तिङन्तपरिचयः। 34

Unit -1 भू धातोः (परस्मैपदी) दशलकारेषु। 35

Unit – 2 वदि (वन्द्) धातुः (आत्मनेपदी) - दशलकारेषु। 42

Unit - 3 कृञ् धातुः (उभयपदी) परस्मैपदे-दशलकारेषु। 47

Unit – 4 कृञ् धातुः (उभयपदी) आत्मनेपदे-दशलकारेषु। 52

Block-3 रघुवंशमहाकाव्यम्(महाकविः कालिदासः) द्वितीयसर्गः१-४०श्लोकाः। 60

Unit – 1 १-१० श्लोकाः। 61

Unit – 2 ११-२० श्लोकाः। 73

Unit – 3 २१-३० श्लोकाः। 83

Unit – 4 ३१-४० श्लोकाः। 94

Block-4 रघुवंशमहाकाव्यम्(महाकविः कालिदासः) द्वितीयसर्गः४१-७५ श्लोकाः। 104

Unit – 1 ४१-५० श्लोकाः। 105

Unit – 2 ५१-५८ श्लोकाः। 117

Unit – 3 ५९-६७ श्लोकाः। 126

Unit – 4 ६८-७५ श्लोकाः। 136

Block-5 गद्यपरिचयः बालरामायणम्। (पि.एस्.अनन्तनारायणशास्त्री) 146

Unit – 1 बालकाण्डम्-(खण्डिका १-५) 147

Unit - 2 खण्डिका ६-१० 159

Unit - 3 खण्डिका ११-१५ 166

| | |
|---|---|
| Unit – 4 खण्डिका १६- शिष्टभागः १८ | 176 |
| Block-6 अमरकोशः व्याकरणविशेषः च। | 183 |
| Unit -1 अमरसिंहविरचितः अमरकोशः-द्वितीयकाण्डम्-वनौषधिवर्गः। | 184 |
| Unit - 2 तृतीय -चतुर्थ - पञ्चमखण्डेषु पाठ्यांशगतानां सुबन्तपदानां अन्तलिङ्गविभक्तिवचनानि। | 195 |
| Unit - 3 तृतीय - चतुर्थ - पञ्चमखण्डेषु पाठ्यांशगतानां क्रियापदानां धातुपदलकारपुरुषवचनानि। | 200 |
| Unit - 4 तृतीय- चतुर्थ - पञ्चमखण्डेषु पाठ्यांशगताः व्याकरणविशेषाः। | 209 |
| Model Question Paper Set-01 | 214 |
| Model Question Paper Set-02 | 217 |

BLOCK -1

# सुबन्तपरिचयः ।

# Unit-1

## अजन्तपुल्लिङ्गशब्दाः- बाल, हरि, गुरु, पितृ, गौः।

### उद्देश्यानि (Learning Outcomes)

- संस्कृताध्ययनस्य प्रारम्भाय अवश्यमध्येतव्यानां सुबन्तानां तिङन्तानाञ्च परिचयप्रदानम्।
- छात्राणां पदसम्पदः प्रवृद्धिः।
- सरलया रीत्या लोकप्रसिद्धस्य पौराणिकस्य च अस्य संस्कृतस्य महत्त्वमधिकृत्य छात्राणाम् परिचयः भवति।
- अनायासेन आशयविनिमयः आत्मविश्वासाय भविष्यति। अतः अयं पाठ्यक्रमः छात्राणाम् आत्मप्रत्ययं प्रवर्धयितुम् अपि उद्दिश्शति।
- अजन्तपुल्लिङ्ग-शब्दानां ज्ञानेन पदसंपदः प्रवृद्धिद्वारा आशयविनिमये सौकर्यप्रदानम्।

### प्रागव्यपेक्षाः (Prerequisites)

अयि सुहृदः,

श्रीनारायणगुरुविशालविश्वविद्यालयस्य नाम्नि युष्मभ्यं सुस्वागतम्। संस्कृतविभागस्य सविशेषं स्वागतमर्पयामः। संस्कृतपठनप्रणालीनामकं एकं पत्रमस्ति परीक्षायै। तस्मिन् पत्रे षट् भागाः सन्ति। तेषु प्रथमः भवति शब्दरूपाणि इति विभागः। प्रथमे एकके पाठ्यक्रमे वर्तमानाः अजन्तपुल्लिङ्गशब्दाः।

अस्य भागस्य पठनस्य उद्देश्यानि कानि इति पश्यामः। भाषा आशयविनिमयाय उपयुज्यते। 'भाष व्यक्तायां वाचि'इत्यस्मात् धातोः भाषापदस्य निष्पत्तिः। भाषा संस्कृतिं बोधयति। भाषायाः अविभाज्यघटकं पदं भवति। किं नाम पदम्? शक्तं पदम्। शक्तिरस्यास्तीति शक्तम्। अस्माद् पदादयमर्थो बोध्यव्यः इति ईश्वरसङ्केतः शक्तिः इति तार्किकाः। क्रमानुसारम् अर्थबोधनाय अक्षराणां क्रमीकरणेन पदं जायते। यथा - 'विद्यालयः'इति पदस्य श्रवणे कश्चनार्थावबोधः अस्माकं मनसि जायते। किन्तु तत्र वर्तमानानाम् अक्षराणां क्रमे व्यतियानमायाति चेद् अर्थबोधः न। 'लवियद्यां' अथवा 'विलद्यायः' वा भवतु। अर्थव्यक्तता न। अतः अर्थव्यक्त्यनुकूलः अक्षरक्रमीकरणेन पदानि निष्पद्यन्ते।

### मुख्यपदानि (Keyterms)

बालः, हरिः, गुरुः, गौः।

## Discussion

'सुप्तिङन्तं पदम्' इति व्याकरणशास्त्रे। सुबन्तं तिङन्तं च पदसंज्ञं स्यात्। सुप् अन्ते यस्य तत् सुबन्तम्। एकविंशतिः सुप्प्रत्ययाः। सप्तविभक्तयः। प्रतिविभक्ति त्रीणि वचनानि। एकवचन-द्विवचन-बहुवचनभेदात्। ते प्रत्ययाः यथाक्रमम्-

Table 1.1.1

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सु | औ | जस् |
| द्वितीया | अम् | औट् | शस् |
| तृतीया | टा | भ्याम् | भिस् |
| चतुर्थी | ङे | भ्याम् | भ्यस् |
| पञ्चमी | ङसि | भ्याम् | भ्यस् |
| षष्ठी | ङस् | ओस् | आम् |
| सप्तमी | ङि | ओस् | सुप्। |

'सु' इत्यारभ्य 'प्' पर्यन्तं वर्तमानाः प्रत्ययाः सुप्प्रत्ययाः। सुप् अन्ते यस्य तत् सुबन्तम् इत्युक्तम्। यथा - बाल सु बालः। बाल औ बालौ। बाल जस् बालाः। विभक्तीनामर्थः अस्माभिः ज्ञेयः।

Table 1.1.2

| विभक्तिः | आङ्गलेयार्थः | उदाहरणानि |
|---|---|---|
| प्रथमा | Name of anything | रामः, लता, वनम्। |
| द्वितीया | to | रामं, लतां, वनम्। |
| तृतीया | by | रामेण, लतया, वनेन। |
| चतुर्थी | for | रामाय, लतायै, वनाय। |
| पञ्चमी | from | रामात्, लतायाः, वनात्। |
| षष्ठी | of | रामस्य, लतायाः, वनस्य। |
| सप्तमी | in | रामे, लतायाम्, वने। |

प्रथमायाः सम्बोधनप्रथमा इति भेदः अस्ति। सम्बोधनासूचकं पदं भवति **'हे'** इति।

पदानां रूपाणि सम्यक् पठन्ति चेत् पदस्वाधीनता वर्धते। पदानि मित्राणि भवन्ति। आपदि मित्राणां साहाय्यम् आवश्यकं खलु। सदसि पदानां साहाय्यं महदेव। अकारान्तपुल्लिङ्गशब्दानां पठनेन संस्कृते वर्तमानेषु पदेषु पञ्चाशत् शतमानं पदं ज्ञातुं शक्यते। सर्वनामशब्दानां पठनेन विंशत्यधिकानि पदानि वशीकर्तुं शक्यन्ते।

युष्मदस्मद्शब्दयोः पठनेन सम्भाषणं सुकरया रीत्या कर्तुं शक्यते। किम् इति पदपठनेन प्रश्नकरणसामर्थ्यं वर्धते। एवम् अनेकानि प्रयोजनानि सन्तीत्यतः बालादिशब्दानां पठनाय सन्नद्धाः भवन्तु।

**Table 1.1.3**

| **अकारान्तः पुंलिङ्गः 'बाल' शब्दः।** | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | बालः | बालौ | बालाः |
| सम्बोधनप्रथमा | हे बाल | हे बालौ | हे बालाः |
| द्वितीया | बालम् | बालौ | बालान् |
| तृतीया | बालेन | बालाभ्याम् | बालैः |
| चतुर्थी | बालाय | बालाभ्याम् | बालेभ्यः |
| पञ्चमी | बालात् | बालाभ्याम् | बालेभ्यः |
| षष्ठी | बालस्य | बालयोः | बालानाम् |
| सप्तमी | बाले | बालयोः | बालेषु। |

**Table 1.1.4**

| **इकारान्तः पुंलिङ्गः 'हरि' शब्दः।** | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | हरिः | हरी | हरयः |
| सम्बोधनप्रथमा | हे हरे | हे हरे | हे हरयः |
| द्वितीया | हरिम् | हरी | हरीन् |
| तृतीया | हरिणा | हरिभ्याम् | हरिभिः |
| चतुर्थी | हरये | हरिभ्याम् | हरिभ्यः |
| पञ्चमी | हरेः | हरिभ्याम् | हरिभ्यः |
| षष्ठी | हरेः | हर्योः | हरीणाम् |
| सप्तमी | हरौ | हर्योः | हरिषु। |

Table 1.1.5

| उकारान्तः पुंलिङ्गः 'गुरु' शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | गुरुः | गुरू | गुरवः |
| सम्बोधनप्रथमा | हे गुरो | हे गुरू | हे गुरवः |
| द्वितीया | गुरुम् | गुरू | गुरून् |
| तृतीया | गुरुणा | गुरुभ्याम् | गुरुभिः |
| चतुर्थी | गुरवे | गुरुभ्याम् | गुरुभ्यः |
| पञ्चमी | गुरोः | गुरुभ्याम् | गुरुभ्यः |
| षष्ठी | गुरोः | गुर्वोः | गुरूणाम् |
| सप्तमी | गुरौ | गुर्वोः | गुरुषु। |

Table 1.1.6

| ऋकारान्तः पुंलिङ्गः 'पितृ' शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | पिता | पितरौ | पितरः |
| सम्बोधनप्रथमा | हे पितः | हे पितरौ | हे पितरः |
| द्वितीया | पितरम् | पितरौ | पितॄन् |
| तृतीया | पित्रा | पितृभ्याम् | पितृभिः |
| चतुर्थी | पित्रे | पितृभ्याम् | पितृभ्यः |
| पञ्चमी | पितुः | पितृभ्याम् | पितृभ्यः |
| षष्ठी | पितुः | पित्रोः | पितॄणाम् |
| सप्तमी | पितरि | पित्रोः | पितृषु |

Table 1.1. 7

| **ओकारान्तः पुंलिङ्गः 'गो' शब्दः।** | | | |
|---|---|---|---|
| **विभक्तिः** | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | गौः | गावौ | गावः |
| सम्बोधनप्रथमा | हे गौः | हे गावौ | हे गावः |
| द्वितीया | गाम् | गावौ | गाः |
| तृतीया | गवा | गोभ्याम् | गोभिः |
| चतुर्थी | गवे | गोभ्याम् | गोभ्यः |
| पञ्चमी | गोः | गोभ्याम् | गोभ्यः |
| षष्ठी | गोः | गवोः | गवाम् |
| सप्तमी | गवि | गवोः | गोषु। |

भोः सुहृदः,

कतिपयानां शब्दानां सर्वाणि रूपाणि अस्माभिः पठितानि। तेषां पठनाय यत्नः कार्यः। पठितमपि कार्यं कदाचित् स्मृतिमण्डलात् निर्गच्छति। यदि प्रथमाविभक्तौ रूपाणि स्मृतौ आयान्ति तर्हि इतराणि रूपाणि स्मर्तुं शक्यन्ते। अतः संक्षिप्तीकरणं पठने साहाय्यमित्यतः अत्र लिख्यते।

**संक्षिप्तीकरणम्।**

| **विभागः** | | **शब्दाः** | **प्रथमायां रूपाणि** | **सदृशः शब्दः** |
|---|---|---|---|---|
| १ | अकारान्तः पुल्लिङ्गः | बाल | बालः- बालौ- बालाः | राम,कृष्ण,वृक्ष |
| २ | इकारान्तः पुल्लिङ्गः | कवि | कविः- कवी- कवयः | हरि, रवि, अग्नि |
| ३ | उकारान्तः पुल्लिङ्गः | गुरु | गुरुः- गुरू- गुरवः | शम्भु, विष्णु, वायु |
| ४ | ऋकारान्तः पुल्लिङ्गः | पितृ | पिता-पितरौ- पितरः | धातृ, नप्तृ, नृ |
| ५ | ओकारान्तः पुल्लिङ्गः | गो | गौः -गावौ—गावः | |

## पुनरावृत्तिः (Recap)

- सुप्तिङन्तं पदम् इति पदसंज्ञं स्यात्।
- सुप् अन्ते यस्य तत् सुबन्तम्।
- सुबन्तस्य त्रीणि लिङ्गानि सन्ति।
- पुल्लिङ्गस्त्रीलिङ्गनपुंसकलिङ्गभेदात्।
- एकविंशतिः सुप्प्रत्ययाः ।
- सप्त विभक्तयः।
- प्रतिविभक्ति त्रीणि वचनानि।
- एकवचन-द्विवचन-बहुवचनभेदात्
- प्रथमायाः सम्बोधनप्रथमा इति भेदः अस्ति।
- सम्बोधनासूचकं पदं भवति **'हे'** इति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. हरिशब्दस्य द्वितीयायां रूपाणि कानि?
२. पितृशब्दस्य तृतीयाविभक्तौ रूपाणि कानि?
३. बालेषु - किं लिङ्गं? का विभक्तिः?
४. गुरुशब्दस्य चतुर्थ्येकवचनरूपं किम्?
५. हरिशब्दस्य सप्तमीविभक्तौ रूपाणि कानि?
६. पित्रा इति शब्दस्य अन्तलिङ्गविभक्तिवचनानि लिखत।
७. गो शब्दस्य लिङ्गं किम्?
८. गवि इति शब्दस्य अन्तलिङ्गविभक्तिवचनानि लिखत।
९. पितृशब्दस्य सप्तमी- एकवचनरूपं किम्?
१०.कति सुबन्तप्रत्ययाः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।
### (Answer the following questions in one or two sentences)

१. गुरुशब्दस्य द्वितीयायां तृतीयायं च रूपाणि कानि?
२. पितृशब्दस्य कानि विभक्तिरूपाणि समानानि भवन्ति?

## निर्दिष्टाभ्यासः (Assignments)

**I. सर्वाणि रूपाणि लिखन्तु।**

१. हरिशब्दः।
२. शम्भुशब्दः।
३. कविशब्दः।

**II. यथेच्छं पञ्च अकारान्तपुंलिङ्गरूपाणि लिखन्तु।**

## उत्तराणि (Answer to objective type Questions)

१. हरिं – हरी - हरीन्।
२. पित्रा - पितृभ्यां - पितृभिः।
३. बालेषु - अकारान्तः पुल्लिङ्गः सप्तमी बहुवचनम्।
४. गुरवे इति।
५. हरौ - हर्योः - हरिषु।
६. ऋकारान्तः पुल्लिङ्गः तृतीया एकवचनम्।
७. पुंलिङ्गः।
८. ओकारान्तः पुल्लिङ्गः गो शब्दः सप्तमी एकवचनम्।
९. पितरि।
१०. एकविंशतिः।

## अधिकवाचनाय ग्रन्थाः (suggested Readings)


१. रामचन्द्र झा, रूपचन्द्रिका, चौखम्बासंस्कृतसीरीस् ओफीस्, वाराणसि.२०११।
२. भट्टोजिदीक्षितः वैयाकरणसिद्धान्तकौमुदी, बालमनोरमामुद्रणं, तृतीयः भागः, चौखम्बा संस्कृतसीरीस् ओफीस्, वाराणसि, १९६९।
३. विद्यासागर् के.एल्.वी शास्त्री, शब्दमञ्जरी , आर्. एस् वाद्यार् आण्ड् सन्स्,कल्पात्ति,पालक्काड्।

# Unit - 2

## अजन्तस्त्रीलिङ्गशब्दाः- लता, मति, नदी, धेनु, मातृ।

### उद्देश्यानि (Learning Outcomes)

- भारतीयसंस्कृतेः महिमातिरेकम् अवगन्तुं, तस्याः वाहिनीरूपायाः अस्याः भाषायाः अध्ययनेन छात्रान् प्रभावयितुम्।
- संस्कृतसाहित्ये वर्तमानां काव्यसुभगतां ज्ञात्वा छात्राः आनन्दम् अनुभवन्तु।
- अनायासेन आशयविनिमयः आत्मविश्वासाय भविष्यति। अतः अयं पाठ्यक्रमः छात्राणाम् आत्मप्रत्ययं प्रवर्धयितुम् अपि उद्दिशति।
- अनेकानि अजन्तस्त्रीलिङ्गरूपाणि परिचाययति।

### प्राग्व्यपेक्षाः (Prerequisites)

हे छात्राः,
अस्माभिः अकारान्तपुल्लिङ्गशब्दः, इकारान्तः पुल्लिङ्गशब्दः, उकारान्तः पुल्लिङ्गशब्दः, ऋकारान्तः पुल्लिङ्गशब्दः, ओकारान्तः पुंलिङ्गशब्दाः च पठिताः। इदानीं काश्चन स्त्रीलिङ्गशब्दान् पठामः।

### मुख्यपदानि (Keyterms)

लता, मतिः , नदी, धेनुः, मातृ।

### Discussion

Table 1.2.1

| आकारान्तः स्त्रीलिङ्गः 'लता' शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | लता | लते | लताः |
| सम्बोधनप्रथमा | हे लते | हे लते | हे लताः |
| द्वितीया | लताम् | लते | लताः |
| तृतीया | लतया | लताभ्याम् | लताभिः |
| चतुर्थी | लतायै | लताभ्याम् | लताभ्यः |
| पञ्चमी | लतायाः | लताभ्याम् | लताभ्यः |
| षष्ठी | लतायाः | लतयोः | लतानाम् |
| सप्तमी | लतायां | लतयोः | लतासु। |

**Table 1.2.2**

| इकारान्तः स्त्रीलिङ्गः 'मति' शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | मतिः | मती | मतयः |
| सम्बोधनप्रथमा | हे मते | हे मती | हे मतयः |
| द्वितीया | मतिम् | मती | मतीः |
| तृतीया | मत्या | मतिभ्याम् | मतिभिः |
| चतुर्थी | मत्यै-मतये | मतिभ्याम् | मतिभ्यः |
| पञ्चमी | मत्याः-मतेः | मतिभ्याम् | मतिभ्यः |
| षष्ठी | मत्याः-मतेः | मत्योः | मतीनाम् |
| सप्तमी | मत्याम्-मतौ | मत्योः | मतिषु। |

**Table 1.2.3**

| ईकारान्तःस्त्रीलिङ्गः 'नदी' शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | नदी | नद्यौ | नद्यः |
| सम्बोधनप्रथमा | हे नदि | हे नद्यौ | हे नद्यः |
| द्वितीया | नदीम् | नद्यौ | नदीः |
| तृतीया | नद्या | नदीभ्याम् | नदीभिः |
| चतुर्थी | नद्यै | नदीभ्याम् | नदीभ्यः |
| पञ्चमी | नद्याः | नदीभ्याम् | नदीभ्यः |
| षष्ठी | नद्याः | नद्योः | नदीनाम् |
| सप्तमी | नद्याम् | नद्योः | नदीषु। |

Table 1.2.4

| उकारान्तः स्त्रीलिङ्गः 'धेनु' शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | धेनुः | धेनू | धेनवः |
| सम्बोधनप्रथमा | हे धेनो | हे धेनू | हे धेनवः |
| द्वितीया | धेनुम् | धेनू | धेनूः |
| तृतीया | धेन्वा | धेनुभ्याम् | धेनुभिः |
| चतुर्थी | धेन्वै / धेनवे | धेनुभ्याम् | धेनुभ्यः |
| पञ्चमी | धेन्वाः/धेनोः | धेनुभ्याम् | धेनुभ्यः |
| षष्ठी | धेन्वाः /धेनोः | धेन्वोः | धेनूनाम् |
| सप्तमी | धेन्वाम् | धेन्वोः | धेनुषु। |

Table 1.2.5

| ऋकारान्तः स्त्रीलिङ्गः 'मातृ' शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | माता | मातरौ | मातरः |
| सम्बोधनप्रथमा | हे मातः | हे मातरौ | हे मातरः |
| द्वितीया | मातरम् | मातरौ | मातॄः |
| तृतीया | मात्रा | मातृभ्याम् | मातृभिः |
| चतुर्थी | मात्रे | मातृभ्याम् | मातृभ्यः |
| पञ्चमी | मातुः | मातृभ्याम् | मातृभ्यः |
| षष्ठी | मातुः | मात्रोः | मातॄणाम् |
| सप्तमी | मातरि | मात्रोः | मातृषु। |

भोः सुहृदः,

कतिपयानां शब्दानां सर्वाणि रूपाणि अस्माभिः पठितानि। तेषां पठनाय यत्नः कार्यः। पठितमपि कार्यं कदाचित् स्मृतिमण्डलात् निर्गच्छति। यदि प्रथमाविभक्तौ रूपाणि स्मृतौ आयान्ति तर्हि इतराणि रूपाणि स्मर्तुं शक्यन्ते। अतः संक्षिप्तीकरणं पठने साहाय्यमित्यतः अत्र लिख्यते।

**संक्षिप्तीकरणम्।**

| विभागः | | शब्दाः | प्रथमायां रूपाणि | सदृशः शब्दः |
|---|---|---|---|---|
| १ | आकारान्तः स्त्रीलिङ्गः | लता | लता- लते- लताः | रमा, दुर्गा, वनिता |
| २ | इकारान्तः स्त्रीलिङ्गः | मति | मतिः- मती- मतयः | स्तुति, नीति, कीर्ति |
| ३ | ऊकारान्तः स्त्रीलिङ्गः | वधू | वधू- वध्वौ- वध्वः | स्वयम्भू |
| ४ | ऋकारान्तः स्त्रीलिङ्गः | मातृ | माता- मातरौ- मातरः | स्वसृ, दुहितृ |

## पुनरावृत्तिः (Recap)

- आकारान्तः स्त्रीलिङ्गः लताशब्दः।
- इकारान्तः स्त्रीलिङ्गः मतिशब्दः।
- ऊकारान्तः स्त्रीलिङ्गः वधूशब्दः।
- ऋकारान्तः स्त्रीलिङ्गः मातृशब्दः।
- सप्त विभक्तयः।
- प्रतिविभक्ति त्रीणि वचनानि।
- एकवचन-द्विवचन-बहुवचनभेदात्।
- प्रथमायाः सम्बोधनप्रथमा इति भेदः अस्ति।
- सम्बोधनासूचकं पदं भवति **'हे'** इति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. लताशब्दस्य सप्तम्यैकवचनरूपं किम्?
२. लता, रमा, माता, दुर्गा - एषु व्यतिरिक्तं पदं किम्?
३. नद्याः - अस्य पदस्य अन्तलिङ्गविभक्तिवचनानि कानि?
४. माता इति शब्दस्य अन्तलिङ्गे के?
५. धेनुः इति शब्दस्य षष्ठीरूपाणि कानि?
६. नदीशब्दस्य सम्बोधनप्रथमारूपाणि कानि?
७. मतिशब्दस्य सप्तमी-एकवचनं किं भवति?
८. मातृशब्दस्य सप्तमी-एकवचनं किम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।
**(Answer the following questions in one or two sentences)**

१. मतिशब्दस्य कुत्र कुत्र रूपद्वयं वर्तते?
२. धेनुशब्दस्य कुत्र कुत्र रूपद्वयं वर्तते?

## विचिन्तनम्।

**कस्यां विभक्तौ अन्तर्भवति इति पट्टिकारूपेण लिखत।**

दशरथः कश्चन भूपतिः। रामलक्ष्मणभरतशत्रुघ्नाः पुत्राः। अयोध्यायां वसन्ति। वसिष्ठस्य महर्षेः उपदेशेन रामं विश्वामित्रेण यागरक्षायै प्रेषितवान्। बालकाः उद्याने क्रीडन्ति। बालिकाः विद्यालयात् गृहम् आगच्छन्ति।

यथा -

| **प्रथमा** | **द्वितीया** | **तृतीया** | **चतुर्थी** | **पञ्चमी** | **षष्ठी** | **सप्तमी** |
|---|---|---|---|---|---|---|
| दशरथः | रामम् | उपदेशेन | यागरक्षायै | विद्यालयात् | वसिष्ठस्य | अयोध्यायाम् |

**इतराणि पदानि तत्तद्भागे लिखन्तु।**
पदानां लिङ्गवचनान्यपि सूचनीयानि।

## निर्दिष्टाभ्यासः (Assignments)

**I. सर्वाणि रूपाणि लिखन्तु।**
१. स्वसृशब्दः।
२. रमाशब्दः।
३. वधूशब्दः।
**II. यथेच्छं पञ्च स्त्रीलिङ्गशब्दरूपाणि लिखन्तु।**

## उत्तराणि(Answer to Objective type questions)

१. लतायाम्।
२. माता।
३. इकारान्तः स्त्रीलिङ्गः षष्ठी एकवचनम्।
४. ऋकारान्तः स्त्रीलिङ्गः मातृ शब्दः।

| | | |
|---|---|---|
| ५. धेन्वाः-धेनोः | धेन्वोः | धेनूनाम्। |
| ६. हे नदि | हे नद्यौ | हे नद्यः। |
| ७. मत्याम्-मतौ। | | |
| ८. मातरि। | | |

## अधिकवाचनाय ग्रन्थाः (Suggested Readings)

१. रामचन्द्र झा, रूपचन्द्रिका, चौखम्बासंस्कृतसीरीस् ओफीस्, वाराणसि.२०११।

२. भट्टोजिदीक्षितः वैयाकरणसिद्धान्तकौमुदी, बालमनोरमामुद्रणं, तृतीयः भागः, चौखम्बा संस्कृतसीरीस् ओफीस्, वाराणसि, १९६९।

३. विद्यासागर् के.एल्.वी शास्त्री, शब्दमञ्जरी , आर्. एस् वाद्यार् आण्ड् सन्स्,कल्पात्ति, पालक्काड्।

# Unit - 3

## अजन्तनपुंसकलिङ्गशब्दाः - फल, वारि, दधि, मधु, दातृ।

### उद्देश्यानि (Learning Outcomes)

- व्याकरणविषये प्राथमिकतत्त्वानां ज्ञानम्।
- भाषाध्ययनाय बोधनाय च प्रावीण्यार्जनम्।
- नूतनपदावलीपरिचयः।
- पदसम्पदः प्रवृद्धिद्वारा आशयविनिमये सौकर्यप्रदानम्।

### प्राग्व्यपेक्षाः (Prerequisites)

प्रियमित्राणि,

अस्माभिः कतिपयाः शब्दाः सविस्तरं पठिताः। तेषां साहाय्येन अकारान्त-इकारान्त-उकारान्त-ऋकारान्ताः अनेके शब्दाः ज्ञातुं शक्यन्ते। पदस्वाधीनशक्तिः संवर्धते। पदानि मित्राणि इव भवन्ति इत्यतः संस्कृतभाषायां प्रवेष्टुम् अधुना सुकरया रीत्या शक्यते।

इदानीं नपुंसकलिङ्गौ फल-वारिशब्दौ तथा नकारान्तः राजन् शब्दः, दकारान्तः मरुत् शब्दः, दधि-मधु-दातृशब्दाः च पठितुमवसरः।

### मुख्यपदानि (Keyterms)

फलम्, वारि, दधि, मधु, दातृ ।

## Discussion

Table 1.3.1

| अकारान्तः नपुंसकलिङ्गः ''फल'' शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | फलम् | फले | फलानि |
| सम्बोधनप्रथमा | हे फल | हे फले | हे फलानि |
| द्वितीया | फलम् | फले | फलानि |
| तृतीया | फलेन | फलाभ्यां | फलैः |
| चतुर्थी | फलाय | फलाभ्यां | फलेभ्यः |
| पञ्चमी | फलात् | फलाभ्यां | फलेभ्यः |
| षष्ठी | फलस्य | फलयोः | फलानाम् |
| सप्तमी | फले | फलयोः | फलेषु। |

Table 1.3.2

| इकारान्तः नपुंसकलिङ्गः ''वारि'' शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | वारि | वारिणी | वारीणि |
| सम्बोधनप्रथमा | हे वारे/वारि | हे वारिणी | हे वारीणि |
| द्वितीया | वारि | वारिणी | वारीणि |
| तृतीया | वारिणा | वारिभ्यां | वारिभिः |
| चतुर्थी | वारिणे | वारिभ्यां | वारिभ्यः |
| पञ्चमी | वारिणः | वारिभ्यां | वारिभ्यः |
| षष्ठी | वारिणः | वारिणोः | वारीणाम् |
| सप्तमी | वारिणि | वारिणोः | वारिषु। |

Table 1.3.3

| इकारान्तः नपुंसकलिङ्गः ‘‘दधि’’ शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | दधि | दधिनी | दधीनि |
| सम्बोधनप्रथमा | हे दधि / दधे | हे दधिनी | हे दधीनि |
| द्वितीया | दधि | दधिनी | दधीनि |
| तृतीया | दध्ना | दधिभ्याम् | दधिभिः |
| चतुर्थी | दध्ने | दधिभ्याम् | दधिभ्यः |
| पञ्चमी | दध्नः | दधिभ्याम् | दधिभ्यः |
| षष्ठी | दध्नः | दध्नोः | दध्नाम् |
| सप्तमी | दध्नि / दधनि | दध्नोः | दधिषु। |

Table 1.3.4

| उकारान्तः नपुंसकलिङ्गः ‘‘मधु’’ शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | मधु | मधुनी | मधूनि |
| सम्बोधनप्रथमा | हे मधु /मधो | हे मधुनी | हे मधूनि |
| द्वितीया | मधु | मधुनी | मधूनि |
| तृतीया | मधुना | मधुभ्याम् | मधुभिः |
| चतुर्थी | मधुने | मधुभ्याम् | मधुभ्यः |
| पञ्चमी | मधुनः | मधुभ्याम् | मधुभ्यः |
| षष्ठी | मधुनः | मधुनोः | मधूनाम् |
| सप्तमी | मधुनि | मधुनोः | मधुषु। |

**Table 1.3.5**

| ऋकारान्तः नपुंसकलिङ्गः ''दातृ'' शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | दातृ | दातृणी | दातॄणि |
| सम्बोधनप्रथमा | हे दातः/ दातृ | हे दातृणी | हे दातॄणि |
| द्वितीया | दातृ | दातृणी | दातॄणि |
| तृतीया | दात्रा / दातृणा | दातृभ्याम् | दातृभिः |
| चतुर्थी | दात्रे / दातृणे | दातृभ्याम् | दातृभ्यः |
| पञ्चमी | दातुः / दातृणः | दातृभ्याम् | दातृभ्यः |
| षष्ठी | दातुः / दातृणः | दात्रोः-दातृणोः | दातॄणाम् |
| सप्तमी | दातरि / दातृणि | दात्रोः-दातृणोः | दातृषु। |

**Table 1.3.6**

| नकारान्तः पुंलिङ्गः ''राजन्'' शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | राजा | राजानौ | राजानः |
| सम्बोधनप्रथमा | हे राजन् | हे राजानौ | हे राजानः |
| द्वितीया | राजानम् | राजानौ | राज्ञः |
| तृतीया | राज्ञा | राजभ्याम् | राजभिः |
| चतुर्थी | राज्ञे | राजभ्याम् | राजभ्यः |
| पञ्चमी | राज्ञः | राजभ्याम् | राजभ्यः |
| षष्ठी | राज्ञः | राज्ञोः | राज्ञाम् |
| सप्तमी | राज्ञि/राजनि | राज्ञोः | राजसु। |

Table 1.3.7

| तकारान्तः पुंलिङ्गः ‘‘मरुत्’’ शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | मरुत् | मरुतौ | मरुतः |
| सम्बोधनप्रथमा | हे मरुत् | हे मरुतौ | हे मरुतः |
| द्वितीया | मरुतम् | मरुतौ | मरुतः |
| तृतीया | मरुता | मरुद्भ्याम् | मरुद्भिः |
| चतुर्थी | मरुते | मरुद्भ्याम् | मरुद्भ्यः |
| पञ्चमी | मरुतः | मरुद्भ्याम् | मरुद्भ्यः |
| षष्ठी | मरुतः | मरुतोः | मरुताम् |
| सप्तमी | मरुति | मरुतोः | मरुत्सु। |

भोः सुहृदः,

कतिपयानां शब्दानां सर्वाणि रूपाणि अस्माभिः पठितानि। तेषां पठनाय यत्नः कार्यः। पठितमपि कार्यं कदाचित् स्मृतिमण्डलात् निर्गच्छति। यदि प्रथमाविभक्तौ रूपाणि स्मृतौ आयान्ति तर्हि इतराणि रूपाणि स्मर्तुं शक्यन्ते। अतः संक्षिप्तीकरणं पठने साहाय्यमित्यतः अत्र लिख्यते।

**संक्षिप्तीकरणम्।**

| **विभागः** | | **शब्दः** | **सदृशः शब्दः** | **प्रथमाविभक्तौ रूपाणि** |
|---|---|---|---|---|
| १ | अकारान्तः नपुंसकलिङ्गः | फल | ज्ञान-वन-नयन | फलं - फले - फलानि। |
| २ | इकारान्तः नपुंसकलिङ्गः | वारि | दधि | वारि- वारिणी - वारीणि। |
| ३ | उकारान्तः नपुंसकलिङ्गः | मधु | | मधु - मधुनी - मधूनि। |
| ४ | ऋकारान्तः नपुंसकलिङ्गः | दातृ | | दातृ - दातृणी - दातॄणि। |

## पुनरावृत्तिः (Recap)

- अकारान्तः नपुंसकलिङ्गः फलशब्दः।
- इकारान्तः नपुंसकलिङ्गः वारिशब्दः।
- उकारान्तः नपुंसकलिङ्गः मधुशब्दः।

- ऋकारान्तः नपुंसकलिङ्गः दातृशब्दः।
- सप्त विभक्तयः।
- प्रतिविभक्ति त्रीणि वचनानि।
- एकवचन-द्विवचन-बहुवचनभेदात्
- प्रथमायाः सम्बोधनप्रथमा इति भेदः अस्ति।
- सम्बोधनासूचकं पदं भवति **'हे'** इति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. फलशब्दस्य पञ्चम्यां रूपाणि कानि ?
२. वारिशब्दस्य तृतीयाबहुवचनरूपं किम्?
३. दातृशब्दस्य कुत्र कुत्र रूपद्वयं वर्तते?
४. हे वारे इत्यस्य विभक्तिः का?
५. दातरि इत्यस्य विभक्तिः का?
६. दातरि इत्यस्य अन्तः कः?
७. वारिणि इति शब्दस्य विभक्तिः का?
८. दधिशब्दस्य द्वितीया द्विवचन-बहुवचनरूपाणि?
९. दधिशब्दस्य कुत्र कुत्र रूपद्वयं वर्तते?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।
## (Answer the following questions in one or two sentences)

१. फलानाम्।
२. वारिणः।

## निर्दिष्टाभ्यासः (Assignments)

**I. सर्वाणि रूपाणि लिखत।**
१. मधुनि।
२. फले।
**II. यथेच्छं पञ्च नपुंसकलिङ्गशब्दरूपाणि लिखन्तु।**

## उत्तराणि (Answer to Objective type questions)

१. फलात् - फलाभ्यां - फलेभ्यः।
२. वारिभिः।
३. तृतीया-चतुर्थी-पञ्चमी-षष्ठी-सप्तम्येकवचने, षष्ठीसप्तम्योः द्विवचने च।
४. सम्बोधनप्रथमा।
५. सप्तमी।
६. ऋकारान्तः।
७. सप्तमी।
८. दधीनि।
९. सम्बोधनप्रथमा- सप्तमीएकवचने।

## अधिकवाचनाय ग्रन्थाः(Suggested Readings)


१. रामचन्द्र झा, रूपचन्द्रिका, चौखम्बासंस्कृतसीरीस्, ओफीस् वाराणसि.२०११।
२. भट्टोजिदीक्षितः वैयाकरणसिद्धान्तकौमुदी, बालमनोरमामुद्रणं, तृतीयः भागः, चौखम्बा संस्कृतसीरीस् ओफीस्, वाराणसि, १९६९।
३. विद्यासागर् के.एल्.वी शास्त्री, शब्दमञ्जरी, आर्. एस् वाद्यार् आण्ड् सन्स्,कल्पात्ति,पालक्काड्।

# Unit- 4

## सर्वनामशब्दाः-अस्मद्, युष्मद्, तत्, एतत्, इदम्, यत्, किम्।

### उद्देश्यानि (Learning Outcomes)

- भारतीयसंस्कृतेः महिमातिरेकम् अवगन्तुं, तस्याः वाहिनीरूपायाः अस्याः भाषायाः अध्ययनेन छात्रान् प्रभावयितुम्।
- संस्कृतसाहित्ये वर्तमानां काव्यसुभगतां ज्ञात्वा छात्राः आनन्दम् अनुभवन्तु।
- सरलया रीत्या लोकप्रसिद्धस्य पौराणिकस्य च अस्य संस्कृतस्य महत्त्वमधिकृत्य छात्राणां परिचयः भवति।
- पदसम्पदः प्रवृद्धिद्वारा आशयविनिमये सौकर्यप्रदानम्।

### प्राग्व्यपेक्षाः (Prerequisites)

सम्प्रति नपुंसकलिङ्गशब्दैः सह युष्मदस्मद्शब्दयोः, तद्-किंशब्दयोः त्रिषु लिङ्गेषु वर्तमानानि रूपाणि पठामः। एतद्-इदम्-यद्शब्दानां त्रिषुलिङ्गेषु च रूपाणि पठामः। श्रद्धया पठन्तु।

### मुख्यपदानि (Keyterms)

अस्मद्, युष्मद्, तद्, एतद्, इदम्,यद्, किम्।

### Discussion

Table 1.4.1

| दकारान्तः त्रिषुलिङ्गेषु समानः ''अस्मद्'' शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | अहम् | आवाम् | वयम् |
| द्वितीया | माम् /मा | आवाम् /नौ | अस्मान्/नः |
| तृतीया | मया | आवाभ्याम् | अस्माभिः |
| चतुर्थी | मह्यम् /मे | आवाभ्याम् /नौ | अस्मभ्यम्/नः |
| पञ्चमी | मत् | आवाभ्याम् | अस्मत् |
| षष्ठी | मम /मे | आवयोः/नौ | अस्माकम्/नः |
| सप्तमी | मयि | आवयोः | अस्मासु। |

Table1.4.2

| दकारान्तः त्रिषुलिङ्गेषु समानः ‘‘युष्मद्’’ शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | त्वम् | युवाम् | यूयम् |
| द्वितीया | त्वाम् /त्वा | युवाम् /वाम् | युष्मान्/वः |
| तृतीया | त्वया | युवाभ्याम् | युष्माभिः |
| चतुर्थी | तुभ्यम् /ते | युवाभ्याम् /वाम् | युष्मभ्यम्/वः |
| पञ्चमी | त्वत् | युवाभ्याम् | युष्मत् |
| षष्ठी | तव (ते) | युवयोः/वाम् | युष्माकम्/वः |
| सप्तमी | त्वयि | युवयोः | युष्मासु। |

Table 1.4.3

| दकारान्तः पुंलिङ्गः ‘‘तद्’’ शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | सः | तौ | ते |
| द्वितीया | तम् | तौ | तान् |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु। |

Table 1.4.4

| दकारान्तः स्त्रीलिङ्गः ‘‘तद्’’ शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | सा | ते | ताः |
| द्वितीया | ताम् | ते | ताः |
| तृतीया | तया | ताभ्याम् | ताभिः |
| चतुर्थी | तस्यै | ताभ्याम् | ताभ्यः |
| पञ्चमी | तस्याः | ताभ्याम् | ताभ्यः |
| षष्ठी | तस्याः | तयोः | तासाम् |
| सप्तमी | तस्याम् | तयोः | तासु। |

Table 1.4.5

| दकारान्तः नपुंसकलिङ्गः ‘‘तद्’’ शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | तत् | ते | तानि |
| द्वितीया | तत् | ते | तानि |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु। |

**Table 1.4.6**

| दकारान्तः पुंलिङ्गः ''एतद्'' शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | एषः | एतौ | एते |
| द्वितीया | एतम्-एनम् | एतौ-एनौ | एतान्-एनान् |
| तृतीया | एतेन | एताभ्याम् | एतैः |
| चतुर्थी | एतस्मै | एताभ्याम् | एतेभ्यः |
| पञ्चमी | एतस्मात् | एताभ्याम् | एतेभ्यः |
| षष्ठी | एतस्य | एतयोः-एनयोः | एतेषाम् |
| सप्तमी | एतस्मिन् | एतयोः-एनयोः | एतेषु। |

**Table 1.4.7**

| दकारान्तः स्त्रीलिङ्गः ''एतद्'' शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | एषा | एते | एताः |
| द्वितीया | एताम्/एनाम् | एते/एने | एताः/एनाः |
| तृतीया | एतया/एनया | एताभ्याम् | एताभिः |
| चतुर्थी | एतस्यै | एताभ्याम् | एताभ्यः |
| पञ्चमी | एतस्याः | एताभ्याम् | एताभ्यः |
| षष्ठी | एतस्याः | एतयोः | एतासाम् |
| सप्तमी | एतस्याम् | एतयोः | एतासु। |

**Table 1.4.8**

| दकारान्तः नपुंसकलिङ्गः ‘‘एतद्’’ शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | एतत् | एते | एतानि |
| द्वितीया | एतत्/एनत् | एते/एने | एतानि/एनानि |
| तृतीया | एतेन/एनेन | एताभ्याम् | एतैः |
| चतुर्थी | एतस्मै | एताभ्याम् | एतेभ्यः |
| पञ्चमी | एतस्मात् | एताभ्याम् | एतेभ्यः |
| षष्ठी | एतस्य | एतयोः/एनयोः | एतेषाम् |
| सप्तमी | एतस्मिन् | एतयोः/एनयोः | एतेषु। |

**Table 1.4.9**

| मकारान्तः पुंलिङ्गः ‘‘इदम्’’ शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | अयम् | इमौ | इमे |
| द्वितीया | इमम् /एनम् | इमौ /एनौ | इमान् /एनान् |
| तृतीया | अनेन | आभ्याम् | एभिः |
| चतुर्थी | अस्मै | आभ्याम् | एभ्यः |
| पञ्चमी | अस्मात् | आभ्याम् | एभ्यः |
| षष्ठी | अस्य | अनयोः/एनयोः | एषाम् |
| सप्तमी | अस्मिन् | अनयोः/ एनयोः | एषु। |

**Table 1.4.10**

| मकारान्तः स्त्रीलिङ्गः ''इदम्'' शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | इयम् | इमे | इमाः |
| द्वितीया | इमाम्/एनाम् | इमे/एने | इमाः/एनाः |
| तृतीया | अनया/एनया | आभ्याम् | आभिः |
| चतुर्थी | अस्यै | आभ्याम् | आभ्यः |
| पञ्चमी | अस्याः | आभ्याम् | आभ्यः |
| षष्ठी | अस्याः | अनयोः/एनयोः | आसाम् |
| सप्तमी | अस्याम् | अनयोः/एनयोः | आसु। |

**Table 1.4.11**

| मकारान्तः नपुंसकलिङ्गः ''इदम्'' शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | इदम् | इमे | इमानि |
| द्वितीया | इदम् -एनत् | इमे-एने | इमानि-एनानि |
| तृतीया | अनेन-एनेन | आभ्याम् | एभिः |
| चतुर्थी | अस्मै | आभ्याम् | एभ्यः |
| पञ्चमी | अस्मात् | आभ्याम् | एभ्यः |
| षष्ठी | अस्य | अनयोः/एनयोः | एषाम् |
| सप्तमी | अस्मिन् | अनयोः/एनयोः | एषु। |

Table 1.4.12

| दकारान्तः पुंलिङ्गः''यद्'' शब्दः। | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | यः | यौ | ये |
| द्वितीया | यम् | यौ | यान् |
| तृतीया | येन | याभ्याम् | यैः |
| चतुर्थी | यस्मै | याभ्याम् | येभ्यः |
| पञ्चमी | यस्मात् | याभ्याम् | येभ्यः |
| षष्ठी | यस्य | ययोः | येषाम् |
| सप्तमी | यस्मिन् | ययोः | येषु। |

Table 1.4.13

| दकारान्तः स्त्रीलिङ्गः ''यद्'' शब्दः। | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | या | ये | याः |
| द्वितीया | याम् | ये | याः |
| तृतीया | यया | याभ्याम् | याभिः |
| चतुर्थी | यस्यै | याभ्याम् | याभ्यः |
| पञ्चमी | यस्याः | याभ्याम् | याभ्यः |
| षष्ठी | यस्याः | ययोः | यासाम् |
| सप्तमी | यस्याम् | ययोः | यासु। |

**Table 1.4.14**

| दकारान्तः नपुंसकलिङ्गः ‘‘यद्’’ शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | यत् | ये | यानि |
| द्वितीया | यत् | ये | यानि |
| तृतीया | येन | याभ्याम् | यैः |
| चतुर्थी | यस्मै | याभ्याम् | येभ्यः |
| पञ्चमी | यस्मात् | याभ्याम् | येभ्यः |
| षष्ठी | यस्य | ययोः | येषाम् |
| सप्तमी | यस्मिन् | ययोः | येषु। |

**Table 1.4.15**

| मकारान्तः पुंलिङ्गः ‘‘किम्’’ शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | कः | कौ | के |
| द्वितीया | कम् | कौ | कान् |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु। |

**Table 1.4.16**

| मकारान्तः स्त्रीलिङ्गः ‘‘किम्’’ शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | का | के | काः |
| द्वितीया | काम् | के | काः |
| तृतीया | कया | काभ्याम् | काभिः |
| चतुर्थी | कस्यै | काभ्याम् | काभ्यः |
| पञ्चमी | कस्याः | काभ्याम् | काभ्यः |
| षष्ठी | कस्याः | कयोः | कासाम् |
| सप्तमी | कस्याम् | कयोः | कासु। |

**Table 1.4.17**

| मकारान्तः नपुंसकलिङ्गः ‘‘किम्’’ शब्दः। | | | |
|---|---|---|---|
| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमा | किम् | के | कानि |
| द्वितीया | किम् | के | कानि |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु। |

भोः सुहृदः,

कतिपयानां शब्दानां सर्वाणि रूपाणि अस्माभिः पठितानि। तेषां पठनाय यत्नः कार्यः। पठितमपि कार्यं कदाचित् स्मृतिमण्डलात् निर्गच्छति। यदि प्रथमाविभक्तौ रूपाणि स्मृतौ आयान्ति तर्हि इतराणि रूपाणि स्मर्तुं शक्यन्ते। अतः संक्षिप्तीकरणं पठने साहाय्यमित्यतः अत्र लिख्यते।

**संक्षिप्तीकरणम्।**

| | विभागः | शब्दः | सदृशःशब्दः | प्रथमाविभक्तौरूपाणि | | |
|---|---|---|---|---|---|---|
| १ | दकारान्तः त्रिषु लिङ्गेषु समानः | अस्मद् | | अहम् | आवां | वयम् |
| २ | दकारान्तः त्रिषु लिङ्गेषु समानः | युष्मद् | | त्वं | युवां | यूयम् |
| ३ | दकारान्तः पुंलिङ्गः | तद् | यद् | सः | तौ | ते |
| ४ | दकारान्तः स्त्रीलिङ्गः | तद् | यद् | सा | ते | ताः |
| ५ | दकारान्तः नपुंसकलिङ्गः | तद् | यद् | तत् | ते | तानि |
| ६ | मकारान्तः पुंलिङ्गः | किम् | | कः | कौ | के |
| ७ | मकारान्तः स्त्रीलिङ्गः | किम् | | का | के | काः |
| ८ | मकारान्तः नपुंसकलिङ्गः | किम् | | किं | के | कानि |
| ९ | दकारान्तः पुंलिङ्गः | एतद् | | एषः | एतौ | एते |
| १० | मकारान्तः पुंलिङ्गः | इदम् | | अयम् | इमौ | इमे |
| ११ | दकारान्तः पुंलिङ्गः | यद् | तद् | यः | यौ | ये |

## पुनरावृत्तिः (Recap)

- दकारान्तः त्रिषुलिङ्गेषु समानः अस्मद् शब्दः।
- दकारान्तः त्रिषुलिङ्गेषु समानः युष्मद् शब्दः।
- दकारान्तः पुंलिङ्गः तद् शब्दः।
- दकारान्तः स्त्रीलिङ्गः तद् शब्दः।
- दकारान्तः नपुंसकलिङ्गः तद् शब्दः।
- मकारान्तः पुंलिङ्गः किम् शब्दः।
- मकारान्तः स्त्रीलिङ्गः किम् शब्दः।
- मकारान्तः नपुंसकलिङ्गः किम् शब्दः।
- दकारान्तः पुंलिङ्गः एतद् शब्दः।
- मकारान्तः पुंलिङ्गः इदम् शब्दः।
- दकारान्तः पुंलिङ्गः यद् शब्दः।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. अस्मद् शब्दस्य कुत्र कुत्र रूपद्वयं वर्तते?
२. युष्मद् शब्दस्य षष्ठ्यां रूपाणि कानि?
३. 'किं'शब्दस्य स्त्रीलिङ्गे चतुर्थ्यां रूपाणि कानि?
४. सः तौ- ते- कस्य शब्दस्य रूपम्? कः लिङ्गः? विभक्तिः का?
५. तद्'शब्दस्य नपुंसकलिङ्गे द्वितीयायां रूपाणि कानि?
६. 'केषु' - अन्तलिङ्गादीन् निर्णयत।
७. .................... उद्याने क्रीडति। (बालशब्दस्य रूपेण)
८. मयि .................... अस्मासु।
९. कया .................... काभिः।
१०.इदम् .................... एनानि।

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

**(Answer the following questions in one or two sentences)**

**I. अन्तलिङ्गविभक्तिवचनानि लिखत।**

१. मम।
२. तस्मिन्।
३. तस्यै।
४. वयम्।
५. यूयम्।
६. सः।

**II. शोधयत।**

१. वयं पाठं पठन्ति।
२. बालाः उद्याने क्रीडति।
३. सीतायै पुस्तकम् ददाति।
४. वने वृक्षाः अस्ति।

## निर्दिष्टाभ्यासः (Assignments)

I.**सर्वाणि रूपाणि लिखत।**
१. अहम्।
२. किम् (पुंलिङ्गे)।
३. तद् (नपुंसकलिङ्गे)।
II**. यथेच्छं पञ्च सर्वनामशब्दरूपाणि लिखन्तु।**

## उत्तराणि (Answer to Objective type questions)

१. द्वितीया-चतुर्थी-षष्ठीविभक्तिषु।
२. तव-ते युवयोः-वां युष्माकं-वः।
३. कस्यै - काभ्यां - काभिः।
४. तच्छब्दस्य रूपम्। अयं पुल्लिङ्गः प्रथमाविभक्तिः।
५. तत् - ते - तानि।
६. मकारान्तः पुल्लिङ्गः सप्तमी बहुवचनम्।
७. बालः उद्याने क्रीडति।
८. मयि - आवयोः - अस्मासु।
९. केन - काभ्यां — कैः।
१०. इदम्-एनत्, इमे-एने, इमानि-एनानि

## अधिकवाचनाय ग्रन्थाः (Suggested Readings)

१. रामचन्द्र झा, रूपचन्द्रिका, चौखम्बासंस्कृतसीरीस् ओफीस, वाराणसि.२०११।
२. भट्टोजिदीक्षितः वैयाकरणसिद्धान्तकौमुदी, बालमनोरमामुद्रणं, तृतीयः भागः, चौखम्बा संस्कृतसीरीस् ओफीस्, वाराणसि, १९६९।
३. विद्यासागर् के.एल्.वी शास्त्री, शब्दमञ्जरी, आर्. एस् वाद्यार् आण्ड् सन्स्,कल्पात्ति,पालक्काड्।

BLOCK -2

# तिङन्तपरिचयः ।

# Unit -1

## भू धातोः (परस्मैपदी) दशलकारेषु।

### उद्देश्यानि (Learning Outcomes)

- भाषाज्ञानस्य पदावलीपरिचयः आवश्यकः।
- क्रियापदं सुष्ठु सुव्यक्तं च प्रयोक्तव्यम्। क्रियापदानां पठनमपि सुकरया रीत्या करणीयम्।
- वर्तमानकालक्रियापठनं प्रथमं कार्यम्।
- पुनः भूतकाल-भविष्यकालयोः पठनम्।
- भूत-वर्तमान-भविष्यकालानां ज्ञानेन भाषणं संस्कृतभाषायां सुकरया रीत्या कर्तुं शक्यते।
- भू धातोः दशलकाराणां सामान्यज्ञानम्।

### प्राग्व्यपेक्षाः (Prerequisites)

पदानि प्रधानतया त्रिधा । नामपदानि, क्रियापदानि, अव्ययानि च ज्ञातव्यानि।
क्रियाणां पठनाय धातूनां पठनं कार्यम्। अस्माकं पाठ्यक्रमे भू-वदि-डुकृञ् धातवः एव सन्ति। तेषां त्रयाणां धातूनां सविशेषताः अस्माभिः ज्ञातव्याः। अतः प्रथमं धातुं परिचयामः।

**किं नाम धातुः ?**

धीयते सर्वम् अस्मिन् इति धातुः। धात्वनुसारणेनैव पदनिष्पत्तिः अर्थकथनं च। सर्वाणि पदानि धातुजानि इति शाकटायनाचार्यः। धात्वनुसारेण क्रियाः।
स्वरूपानुसारं धातवः त्रिधा। परस्मैपदिनः, आत्मनेपदिनः उभयपदिनः चेति। यद्यपि परस्मै सूचकः धातुः परस्मैपदमिति, आत्मने सूचकं आत्मनेपदमिति वक्तुं शक्यते तथापि अयमर्थः सर्वत्र न युज्यते। संक्षेपात् ज्ञातुं शक्यते यत् केचन धातवः परस्मैपदिनः, केचन आत्मनेपदिनः, अन्ये केचन उभयपदिनः (परस्मैपदिनः, आत्मनेपदिनः च) चेति। पुरुषाः पुरुषोचितं वस्त्रधारणं, स्त्रियः स्त्रीजनोचितं वस्त्रधारणं, अन्येभ्यः कतिपयेभ्यः उभयरीत्यापि वर्तमानं वस्त्रं धरन्ति।तद्वत्।

### मुख्यपदानि (Keyterms)

धातुः, लकाराः, लट्, लिट्, लुट्, लृट्, लोट्, लङ्, आशिर्लिङ्, विधिलिङ्, लुङ्, लृङ्।

## Discussion

**धातवः**

| केचन परस्मैपदिनः धातवः | केचन आत्मनेपदिनः धातवः | केचन उभयपदिनः धातवः |
|---|---|---|
| भू, अत्, षिध्, चिती | एध, कमु, अय, वदि | श्रिञ्, भृञ्, डुकृञ्, हृञ् |

**परस्मैपदिनः प्रत्ययाः**

| | | |
|---|---|---|
| तिप् | तस् | झि |
| सिप् | थस् | थ |
| मिप् | वस् | मस्। |

**आत्मनेपदिनःप्रत्ययाः**

| | | |
|---|---|---|
| त | आताम् | झ |
| थास् | आथाम् | ध्वम् |
| इड् | वहि | महिङ्। |

आङ्गलभाषायामिव संस्कृतेऽपि पुरुषाः त्रयः। Iपेर्सन्, IIपेर्सन्, IIIपेर्सन् इति। संस्कृते IIIपेर्सन् अथवा प्रथमपुरुषः आद्यं प्रयुज्यते। पुनः IIपेर्सन् अथवा मध्यमपुरुषः। अन्ते Iपेर्सन् अथवा उत्तमपुरुषः। अस्मच्छब्दयोगे उत्तमपुरुषः, युष्मद्च्छब्दयोगे मध्यमपुरुषः, अस्मद्-युष्मद्भिन्ने प्रथमपुरुषः इति नियमोऽस्ति।

**वचनानि।**

वचनानि त्रिधा - एकवचनद्विवचनबहुवचनभेदात्।

वचनानुसारं वाक्यप्रयोगः। एकवचनं कर्ता चेत् क्रियापि एकवचनम्। द्विचनं कर्ता चेत् द्विवचनं क्रिया भवति। एवं बहुवचनस्यापि कार्यम्।

**कति लकाराः ?**

संस्कृते दश लकाराः सन्ति। वेदे एकादश लकाराः। लेट् इति तस्य नाम। लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ् च उपयुज्यन्ते।

वर्तमानकाले एकः लकारः - लट्।

भूतकाले त्रयः लकाराः - लिट्,लङ्,लुट् च।

लिट्लकारः - अनद्यतनपरोक्षभूते।

लुट्लकारः - अनद्यतनभविष्यत्काले।

लृट्लकारः - सामान्यभविष्यत्काले।

लोट्लकारः - आज्ञा-अनुमति-प्रशंसा-प्रार्थनादिषु।

लङ्लकारः - अनद्यतनभूतकाले।

आशिर्लिङ् - आशीर्वादः।

विधिलिङ् - विधिः।

लुङ् - सामान्यभूतकालः।

लृङ् - भूतकालस्य प्रभावः।

इदानीं **भूधातोः परस्मैपदी लट्लकारः।**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | भवति | भवतः | भवन्ति |
| **मध्यमपुरुषः** | भवसि | भवथः | भवथ |
| **उत्तमपुरुषः** | भवामि | भवावः | भवामः। |

कथं नामपदं क्रियापदं च योजयति इति कार्यं पठतु।

| | | |
|---|---|---|
| रामः भवति | रामौ भवतः | रामाः भवन्ति |
| त्वं भवसि | युवां भवथः | यूयं भवथ |
| अहं भवामि | आवां भवावः | वयं भवामः। |

**भूधातोः परस्मैपदी लिट्। लिट् भूतकाले।** तदपि अनद्यतने परोक्षे। तथा च सूत्रम् - परोक्षे लिट्।

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | बभूव | बभूवतुः | बभूवुः |
| **मध्यमपुरुषः** | बभूविथ | बभूवथुः | बभूव |
| **उत्तमपुरुषः** | बभूव | बभूविव | बभूविम। |

**भूधातोः परस्मैपदी लुट्। लुट्लकारः अनद्यतनभविष्यत्काले ।** अनद्यतने लुट् इति सूत्रम्।

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | भविता | भवितारौ | भवितारः |
| **मध्यमपुरुषः** | भवितासि | भवितास्थः | भवितास्थ |
| **उत्तमपुरुषः** | भवितास्मि | भवितास्वः | भवितास्मः। |

**भूधातोः परस्मैपदी लृट्। लृट्लकारः सामान्यभविष्यत्काले।** लृट् शेषे च इति सूत्रम्।

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | भविष्यति | भविष्यतः | भविष्यन्ति |
| **मध्यमपुरुषः** | भविष्यसि | भविष्यथः | भविष्यथ |
| **उत्तमपुरुषः** | भविष्यामि | भविष्यावः | भविष्यामः। |

**भूधातोः परस्मैपदी लोट्। विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनादिषु अर्थेषु।** लोट् च इति सूत्रम्।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भवतु-भवतात् | भवतां | भवन्तु |
| मध्यमपुरुषः | भव - भवतात् | भवतं | भवत |
| उत्तमपुरुषः | भवानि | भवाव | भवाम। |

**भूधातोः परस्मैपदी लङ्। अनद्यतनभूते लङ्।** अनद्यतने लङ् इति सूत्रम्।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अभवत् | अभवताम् | अभवन् |
| मध्यमपुरुषः | अभवः | अभवतम् | अभवत |
| उत्तमपुरुषः | अभवम् | अभवाव | अभवाम। |

**भूधातोः परस्मैपदी आशिर्लिङ्। आशिर्लिङ् आशिरर्थे।** लिङाशिषि इति सूत्रम्।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भूयात् | भूयास्ताम् | भूयासुः |
| मध्यमपुरुषः | भूयाः | भूयास्तम् | भूयास्त |
| उत्तमपुरुषः | भूयासम् | भूयास्व | भूयास्म। |

**भूधातोः परस्मैपदी विधिलिङ्। विध्यादिष्वर्थेषु ।** विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् इति सूत्रम्।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भवेत् | भवेताम् | भवेयुः |
| मध्यमपुरुषः | भवेः | भवेतम् | भवेत |
| उत्तमपुरुषः | भवेयम् | भवेव | भवेम। |

**भूधातोः परस्मैपदी लुङ्। लुङ् सामान्यभूतकाले।** लुङ् च इति सूत्रम्।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अभूत् | अभूताम् | अभूवन् |
| मध्यमपुरुषः | अभूः | अभूतम् | अभूत |
| उत्तमपुरुषः | अभूवम् | अभूव | अभूम। |

**भूधातोः परस्मैपदी लृङ्। क्रियायाः अनिष्पत्तौ लृङ्।** लिङ्निमित्ते लृङ् क्रियातिपत्तौ इति सूत्रम्।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | अभविष्यत् | अभविष्यताम् | अभविष्यन् |
| **मध्यमपुरुषः** | अभविष्यः | अभविष्यतम् | अभविष्यत |
| **उत्तमपुरुषः** | अभविष्यम् | अभविष्याव | अभविष्याम। |

## पुनरावृत्तिः (Recap)

भो बान्धवाः,

भू धातोः सर्वेषु लकारेषु वर्तमानानि रूपाणि पठितुमवसरः सिद्धः। अत्र प्रयासः वर्तते किम्? यदि प्रथमपुरुषैकवचनं सिद्ध्यति चेत् इतररूपाणि वक्तुं शक्यते वा? तत् साध्यं चेत् इतररूपाणि स्मर्तुम् अनया रीत्या पठनं कार्यम्। कथम्? अवलोकयन्तु।

- लट् भवति।
- लिट् बभूव।
- लुट् भविता।
- लृट् भविष्यति।
- लोट् भवतु-भवतात्
- लङ् अभवत्।
- आशिर्लिङ् भूयात्।
- विधिलिङ् भवेत्।
- लुङ् अभूत्।
- लृङ् अभविष्यत्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. केन क्रियाः प्रयुज्यन्ते।

२. अनद्यतनभविष्यकाले लकारः कः?

३. ……….. पठामः।

४. अनद्यतनभूतकाले प्रयुज्यमानः लकारःकः?

५. इतररूपाणि लिखत- अभवतम्।

६. अभूत्, अभूताम्, ………..।

७. भू धातोः लटि उत्तमपुरुषरूपाणि कानि?
८. भू धातोः विधिलिङ् मध्यमपुरुषरूपाणि कानि?
९. बभूव इति क्रियापदस्य धातुः कः ?
१०. भवानि इति क्रियापदस्य लकारः कः?
११. अभूः इत्यस्य पुरुषवचनें के

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

**(Answer the following questions in one or two sentences)**

१. प्रधानतया पदानि कति विधानि? कानि?
२. भूतकाले उपयुज्यमानाः लकाराः के?

## निर्दिष्टाभ्यासः (Assignments)

१. बभूव इति क्रियापदस्य इतररूपाणि लिखत।
२. भू धातोः लृट् लकाररूपाणि लिखत।
३. अभूवम् इति क्रियापदस्य इतररूपाणि लिखत।
४. भू धातोः लटि लङि लृटि च रूपाणि लिखन्तु।

## उत्तराणि (Answer to Objective type questions)

१. धात्वानुसारेण।
२. लुट्लकारः।
३. वयम्।
४. लङ्।
५. अभवः, अभवतम्, अभवत।
६. अभूवन्।
७. भवामि, भवावः, भवामः।
८. भवेः, भवेतम्, भवेत।
९. भू धातुः।
१०. लोट्।

| |
|---|
| ११. उत्तमपुरुषः एकवचनम्। |

## अधिकवाचनाय ग्रन्थाः (Suggested Readings)


१. रामचन्द्र झा,'रूपचन्द्रिका' चौखम्बा संस्कृतसीरीस् ओफीस् वाराणसी, २०११।
२. अप्पय्यदीक्षितः, सिद्धान्तकौमुदी बालमनोरमा तृतीयः भागः, चौखम्बा,१९६९।
३. विद्यासागर् के.एल्.वी शास्त्री, धातुमञ्जरी, आर्. एस् वाद्यार् आण्ड् सन्स्,कल्पात्ति,पालक्काड्।

# Unit - 2

## वदि (वन्द्) धातुः (आत्मनेपदी) - दशलकारेषु।

### उद्देश्यानि (Learning Outcomes)

- वदि(वन्द्) धातोः दशलकाराणां रूपाणि गृह्णाति।
- क्रियापदं सुष्ठु सुव्यक्तं च प्रयुङ्क्ते।
- भूत-वर्तमान-भविष्यकालानां ज्ञानेन भाषणं संस्कृतभाषायां कर्तुं शक्यते।

### प्राग्व्यपेक्षाः (Prerequisites)

भू धातोः दशलकाराणां रूपाणि पठितम्। तथा वदि (वन्द्) धातोः रूपाणि कानि? पश्यामः। वदि धातोः अर्थः- अभिवादने, स्तुतौ।

### मुख्यपदानि (Keyterms)

वदि(वन्द्)धातुः, आत्मनेपदी, ववन्दे, वन्दिता, वन्दिष्यते, वन्दताम्, अवन्दत।

### Discussion

**वदिधातुः आत्मनेपदी लट्रूपाणि।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वन्दते | वन्देते | वन्दन्ते |
| मध्यमपुरुषः | वन्दसे | वन्देथे | वन्दध्वे |
| उत्तमपुरुषः | वन्दे | वन्दावहे | वन्दामहे। |

| | | |
|---|---|---|
| सः गुरुं वन्दते | तौ गुरुं वन्देते | ते गुरुं वन्दन्ते |
| त्वं गुरुं वन्दसे | युवां गुरुं वन्देथे | यूयं गुरुं वन्दध्वे |
| अहं गुरुं वन्दे | आवां गुरुं वन्दावहे | वयं गुरुं वन्दामहे। |

### वदिधातुः आत्मनेपदी लिट्रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | ववन्दे | ववन्दाते | ववन्दिरे |
| मध्यमपुरुषः | ववन्दिषे | ववन्दाथे | ववन्दिध्वे |
| उत्तमपुरुषः | ववन्दे | ववन्दिवहे | ववन्दिमहे। |

### वदिधातुः आत्मनेपदी लुट्रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वन्दिता | वन्दितारौ | वन्दितारः |
| मध्यमपुरुषः | वन्दितासे | वन्दितासाथे | वन्दिताध्वे |
| उत्तमपुरुषः | वन्दिताहे | वन्दितास्वहे | वन्दितास्महे। |

### वदिधातुः आत्मनेपदी लृट्रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वन्दिष्यते | वन्दिष्येते | वन्दिष्यन्ते |
| मध्यमपुरुषः | वन्दिष्यसे | वन्दिष्येथे | वन्दिष्यध्वे |
| उत्तमपुरुषः | वन्दिष्ये | वन्दिष्यावहे | वन्दिष्यामहे। |

### वदिधातुः आत्मनेपदी लोट्रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वन्दताम् | वन्देताम् | वन्दन्ताम् |
| मध्यमपुरुषः | वन्दस्व | वन्देथाम् | वन्दध्वम् |
| उत्तमपुरुषः | वन्दै | वन्दावहै | वन्दामहै। |

### वदिधातुः आत्मनेपदी लङ्रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अवन्दत | अवन्देताम् | अवन्दन्त |
| मध्यमपुरुषः | अवन्दथाः | अवन्देथाम् | अवन्दध्वम् |
| उत्तमपुरुषः | अवन्दे | अवन्दावहि | अवन्दामहि |

### वदिधातुः आत्मनेपदी आशिर्लिङ्रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वन्दिषीष्ट | वन्दिषायास्ताम् | वन्दिषीरन् |
| मध्यमपुरुषः | वन्दिषीष्ठाः | वन्दिषीयास्थाम् | वन्दिषीध्वम् |
| उत्तमपुरुषः | वन्दिषीय | वन्दिषीवहि | वन्दिषीमहि। |

### वदिधातुः आत्मनेपदी विधिलिङ्रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वन्देत | वन्देयाताम् | वन्देरन् |
| मध्यमपुरुषः | वन्देथाः | वन्देयाथाम् | वन्देध्वम् |
| उत्तमपुरुषः | वन्देय | वन्देवहि | वन्देमहि। |

### वदिधातुः आत्मनेपदी लुङ्रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अवन्दिष्ट | अवन्दिषाताम् | अवन्दिषत |
| मध्यमपुरुषः | अवन्दिष्ठाः | अवन्दिषाथाम् | अवन्दिध्वम् |
| उत्तमपुरुषः | अवन्दिषि | अवन्दिष्वहि | अवन्दिष्महि। |

### वदिधातुः आत्मनेपदी लृङ्रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अवन्दिष्यत | अवन्दिष्येताम् | अवन्दिष्यन्त |
| मध्यमपुरुषः | अवन्दिष्यथाः | अवन्दिष्येथाम् | अवन्दिष्यध्वम् |
| उत्तमपुरुषः | अवन्दिष्ये | अवन्दिष्यावहि | अवन्दिष्यामहि। |

अयि मित्राणि,

वन्द् धातोः (वदि) सर्वेषु लकारेषु वर्तमानानि रूपाणि वयमपठम्। इदानीं परिशीलनमेव कार्यम्। पुनःपुनरपि पठनेन, आवर्तनेन प्रयोगेण वा सर्वाण्यपि रूपाणि स्वायत्तीकर्तुं शक्यते। तदर्थं यत्नं कुरुत।

प्रत्येकं लकारस्य प्रथमपुरुषैकचनरूपपठनेन इतराणि रूपाणि स्मर्तुं शक्यते चेत् तानि रूपाणि सूचयामि।

## पुनरावृत्तिः (Recap)

- लट् वन्दते।
- लिट् ववन्दे।

- लुट् वन्दिता।
- लृट् वन्दिष्यते।
- लोट् वन्दताम्।
- आशिर्लिङ् वन्दिषीष्ट।
- विधिलिङ् वन्देत।
- लुङ् अवन्दिष्ट।
- लृङ् अवन्दित।

बहूनां आत्मनेपदधातूनां रूपाणि वन्द् धातोरिव। परस्मैपदधातूनां रूपाणि भूधातोरिव भवन्ति। अतः एतयोः धात्वोः पठनं पदस्वाधीनतासम्पादने नितरां प्रयोजनप्रदमेव।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. अहं गुरुं ......................। (वदि धातुमुपयुज्य पूरयत)
२. वन्दिषीय इति रूपस्य धातुः कः?
३. कति परस्मैपदप्रत्ययाः सन्ति?
४. अस्मद् शब्दयोगे कः पुरुषः?
५. वन्द् धातुः आत्मनेपदी परस्मैपदी वा भवति?
६. वन्द् धातोः लृट्प्रथमपुरुषरूपाणि कानि?
७. वन्दते इति शब्दस्य लकारः कः?
८. वन्दितारौ इति शब्दस्य धातुपदलकारपुरुषवचनानि लिखत।
९. वन्दिषीष्ट इति रूपस्य पुरुषवचने के?
१०. वन्दताम् इति रूपस्य बहुवचनम् किम्?

## विचिन्तनम्

**यथोचितं योजयत।**

| क | ख |
|---|---|
| १. अनद्यतनभूतकालः | लोट् |
| २. सामान्यभूतकालः | बभूव |
| ३. वेदे एव प्रयोगः | लङ् |
| ४. भू धातोः लिट्लकारेषु अन्यतमः | आशिर्लिङ् |

| | |
|---|---|
| ५. सामान्यभाविकाले | लट् |
| ६. भवानि | लुङ् |
| ७. आशिरर्थे | लृट् |
| ८. क्रियायाः अनिष्पत्तौ प्रयुज्यमानः लकारः | लुट् |
| ९. वन्दते | लेट् |
| १०. वन्दितारौ | लृङ् |

## निर्दिष्टाभ्यासः (Assignment)

| | |
|---|---|
| १. | वन्द् धातोः आत्मनेपदि भूतकालरूपाणि लिखत। |

## उत्तराणि (Answer to Objective type questions)

१. अहं गुरुं वन्दे। अवन्दे। वन्दिष्ये वा।
२. वन्दिषीय इति रूपं वदि (वन्द्) धातोः भवति।
३. नव परस्मैपदप्रत्ययाः सन्ति।
४. अस्मद् शब्दयोगे उत्तमपुरुषः प्रयोक्तव्यः।
५. वन्द् धातुः आत्मनेपदी भवति।
६. वन्दिष्यते वन्दिष्येते वन्दिष्यन्ते।
७. लट्।
८. वन्द् धातु आत्मनेपदि लुट्लकारः प्रथमपुरुष एकवचनम्।
९. प्रथमपुरुष-एकवचनम्।
१०.वन्दन्ताम्।

## अधिकवाचनाय ग्रन्थाः (Suggested Readings)


१. रामचन्द्र झा,'रूपचन्द्रिका' चौखम्बा संस्कृतसीरीस् ओफीस्, वाराणसी, २०११।
२. अप्पय्यदीक्षितः, सिद्धान्तकौमुदी बालमनोरमा तृतीयः भागः, चौखम्बा,१९६९।
३. विद्यासागर् के.एल्.वी शास्त्री, धातुमञ्जरी, आर्. एस् वाद्यार् आण्ड् सन्स्,कल्पात्ति,पालक्काड्।

# Unit - 3

## कृञ् धातुः (उभयपदी) परस्मैपदे-दशलकारेषु।

### उद्देश्यानि (Learning Outcomes)

- डुकृञ् करणे इति परस्मैपदी धातोः दशलकाराणां रूपाणि गृह्णाति।
- क्रियापदं सुष्ठु सुव्यक्तं च प्रयुङ्क्ते।
- भूत-वर्तमान-भविष्यकालानां ज्ञानेन भाषणं संस्कृतभाषायां कर्तुं शक्यते।

### प्राग्व्यपेक्षाः (Prerequisites)

हे छात्राः,
वन्द् धातूनां दशलकाराणां रूपाणि पठितम्।उभयपदिनं डुकृञ् धातुमधिकृत्य पठामः। इदानीं परस्मैपदि डुकृञ् धातुमधिकृत्य पठामः। श्रद्धया पठन्तु।

### मुख्यपदानि (Keyterms)

डुकृञ् करणे धातुः, परस्मैपदी, करोति, चकार, कर्ता, करिष्यति।

### Discussion

**डुकृञ् करणे इति धातुः। परस्मैपदी लट्रूपाणि।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | करोति | कुरुतः | कुर्वन्ति |
| मध्यमपुरुषः | करोषि | कुरुथः | कुरुथ |
| उत्तमपुरुषः | करोमि | कुर्वः | कुर्मः। |

**डुकृञ् करणे परस्मैपदी लिट्रूपाणि।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | चकार | चक्रतुः | चक्रुः |
| मध्यमपुरुषः | चकर्थ | चक्रथुः | चक्र |
| उत्तमपुरुषः | चकार- चकर | चकृव | चकृम। |

### डुकृञ् करणे परस्मैपदी लुट्रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | कर्ता | कर्तारौ | कर्तारः |
| मध्यमपुरुषः | कर्तासि | कर्तास्थः | कर्तास्थ |
| उत्तमपुरुषः | कर्तास्मि | कर्तास्वः | कर्तास्मः। |

### डुकृञ् करणे परस्मैपदी लृट्रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | करिष्यति | करिष्यतः | करिष्यन्ति |
| मध्यमपुरुषः | करिष्यसि | करिष्यथः | करिष्यथ |
| उत्तमपुरुषः | करिष्यामि | करिष्यावः | करिष्यामः। |

### डुकृञ् करणे परस्मैपदी लोट्रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | करोतु-कुरुतात् | कुरुताम् | कुर्वन्तु |
| मध्यमपुरुषः | कुरु-कुरुतात् | कुरुतम् | कुरुत |
| उत्तमपुरुषः | करवाणि | करवाव | करवाम। |

### डुकृञ् करणे परस्मैपदी लङ्रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अकरोत् | अकुरुताम् | अकुर्वन् |
| मध्यमपुरुषः | अकरोः | अकुरुतम् | अकुरुत |
| उत्तमपुरुषः | अकरवम् | अकुर्व | अकुर्म। |

### डुकृञ् करणे परस्मैपदीआशिर्लिङ्रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | क्रियात् | क्रियास्ताम् | क्रियासुः |
| मध्यमपुरुषः | क्रियाः | क्रियास्तम् | क्रियास्त |
| उत्तमपुरुषः | क्रियासम् | क्रियास्व | क्रियास्म। |

### डुकृञ् करणे परस्मैपदी विधिलिङ्रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | कुर्यात् | कुर्यास्ताम् | कुर्युः |

| | | | |
|---|---|---|---|
| **मध्यमपुरुषः** | कुर्याः | कुर्यातम् | कुर्यात |
| **उत्तमपुरुषः** | कुर्याम् | कुर्याव | कुर्याम। |

**डुकृञ् करणे परस्मैपदी लुङ्रूपाणि।**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अकार्षीत् | अकार्ष्टाम् | अकार्षुः |
| **मध्यमपुरुषः** | अकार्षीः | अकार्ष्टम् | अकार्ष्ट |
| **उत्तमपुरुषः** | अकार्षम् | अकार्ष्व | अकार्ष्म। |

**डुकृञ् करणे परस्मैपदी लृङ्रूपाणि।**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | अकरिष्यत् | अकरिष्यताम् | अकरिष्यन् |
| **मध्यमपुरुषः** | अकरिष्यः | अकरिष्यतम् | अकरिष्यत |
| **उत्तमपुरुषः** | अकरिष्यम् | अकरिष्याव | अकरिष्याम। |

हे शिष्याः,
प्रत्येकं लकाराणां प्रथमैकवचनश्रवणेन इतराणि रूपाणि स्मृतिमण्डले आयाति चेत् तदनुकूला पठनरीतिः स्वीकर्तव्या।

## पुनरावृत्तिः (Recap)

- लट् करोति।
- लिट् चकार।
- लुट् कर्ता।
- लृट् करिष्यति।
- लोट् करोतु-कुरुतात्।
- लङ् अकरोत्।
- आशिर्लिङ् क्रियताम्।
- विधिलिङ् कुर्यात्।
- लुङ् आकार्षीत्।
- लृङ् अकरिष्यत्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. त्वं किं ...................... ? (वर्तमानकालस्य उचितं रूपं लिखत)
२. डुकृञ् धातोः लिटि परस्मैपदि मध्यमपुरुषैकवचनरूपं किम्?
३. कति वचनानि सन्ति?
४. कति लकाराः?
५. लट्लकारः कस्मिन् काले प्रयुज्यते?
६. प्रार्थनार्थे कः लकारः?
७. अकार्षीः इति पदस्य धातु कः?
८. अकार्ष्म इति शब्दस्य धातुपदलकारपुरुषवचनानि लिखत?
९. अकार्षीः इत्यस्य लकारः कः?
१०. डुकृञ् करणे परस्मैपदी लृङ् लकारस्य प्रथमपुरुषैकवचनरूपं किम्?

## एकैकया खण्डिकया उत्तराणि लिखत।
(Answer the following question in paragraph)

२. करिष्यति। (इतररूपाणि लिखत)

## निर्दिष्टाभ्यासः (Assignments)

१. डुकृञ् करणे परस्मैपदी भविष्यकालरूपाणि लिखत।
२. कृञ् धातोः परस्मैपदी लटि लङि च रूपाणि लिखन्तु।

## उत्तराणि (Answer to Objective type questions)

१. करोषि।
२. चकर्थ।
३. त्रीणि वचनानि - एकवचनद्विवचनबहुवचनभेदात्।
४. दशलकाराः भाषायाम्।
५. वर्तमानकाले लट्लकारः।
६. प्रार्थनार्थे लोट्।
७. डुकृञ् धातुः परस्मैपदी लुङ् लकारः।

| |
|---|
| ८. डुकृञ् धातुः परस्मैपदी लुङ् लकारः उत्तमपुरुष बहुवचनम्। |
| ९. लुङ्। |
| १०.अकरिष्यत्। |

## अधिकवाचनाय ग्रन्थाः (Suggested Readings)


| |
|---|
| १. रामचन्द्र झा,'रूपचन्द्रिका' चौखम्बा संस्कृतसीरीस् ओफीस्, वाराणसी, २०११। |
| २. अप्पय्यदीक्षितः, सिद्धान्तकौमुदी बालमनोरमा तृतीयः भागः, चौखम्बा,१९६९। |
| ३. विद्यासागर् के.एल्.वी शास्त्री, धातुमञ्जरी, आर्. एस् वाद्यार् आण्ड् सन्स्,कल्पात्ति,पालक्काड्। |

# Unit - 4

## कृञ् धातुः (उभयपदी) आत्मनेपदे-दशलकारेषु।

### उद्देश्यानि (Learning Outcomes)

- डुकृञ् करणे इति धातोः आत्मनेपदी दशलकाराणां रूपाणि गृह्णाति।
- भूत-वर्तमान-भविष्यकालानां ज्ञानेन भाषणं संस्कृतभाषायां कर्तुं शक्यते।
- क्रियापदानि विविच्य जानाति।

### प्राग्व्यपेक्षाः (Prerequisites)

संस्कृतपठने क्रियायाः स्थानं महदेव। क्रियया अर्थावबोधः जायते।डुकृञ् करणे इति धातुः उभयपदि भवतीत्युक्तम्। परस्मैपदरूपाणि पठितानि।इदानीम् आत्मनेपदरूपाणि पठामः।

### मुख्यपदानि (Keyterms)

डुकृञ् करणे धातुः, आत्मनेपदी, कुरुते, चक्रे, कर्ता, कुरुताम्।

### Discussion

**डुकृञ् करणे आत्मनेपदी लट्रूपाणि।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | कुरुते | कुर्वाते | कुर्वते |
| मध्यमपुरुषः | कुरुषे | कुर्वाथे | कुरुध्वे |
| उत्तमपुरुषः | कुर्वे | कुर्वहे | कुर्महे। |

**डुकृञ् करणे आत्मनेपदी लिट्रूपाणि।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | चक्रे | चक्राते | चक्रिरे |
| मध्यमपुरुषः | चकृषे | चक्राथे | चकृढ्वे |
| उत्तमपुरुषः | चक्रे | चकृवहे | चकृमहे। |

## डुकृञ् करणे आत्मनेपदी लुट्रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | कर्ता | कर्तारौ | कर्तारः |
| मध्यमपुरुषः | कर्तासि | कर्तास्थः | कर्तास्थ |
| उत्तमपुरुषः | कर्तास्मि | कर्तास्वः | कर्तास्मः। |

## डुकृञ् करणे आत्मनेपदी लृट्रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | करिष्यते | करिष्येते | करिष्यन्ते |
| मध्यमपुरुषः | करिष्यसे | करिष्येथे | करिष्यध्वे |
| उत्तमपुरुषः | करिष्ये | करिष्यावहे | करिष्यामहे। |

## डुकृञ् करणे आत्मनेपदी लोट्रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | कुरुताम् | कुर्वाताम् | कुर्वताम् |
| मध्यमपुरुषः | कुरुष्व | कुर्वाथाम् | कुरुध्वम् |
| उत्तमपुरुषः | करवै | करवावहै | करवामहै। |

## डुकृञ् करणे आत्मनेपदी लङ्रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अकुरुत | अकुर्वताम् | अकुर्वत |
| मध्यमपुरुषः | अकुरुथाः | अकुर्वाथाम् | अकुरुध्वम् |
| उत्तमपुरुषः | अकुर्वि | अकुर्वहि | अकुर्महि। |

## डुकृञ् करणे आत्मनेपदी विधिलिङ्रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | कुर्वीत | कुर्वीयाताम् | कुर्वीरन् |
| मध्यमपुरुषः | कुर्वीथाः | कुर्वीयाथाम् | कुर्वीध्वम् |
| उत्तमपुरुषः | कुर्वीय | कुर्वीवहि | कुर्वीमहि। |

**डुकृञ् करणे आत्मनेपदी आशिर्लिङ्-रूपाणि।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | कृषीष्ट | कृषीयास्ताम् | कृषीरन् |
| मध्यमपुरुषः | कृषीष्ठाः | कृषीयास्थाम् | कृषीढ्वम् |
| उत्तमपुरुषः | कृषीय | कृषीवहि | कृषीमहि। |

**डुकृञ् करणे आत्मनेपदी लुङ्-रूपाणि।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अकृत | अकृषाताम् | अकृषत |
| मध्यमपुरुषः | अकृथाः | अकृषाथाम् | अकृढ्वम् |
| उत्तमपुरुषः | अकृषि | अकृष्वहि | अकृष्महि। |

**डुकृञ् करणे आत्मनेपदी लृङ्-रूपाणि।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अकरिष्यत | अकरिष्येताम् | अकरिष्यन्त |
| मध्यमपुरुषः | अकरिष्यथाः | अकरिष्येथाम् | अकरिष्यध्वम् |
| उत्तमपुरुषः | अकरिष्ये | अकरिष्यावहि | अकरिष्यामहि। |

## पुनरावृत्तिः (Recap)

- लट् कुरुते।
- लिट् चक्रे।
- लुट् कर्ता।
- लृट् करिष्यते।
- लोट् कुरुताम्।
- लङ् अकुरुत।
- आशिर्लिङ् कृषीष्ट।
- विधिलिङ् कुर्वीत।
- लुङ् अकृत।
- लृङ् अकरिष्यत।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

| |
|---|
| १. डुकृञ् आत्मनेपदी लुङ् प्रथमपुरुषरूपाणि कानि? |
| २. कृषीवहि इति शब्दस्य धातुः कः? |
| ३. कुरुते शब्दं आत्मनेपदि परस्मैपदि वा भवति? |
| ४. कर्ता पदस्य धातुपदलकारपुरुषवचनानि किम्? |
| ५. चकृषे पदस्य लकारः कः ? |
| ६. कृञ् धातोः आत्मनेपदी लृङ् लकारस्य उत्तमपुरुषद्विवचनं किम्? |
| ७. अकृत इति क्रियापदस्य पुरुषः कः? |
| ८. अकुर्महि इत्यस्य वचनं किम्? |
| ९. कर्ता इति पदस्य बहुवचनरूपं किम्? |
| १०.चक्रे इति क्रियापदस्य धातुः कः? |

## एकैकया खण्डिकया उत्तराणि लिखत।
## (Answer the following question in paragraph)

| |
|---|
| १. 'कुरुत' इतररूपाणि लिखत- |

## निर्दिष्टाभ्यासः (Assignments)

| |
|---|
| १. डुकृञ् करणे आत्मनेपदी भूतकालरूपाणि लिखत- |
| २. कैरल्यां आङ्गलभाषायां वा यथेष्टं पञ्च वाक्यानि विरच्य तेषां संस्कृते भाषान्तरीकरणं क्रियन्ताम्। |

## उत्तराणि (Answer to Objective type questions)

| |
|---|
| १. अकृत, अकृषाताम्, अकृषत। |
| २. डुकृञ् धातुः। |
| ३. आत्मनेपदम्। |
| ४. डुकृञ् करणे आत्मनेपदी लुट् प्रथमपुरुष एकवचनम्। |
| ५. लिट्। |
| ६. अकरिष्यावहि। |
| ७. प्रथमपुरुषः। |
| ८. बहुवचनम्। |

९. कर्तारः।
१०.कृञ् आत्मनेपदी।

भोः छात्राः,

डुकृञ् करणे इति धातोः आत्मनेपदिरूपाणि पठितुम् ईषत्प्रयासः वर्तते। तथापि पठितुं यत्नः क्रियन्ताम्। लाघवाय तस्य धातोः प्रथमपुरुषैकवचनरूपाणि सूचयामि। पठन्तु।

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | कुरुते | कुर्वाते | कुर्वते |
| **मध्यमपुरुषः** | कुरुषे | कुर्वाथे | कुरुध्वे |
| **उत्तमपुरुषः** | कुर्वे | कुर्वहे | कुर्महे। |

प्रिय छात्राः,

धातोः लट्-लङ्-लृट्लकाराणां पठने श्रद्धा कार्या। वर्तमान-भूत-भविष्यकालप्रयोगेण भाषां सहसा वशीकर्तुं शक्यते। कतिपयानां धातूनां लट्-लङ्-लृट्लकारेषु प्रथमपुरुषैकवचनरूपाणि अधो दीयन्ते।

| धातुः | लट् | लङ् | लृट् |
|---|---|---|---|
| भू सत्तायाम् | भवति | अभवत् | भविष्यति |
| वदि (वन्द्) | वन्दते | अवन्दत | वन्दिष्यते |
| डुकृञ् (पर) | करोति | अकरोत् | करिष्यति |
| डुकृञ् (आत्म) | कुरुते | अकुरुत | करिष्यते |
| अट्-अटने | अटति | आटत् | अटिष्यति |
| गम्-गतौ | गच्छति | अगच्छत् | गमिष्यति |
| पठ्-पठने | पठति | अपठत् | पठिष्यति |
| अर्च-पूजायाम् | अर्चयति | आर्चयत् | अर्चयिष्यति |
| रक्ष-पालने | रक्षति | अरक्षत् | रक्षिष्यति |
| अस-भुवि | अस्ति | आसीत् | भविष्यति |
| अर्थ उपयाञ्चायां(याचने) | अर्थयते | आर्थयत | अर्थयिष्यते |
| आस-उपवेशने | आस्ते | आस्त | आसिष्यते |
| स्मृ-स्मरणे | स्मरति | अस्मरत् | स्मरिष्यति |
| स्पन्द्-रुपन्दवे | स्पन्दते | अस्पन्दत | स्पन्दिष्यते |
| कूज्-अव्यक्ते शब्दे | कूजति | अकूजत् | कूजिष्यति |
| मान-पूजायाम् | मानयति | अमानयत् | मानयिष्यति |
| मन-ज्ञाने | मन्यते | अमन्यत | मंस्यते |
| मुच्-मोक्षणे (मोचने) | मोचयति | अमोचयत् | मोचयिष्यति |
| ज्ञा-अवबोधने | जानाति | अजानात् | ज्ञास्यति |
| नृति-गात्रविक्षेपणे | नृत्यति | अनृत्यत् | नर्तिष्यति,नर्त्स्यति |

| | | | |
|---|---|---|---|
| नुद्-प्रेरणे<br>पच्-पाके | नुदति<br>पचति | अनुदत्<br>अपचत् | नोत्स्यति<br>पक्ष्यति |

हे सुहृदः,

परिशीलनेन क्रियापदानां ग्रहणं सम्पादितव्यम्। संस्कृते क्रियापदानां नितरां प्रधान्यमस्ति। पूर्वसूचितानां त्रयाणां क्रियापदानां विषये प्रयासः नास्तीति मन्ये। अधिकज्ञानायैव चार्ट्पत्रिका दत्ता। इदानीं दत्तानां प्रश्नानां स्वयं लिखितान्युत्तराणि परिशोधयत।

## निर्देशानुसारमुत्तरत।

**संस्कृतभाषायां लिखत।**

1. A boy plays in the garden.
2. Boys are playing with a ball.
3. Girls will dance.
4. A boy is asking question to his mother.
5. A poet is writing a poem.
6. Kalidasa wrote the drama, Abijnana Sakuntala.
7. I salute the teacher.
8. Salute to mother.
9. Rama writes.
10. Rama wrote.
11. Rama will write.
12. He goes to school.
13. He went to school.
14. He will go to school.
15. Father protects his sons.
16. Father protected his sons.
17. Father will protect his sons.
18. What are you doing?
19. I am studying my lessons.
20. I will study my lessons.
21. I studied my lessons.
22. People went to the market.

23. People will go to the market.
24. He is the servent of the King.
25. I obey my father.
26. Our school is away from here.
27. What is your name?
28. Two boys are playing.
29. Two girls are playing.
30. Rama went to forest with Lekshmana and Sita.

**Difficult words.**

ball - कन्तुकम्। dances - नृत्यति। asks - पृच्छति। question - प्रश्नः। protects - रक्षति। son - पुत्रः। lesson - पाठः। market - विपणिः। servent - सेवकः। obeys - अनुसरति।

हे छात्राः,

नामपदानां क्रियापदानां च पठनेन प्रयोगेण च भाषां सहसा वशीकर्तुं शक्यते।

भाषणं लेखनं च भाषापठने बहूपकारके भवतः। अतः यावच्छक्यं भाषणं लेखनं च कार्यम्।

भाषान्तरीकरणं काचननैपुणी भवति। भाषायाः घटनां सुष्ठु ज्ञायते चेत् भाषान्तरीकरणे लाघवत्वमायाति। क्रियानुसारि भवति कर्ता। कर्तुः वचनानुसारं क्रिया प्रयोक्तव्या। विभक्तिनिश्चयमपि कार्यम्। युष्माभिः लिखितानि उत्तराणि परिशोधयामः। सर्वेषु वाक्येषु कर्त्रानुसरं क्रियापदानि प्रयोक्तव्यानि।

'बालः' इति कर्ता प्रथमवाक्यस्य। क्रियापदं क्रीडति। अतः बालः उद्याने क्रीडति। द्वितीये वाक्ये बालाः इति कर्ता। अतः क्रीडन्ति इति बहुवचनम्। एवं सर्वत्र।

चतुर्थे वाक्ये मातरं प्रश्नं पृच्छति। कः? बालः। अष्टमे वाक्ये 'नमः'इति पदस्य योगात् चतुर्थी। मातृशब्दस्य चतुर्थैकवचनं भवति मात्रे इति। अतः मात्रे नमः।

चतुर्दशे वाक्ये गम्लृ (गम्)धातोः लृट् प्रथमपुरुषैकवचनं क्रियारूपेण वर्तितव्यम्। अतः सः विद्यालयं गमिष्यति इति। अपि च गम्धातोः प्रयोगे (गच्छति,अगच्छत्, गमिष्यति) कुत्र इति प्रश्नस्य उत्तरं द्वितीयाविभक्तौ स्यात्।

अष्टादशे वाक्ये 'युष्मद्' शब्दस्य प्रयोगः। युष्मच्छब्दः कर्ता चेत् क्रिया मध्यमपुरुषः स्यादिति उक्तम्। अस्माभिः ज्ञातश्च। अतः डकृञ् धातोः परस्मैपदी लट्प्रथमपुरुषैकवचनमेव क्रियात्वेनायाति। अतः 'त्वं किं करोषि'इति।

चतुर्विंशत्यां वाक्ये 'राजन्' शब्दस्य षष्ठी प्रयोक्तव्या। अतः 'राज्ञः' इति।

अष्टविंशतितमे वाक्ये द्विवचनमेव कर्ता। क्रियापि द्विवचनं भवेत्। अतः बालौ क्रीडतः इति।

## अधिकवाचनाय ग्रन्थाः (Suggested Readings)


१. रामचन्द्र झा,‘रूपचन्द्रिका’ चौखम्बा संस्कृतसीरीस् ओफीस्, वाराणसी, २०११।

२. अप्पय्यदीक्षितः, सिद्धान्तकौमुदी बालमनोरमा तृतीयः भागः, चौखम्बा,१९६९।

३. विद्यासागर् के.एल्.वी शास्त्री, धातुमञ्जरी, आर्. एस् वाद्यार् आण्ड् सन्स्,कल्पात्ति,पालक्काड्।

BLOCK -3

# रघुवंशमहाकाव्यम्

## (महाकविः कालिदासः)

## द्वितीयसर्गः

## १-४०श्लोकाः।

# Unit - 1

## १-१० श्लोकाः।

कविकुलगुरुणा कालिदासेन प्रणीतस्य रघुवंशमहाकाव्यस्य द्वितीयः सर्गः अत्र समारभ्यते। दिलीपमहाराजस्य नन्दिनीपरिचरणं, राज्ञः दृढभक्तिपरीक्षणं तथा नन्दिनीवरप्रसादश्च सर्गेऽस्मिन् प्रतिपाद्य विषयः।

### उद्देश्यानि (Learning Outcomes)

१. पद्यं (श्लोकं)यतितालानुसारम् आलपति।
२. महाकविं कालिदासं, तस्य ग्रन्थान् च परिचिनोति।
३. महाकाव्येषु रघुवंशस्य प्राधान्यं जानाति।
४. आधुनिकं भरणाधिकारिणं प्रति तुलनां करोति।
५. काव्यरसानुभूतिं अनुभूयते।
६. अलङ्कारप्रयोगे, विशिष्य उपमालङ्कारप्रयोगे कालिदासस्य अनितरसाधारणीं प्रतिभां जानाति।
७. नूतनपदावलीं वर्धयति।
८. आशयावगतिः जायते।
९. धातुपदलकारपुरुषवचनानि जानाति।

### प्राग्व्यपेक्षाः (Prerequisites)

| | |
|---|---|
| अध्यापकः | - हे छात्राः, कविः काव्यं चेति पदद्वयं युष्माभिः श्रुतपूर्वं वा न वा? |
| छात्राः | - श्रुतमेव। |
| अध्यापकः | - एवं चेत् कतिपयानां कवीनां नामानि वदन्तु। |
| छात्राः | - भासभारविकालिदासादयः। |
| अध्यापकः | - एतादृशानां कवीनां कर्म एव काव्यम्। संस्कृतसाहित्ये विद्यमानानि महाकाव्यानि ज्ञातं वा न वा? |
| छात्राः | - ज्ञातम् एव। |
| अध्यापकः | - यदि चेत् तानि कानि? |
| छात्राः | - नैषधम्, किरातार्जुनीयम्, शिशुपालवधम्, कुमारसम्भवम्, रघुवंशम् चेति। |
| अध्यापकः | - तेषु अन्तिमद्वयं महाकविना कालिदासेन प्रणीतं भवति। |
| छात्राः | - कालिदासस्य कालः? |
| अध्यापकः | - क्रिस्तोः पूर्वं प्रथमशतकं आसीदिति पण्डिताः मन्यन्ते। सः प्रतिभावान् भावनाकुबेरः कश्चन महाकविरासीत्। कवीनां कविः एव महाकविः। विक्रमादित्यमहाराजस्य विद्वत्सभायां नवरत्नेष्वन्यतमः आसीत् अयं महाकविः। |

**धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः।**
**ख्यातो वराहमिहिरो नृपतेर्सभायां रत्नानि वै वररुचिर्नवविक्रमस्य।।**

इतीयं भणितिः सुतरां प्रसिद्धमेव। उपमालङ्कारप्रयोगे अनितरसाधारणप्रतिभावान् आसीत् अयं महाकविः। बहूनि निदर्शनानि सन्ति। तदन्विष्य पश्यन्तु।

तस्य कृतित्वेन उपलब्धमानानि ग्रन्थतल्लजानि न केवलं संस्कृतसाहित्ये किन्तु लोकसाहित्ये अपि अनितरसाधारणीं कविताकान्तिं प्रसार्य सर्वोत्कर्षेण वरीवर्ति इति वक्तुं न कापि संशीतिः वर्तते। तेषु अभिज्ञानशाकुन्तलम्, मालविकाग्निमित्रम्, मेघदूतम् इत्यादयः साहित्यनभोमण्डले सर्वोत्कर्षेण वर्तन्ते। प्रथितप्रभावस्य महाकवेरस्य प्रतिभावल्लर्यां विकसिते द्वे महाकाव्येस्तः कुमारसम्भवं रघुवंशं च इति।

रघुवंशम् अधिकृत्य वयम् अत्र पठामः। रघोः वंशः रघुवंशः। वंशं नाम कुलम्। एकोनविंशतिसर्गात्मके अस्मिन् महाकाव्ये दिलीपादारभ्य अग्निवर्णपर्यन्तानां रघुकुलजातानां राज्ञां कथा प्रतिपाद्यते। सर्वैरादृतस्यास्य महाकाव्यस्य द्वितीयः सर्गः अस्माकं पाठ्यविषयः।

द्वितीयसर्गप्रवेशिका।

प्रथमसर्गे सभार्यः राजा दिलीपः कुलगुरोः वसिष्ठस्य आश्रमम् उपेत्य कामधेनुसुतां नन्दिनीं परिसेवितुम् आरब्धवान्। यदा नन्दिनी निद्रां प्राप तदा दिलीपःआस्तीर्य तस्या सकाशं शेतवान् आसीत्। अतिप्रभाते महर्षिशिष्याणां मन्त्रोच्चारणध्वनिमाकर्ण्य सुप्तोत्थितः महाराजः भूयोऽपि तस्याः परिचरणे श्रद्धावान् आसीत्।

## मुख्यपदानि (Keyterms)

प्रजानामधिपः श्रुतेरिवार्थं, सौरभेयीं, स्ववीर्यगुप्ता, द्विपेन्द्रः, आचारलाजैः, समाराधनतत्परः, छायेव, अधिज्यधन्वा, पार्श्वद्रुमाः।

## Discussion

### १. दिलीपः धेनुं मुमोच।

**अथ प्रजानामधिपः प्रभाते**
**जायाप्रतिग्राहितगन्धमाल्याम्।**
**वनाय पीतप्रतिबद्धवत्सां**
**यशोधनो धेनुमृषेर्मुमोच।।१।।**

**पदच्छेदः** - प्रजानामधिपः - प्रजानाम् + अधिपः।
धेनुमृषेर्मुमोच - धेनुम् + ऋषेः + मुमोच।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| अथ | - | कुलगुरोः वसिष्ठस्य उपदेशानन्तरम्। |
| प्रभाते | - | उषसि। |
| यशोधनः | - | कीर्तिमान्। |

| | | |
|---|---|---|
| प्रजानामधिपः | - | जनानामधिपः राजा दिलीपः। |
| जायाप्रतिग्राहितगन्धमाल्याम् | - | जायया भार्यया, प्रतिग्रहीतं स्वीकृतं, गन्धमाल्यां सुगन्धपूरितचन्दनमालादिभिः अर्चिताम्। |
| पीतप्रतिबद्धवत्साम् | - | पयः पाययित्वा बद्धवत्साम्। |
| ऋषेः | - | मुनेः। |
| धेनुं | - | गां नन्दिनीम्। |
| वनाय | - | काननाय। |
| मुमोच | - | मोचितवान्। |

**सारः** - वसिष्ठस्य उपदेशानुसारेण प्रभाते राज्ञः दिलीपस्य धर्मपत्नी सुदक्षिणा गन्धमाल्यादिभिः धेनुं नन्दिनीम् अर्चयामास। ततः वत्सं दुग्धं पाययित्वा बबन्ध। अनन्तरं यशस्वी दिलीपः स्वच्छन्दगमनाय तां नन्दिनीं वनाय मुमोच।

**विग्रहः** - यशोधनः - यश एव धनं यस्य सः।

**क्रिया** - मुमोच। मुच्लृ मोचने परस्मैपदी लिट् प्रथमपुरुष एकवचनम्।
मुमोच - मुमुचतुः - मुमुचुः।

**२. सुदक्षिणा नन्दिनीमनुससार।**

**तस्याः खुरन्यासपवित्रपांसु-**
**मपांसुलानां धुरि कीर्तनीया।**
**मार्गं मनुष्येश्वरधर्मपत्नी**
**श्रुतेरिवार्थं स्मृतिरन्वगच्छत्।।२।।**

**पदच्छेदः** - श्रुतेरिवार्थं - श्रुतेः +इव + अर्थम्।
स्मृतिरन्वगच्छत् - स्मृतिः + अन्वगच्छत्।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| अपांसुलानां | - | पतिव्रतानां। |
| धुरि | - | अग्रे। |
| कीर्तनीया | - | परिगणनीया। |
| मनुष्येश्वरधर्मपत्नी | - | नरपतेः भार्या। |
| तस्याः | - | धेन्वाः नन्दिन्याः। |
| खुरन्यासपवित्रपांसुं | - | खुरविक्षेपणेन पवित्रीकृतपांसुसहितम्। |
| मार्गं | - | पन्थानम्। |
| श्रुतेः अर्थं स्मृतिः इव | - | वेदस्यार्थं स्मृतिः यथा। |
| अन्वगच्छत् | - | अन्वसरत्। |

**सारः** - पतिव्रतासु प्रथमगणनीया राज्ञः दिलीपस्य धर्मपत्नी सुदक्षिणा नन्दिन्याः खुरविक्षेपेण पवित्रीकृतपांसुसहितं मार्गं यथा श्रुतेः अर्थं स्मृतिः अनुसरति, तथा अनुससार।

**अलङ्कारः** - उपमा। 'उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः'

**विग्रहः** - अपांसुलानाम् - न विद्यमानः पांसुः यस्याः सा अपांसुला, तासाम्।
धर्मपत्नी - धर्माय (धर्मार्थं) पत्नी।

**क्रिया** - अन्वगच्छत् - अनु इत्युपसर्गपूर्वक गम्लृ गतौ धातोः परस्मैपदि लङ् प्रथमपुरुष एकवचनम्।
अन्वगच्छत् - अन्वगच्छताम् - अन्वगच्छन्।

**३. राजा पत्नीं निवर्त्य धेनुं जुगोप।**

**निवर्त्य राजा दयितां दयालु-**
**स्तां सौरभेयीं सुरभिर्यशोभिः।**
**पयोधरीभूतचतुस्समुद्रां**
**जुगोप गोरूपधरामिवोर्वीम्।।३।।**

**पदच्छेदः** - सुरभिर्यशोभिः - सुरभिः + यशोभिः।
धरामिवोर्वीम् - धराम् + इव +ऊर्वीम्।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| दयालुः | - | कारुणिकः। |
| यशोभिः | - | कीर्तिभिः। |
| सुरभिः | - | मनोज्ञः। |
| राजा | - | दिलीपः। |
| दयितां | - | पत्नीम्। |
| निवर्त्य | - | प्रतिनिवृत्य। |
| तां सौरभेयीं | - | तां नन्दिनीं। |
| पयोधरीभूतचतुस्समुद्रां | - | चतुस्समुद्राः पयोधरीरूपेण वर्तमानां। |
| गोरूपधरां | - | गोरूपधारिणीं। |
| ऊर्वीम् इव | - | वसुधामिव। |
| जुगोप | - | अरक्षत्। |

**सारः** - परमकारुणिकः कीर्तिमान् स राजा दिलीपः स्वपत्नीं निवर्त्य पयोधररूपेण वर्तमानां चतुस्समुद्रसहितां गोरूपधारिणीं नन्दिनीं भूमिम् इव अरक्षत्।

**विग्रहः** - सौरभेयीम् - सुरभेः अपत्यं स्त्री सौरभेयी, ताम्।
दयालुः - दया अस्य अस्तीति।

**क्रिया -** जुगोप - गुपू रक्षणे धातु लिट् परस्मैपदी प्रथमपुरुष एकवचनम्।
जुगोप - जुगुपतुः - जुगुपुः।

**४. दिलीपः स्वानुचरान् परावर्तयति।**

**व्रताय तेनानुचरेण धेनो**
**र्न्यषेधि शेषोऽप्यनुयायिवर्गः।**
**न चान्यतस्तस्य शरीररक्षा**
**स्ववीर्यगुप्ता हि मनोः प्रसूतिः।।४।।**

**पदच्छेदः** - तेनानुचरेण - तेन + अनुचरेण।

धेनोर्न्यषेधि - धेनोः + न्यषेधि।

शेषोऽप्यनुयायिवर्गः - शेषः + अपि + अनुयायिवर्गः।

चान्यतस्तस्य - च + अन्यतः + तस्य।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| व्रताय | - | नियमानुष्ठानाय। |
| धेनोः | - | नन्दिन्याः। |
| अनुचरेण | - | सेवकेन |
| तेन | - | दिलीपेन |
| शेषः | - | अवशिष्टः |
| अनुयायिवर्गः अपि | - | अनुचरवर्गः अपि |
| न्यषेधि | - | निवर्तयामास। |
| अस्य | - | राज्ञः |
| शरीररक्षा | - | शरीरस्य रक्षणं |
| अन्यतः न | - | अपरपुरुषेण न करणीयः। |
| हि | - | कुतः इति चेत् |
| मनोः प्रसूतिः | - | मनुवंशजातः |
| स्ववीर्यगुप्ता | - | स्वशक्त्या एव रक्षणीया (भवति) |

**सारः** - धेनोः संरक्षणे कृतनिश्चयः दिलीपः शेषान् अनुयायिवर्गान् अपि प्रतिनिवर्तयामास। यतः मनुवंशजाताः स्ववीर्यगुप्ता एव। स्वशरीरसंरक्षा इतरैः न कर्तव्या।

**अलङ्कारः**- काव्यलिङ्गालङ्कारः। 'समर्थनीयस्यार्थस्य समर्थनं काव्यलिङ्गम्' ।

**विग्रहः** - शरीररक्षा - शरीरस्य रक्षा।

अनुचरः - अनु पश्चात् चरतीति।

**क्रिया** - न्यषेधि - नि षिध् कर्मणि-लङ्-प्र-पु-ए-व।

**५. दिलीपस्य नन्दिनीसेवाप्रकारः।**

**आस्वादवद्भिः कवलैस्तृणानाम्**
**कण्डूयनैर्दंशनिवारणैश्च।**
**अव्याहतैः स्वैरगतैः स तस्याः**
**सम्राट् समाराधनतत्परोऽभूत्।।५।।**

**पदच्छेदः** - कवलैस्तृणानाम् - कवलैः + तृणानाम्।
कण्डूयनैर्दंशनिवारणैश्च - कण्डूयनैः + दंशनिवारणैः + च।
समाराधनतत्परोऽभूत् - समाराधनतत्परः + अभूत्।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| सम्राट् सः | - | चक्रवर्ती स दिलीपः |
| आस्वादवद्भिः | - | स्वादिष्टैः |
| तृणानां कवलैः | - | तृणानां ग्रासैः |
| कण्डूयनैः | - | खर्जनैः |
| दंशनिवारणैः च | - | वनमक्षिकाणां दूरीकरणैः च |
| अव्याहतैः स्वैरगतैः | - | अप्रतिहतैः स्वच्छन्तगमनैः |
| तस्याः | - | धेन्वाः |
| समाराधनतत्परः | - | परिचरणे तत्परः |
| अभूत् | - | अभवत्। |

**सारः** - महाराजः दिलीपः गुरोः वसिष्ठस्य धेनोः परिचरणे दत्तश्रद्धः अभवत्। सः नन्दिन्यै रसयुक्ततृणकबलान् प्रायच्छत्, गात्रं कण्डूययन् मक्षिकान् निवारयत्। धेन्वाः स्वच्छन्दगमने साहाय्यम् अकरोत्। एवं स नन्दिनीम् असेवत।

**विग्रहः** - दंशनिवारणैः - दंशानां निवारणं दंशनिवारणं, तैः।

**क्रिया** - अभूत् - भूधातु-परस्मैपदी-लुङ्-प्रथमपुरुष-एकवचनम्।
अभूत् - अभूताम् - अभूवन्।

**६. दिलीपः छायेव गाम् अन्वगच्छत्।**

**स्थितः स्थितामुच्चलितः प्रयतां**
**निषेदुषीमासनबन्धधीरः।**
**जलाभिलाषी जनमाददानां**
**छायेव तां भूपतिरन्वगच्छत्।।६।।**

**पदच्छेदः** - स्थितामुच्चलितः - स्थिताम् + उच्चलितः।
निषेदुषीमासनबन्धधीरः - निषेदुषीम् + आसनबन्धधीरः।
छायेव - छाया + इव।

भूपतिरन्वगच्छत् - भूपतिः + अन्वगच्छत्।

| **अन्वयः** | | **अन्वयार्थः।** |
|---|---|---|
| भूपतिः | - | राजा |
| तां | - | धेनुं |
| स्थितां स्थितः | - | यदा तिष्ठति तदा तिष्ठन् |
| प्रयाताम् उच्चलितः | - | नन्दिन्यां प्रयातां राजा अपि चलितवान् |
| निषेदुर्षी | - | तस्याम् उपविष्टायां |
| आसनबन्धधीरः | - | आसने उपविष्टः सन्। |
| जलमाददानां | - | जलं पिबन्त्यां |
| जलाभिलाषी | - | जलमभिलषन् |
| (एवं) छाया इव | - | प्रतिबिम्बम् इव |
| अन्वच्छत् | - | अनुजगाम । |

**सारः** - महाराजः दिलीपः नन्दिनीं छाया इव अनुससार। नन्दिन्यां स्थितायां राजा अतिष्ठत्। तस्यां गतायां सोऽपि अगच्छत्, तस्याम् उपविष्टायां सोऽपि उपविवेश, तस्यां जलं पिबन्त्यां सः स्वयं जलाभिलाषी अवर्तत। एवं छाया इव राजा धेनुम् अन्वगच्छत्।

**विग्रहः** - जलाभिलाषी - जलम् अभिलषति इति।

भूपतिः - भुवः पतिः ।

**क्रिया** - अन्वगच्छत् - अनु उपसर्गपूर्वकगम्लृ गतौ धातोः-परस्मैपदि-लङ्-प्रथमपुरुषैकवचनम्।

अन्वगच्छत् - अन्वगच्छताम् - अन्वगच्छन्।

**अलङ्कारः** - उपमालङ्कारः।

**७. दिलीपः राजचिह्नानि परित्यजति।**

**स न्यस्तचिह्नामपि राजलक्ष्मीं**
**तेजोविशेषानुमितां दधानः।**
**आसीदनाविष्कृतदानराजि-**
**रन्तर्मदावस्थ इव द्विपेन्द्रः।।७।।**

**पदच्छेदः** - न्यस्यचिह्नामपि - न्यस्यचिह्नाम् + अपि।

आसीदनाविष्कृतदानराजिः - आसीत् + अनाविष्कृतदानराजिः।

अन्तर्मदावस्थः - अन्तः + मदावस्थः।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| न्यस्तचिह्नामपि | - | उपेक्षितराजचिह्नामपि |
| तेजोविशेषानुमितां | - | प्रभावातिशयेनानुमितां |

| | | |
|---|---|---|
| राजलक्ष्मीं | - | राजैश्वर्यं |
| दधानः | - | धारयन् |
| सः | - | स राजा दिलीपः |
| अनाविष्कृतदानराजिः | - | अप्रकटितमदरेखः। |
| अन्तर्मदावस्थः | - | अन्तर्गतमदावस्थः |
| द्विपेन्द्रः इव | - | गजेन्द्रः इव |
| आसीत् | - | अभवत्। |

**सारः** - दिलीपमहाराजः सर्वाण्यपि राजचिह्नानि उपेक्षितवान्। तथापि तस्य प्रतापातिशयेन राजलक्ष्मीं धारयन् सः अप्रकटीकृतमदरेखः अन्तर्गतमदावस्थः गजश्रेष्ठः इव आसीत्।

**विग्रहः** - न्यस्तचिह्नाम् - न्यस्तानि चिह्नानि यस्याः सा न्यस्तचिह्ना, ताम्।
तेजोविशेषानुमितां - तेजोविशेषेण अनुमिताम्।
राजलक्ष्मीं - राज्ञः लक्ष्मी राजलक्ष्मी, ताम्।

**क्रिया** - आसीत् - अस भुवि धातु परस्मैपदी लङ् प्रथमपुरुषैकवचनम्।
आसीत् - आस्ताम् - आसन्।

**८. अधिज्यधन्वा स दुष्टसत्वानां विनयनं करिष्यन्निव ददर्श।**

**लताप्रतानोद्ग्रथितैः स केशै-**
**रधिज्यधन्वा विचचार दावम्।**
**रक्षापदेशान्मुनिहोमधेनो-**
**र्वन्यान् विनेष्यन्निव दुष्टसत्वान्।।८।।**

**पदच्छेदः** - केशैरधिज्यधन्वा - केशैः + अधिज्यधन्वा।
रक्षापदेशान्मुनिहोमधेनोः - रक्षापदेशात् + मुनिहोमधेनोः।
विनेष्यन्निव - विनेष्यन् +इव।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| लताप्रतानोद्ग्रथितैः | - | वल्लीनां तन्तुभिः बन्धितैः |
| केशैः | - | कुन्दलैः |
| सः | - | राजा |
| अधिज्यधन्वा | - | शस्त्रप्रयोगाय उद्युक्तः |
| मुनिहोमधेनोः | - | मुनेः यागधेनोः नन्दिन्याः |
| रक्षापदेशात् | - | रक्षाव्याजेन |
| वन्यान् | - | वने स्थितान् |
| दुष्टसत्वान् | - | हिंस्रजन्तून् |
| विनेष्यन् इव | - | शिक्षयिष्यन् इव |

| | | |
|---|---|---|
| दावं | - | वनं |
| विचचार | - | सञ्चरितवान्। |

**सारः** - वल्लीनां कुटिलतन्तुभिः बद्धकेशः राजा शस्त्रप्रयोगाय उद्यतः सन् मुनेः होमधेनोः रक्षाव्याजेन वन्यान् क्रूरजन्तून् शिक्षयिष्यन् इव वने सञ्चचार।

**विग्रहः** - लताप्रतानोद्ग्रथितैः - लतानां प्रतानैः उद्ग्रथिताः लताप्रतानोद्ग्रथिताः, तैः।

अधिज्यधन्वा - अधिज्यं धनुः यस्य सः।

**क्रिया** - विचचार – चर् धातोः लिट् प्र-पु-ए-व।

विचचार - विचेरतुः - विचेरुः

**९. पार्श्वद्रुमाः पक्षिणां विरावैः राज्ञः दिलीपस्य जयशब्दमुदीरयामासुः।**

**विसृष्टपार्श्वानुचरस्य तस्य**
**पार्श्वद्रुमाः पाशभृता समस्य।**
**उदीरयामासुरिवोन्मदाना-**
**मालोकशब्दं वयसां विरावैः।।९।।**

**पदच्छेदः** - उदीरयामासुरिवोन्मदानाम् - उदीरयामासुः + इव + उन्मदानाम्।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| विसृष्टपार्श्वानुचरस्य | - | परित्यक्तसेवकवर्गस्य |
| पाशभृता समस्य | - | वरुणेन तुल्यस्य |
| तस्य | - | राज्ञः दिलीपस्य |
| पार्श्वद्रुमाः | - | उभयतः स्थिताः वृक्षाः |
| उन्मदानां | - | उत्कटमदानां |
| वयसां | - | खगानां |
| विरावैः | - | शब्दैः, कूजनैः |
| आलोकशब्दं | - | जयशब्दं |
| उदीरयामासुः इव | - | अवदन् इव। |

**सारः** - परित्यक्तानुचरस्य वरुणतुल्यस्य राज्ञः पार्श्वस्थिताः वृक्षाः तत्रस्थानां पक्षिणां विरावैः जयशब्दमुदीरयन्ति इवासन्।

**विग्रहः** - विसृष्टपार्श्वानुचरस्य - विसृष्टाः पार्श्वानुचराः येन सः विसृष्टपार्श्वानुचरः , तस्य।

पाशभृता - पाशं बिभर्ति इति पाशभृत्, तेन।

पार्श्वद्रुमाः - पार्श्वयोः स्थिताःद्रुमाः।

**क्रिया** - उदीरयामासुः - उत् पूर्वकईर् धातुः लिट् प्र-पु-ब-व।

**अलङ्कारः** - उत्प्रेक्षालङ्कारः - सम्भावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना।

**१०. बाललताः कुसुमैः तमवाकिरन्।**

**मरुत्प्रयुक्ताश्च मरुत्सखाभं**
**तमर्च्यमारादभिवर्तमानम्।**
**अवाकिरन् बाललताः प्रसूनै-**
**राचारलाजैरिव पौरकन्याः।।१०।।**

**पदच्छेदः** - मरुत्प्रयुक्ताश्च - मरुत्प्रयुक्ताः + च।
तमर्च्यमारादभिवर्तमानम् - तम् + अर्च्यम् + आराद् + अभिवर्तमानम्।
प्रसूनैराचारलाजैरिव - प्रसूनैः + आचारलाजैः +इव।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| मरुत्प्रयुक्ताः | - | वायुना प्रेरिताः |
| बाललताः | - | लघुवल्लर्यः |
| आरात् अभिवर्तमानं | - | समीपे स्थितं |
| मरुत्सखाभं | - | अग्नितुल्यशोभं |
| तं | - | तं राजानं |
| प्रसूनैः | - | कुसुमैः |
| आचारलाजैः | - | पूजार्थम् उपयुज्यमानधान्यैः |
| अवाकिरन् इव | - | अर्पयामासुः इव। |

**सारः** - वायुना प्रेरिताः बालवल्लर्यः समीपस्थं अग्निसदृशशोभं राजानं दिलीपं कुसुमैः अर्चयामासुः। पूजार्थम् उपयुज्यमानैः आचारलाजैः अवाकिरन् इव आसीत्।

**विग्रहाः** - मरुत्प्रयुक्ताः - मरुतः प्रयुक्ताः।
मरुत्सखाभं - मरुतः सखा मरुत्सखः, मरुत्सखःइव आभा यस्य सः मरुत्सखाभः, तम्।
आचारलाजैः - आचारार्थं लाजाः आचारलाजाः, तैः।

**क्रिया** - अवाकिरन् - अव पूर्वक कॄ विक्षेपे धातोः परस्मैपदी-लङ्-प्रथमपुरुषः-बहुवचनम्।
अवाकिरत् - अवाकिरताम् - अवाकिरन्। -

## पुनरावृत्तिः (Recap)

- सुदक्षिणया अर्चितां धेनुं राजा वनाय मोचयामास।
- नन्दिन्याः खुरन्यासेन पवित्रीकृतं मार्गं राज्ञः धर्मपत्नी अनुससार।
- राजा दयितां निवर्त्य गोरूपधरां भूमिम् इव वर्तमानां गाम् अरक्षत्।
- ततः सः अन्यान् अनुचरवर्गानपि निवर्तयामास। यतः मनुवंशीयाः स्ववीर्यगुप्ताः भवन्ति।
- धेनोः शुश्रूषायां दत्तश्रद्धः आसीत्दिलीपः।

- यानि यानि कार्याणि नन्दिनी करोति, तानि तानि राजापि कृतवान्।
- छाया इव राजा धेनुमनुससार।
- उपेक्षितराजचिह्नोऽपि स दिलीपः प्रतापातिशयेन गजश्रेष्ठः इव विराजमानः आसीत्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. धेनुमृषेर्मुमोच - कः?
२. जुगोप गोरूपधरामिवोर्वीम् - कां जुगोप?
३. राजा कदा धेनुं मुमोच?
४.अधिज्यधन्वा राजा कुत्र विचचार?
५. का इव राजा धेनुमनुससार?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।
## (Answer the following questions in one or two sentences)

१. सुदक्षिणा धेनोः मार्गम् अन्वगच्छत् - कथम्?
२. तेजो विशेषानुमितां दधानः - कः? कां दधानः?
३. न्यषेधिशेषोऽप्यनुयायिवर्गः - केन? कुतः?
४. छायेव तामन्वगच्छत् - कः? काम्? कथम्?

**निर्देशानुसारमुत्तरत।**

**I. विग्रहणीत।**
क. यशोधनः।
ख. अपांसुलानाम्।
ग. सौरभेयीम्।
घ. अनुचरः
ङ. मरुत्प्रयुक्तः।

**II. पदच्छेदं कुरुत।**
क. श्रुतेरिवार्थम्।
ख. इवोर्वीम्।
ग. तेनानुचरेण।
घ. तत्परोऽभूत्।

## निर्दिष्टाभ्यासः (Assignments)

१. दिलीपस्य धेनुपरिचरणं विशदयत।
२. कालिदासस्य रघुवंशे तृतीयसर्गे प्रथमाः पञ्चश्लोकाः सविस्तरं पठन्तु

## उत्तराणि (Answer to Objective type questions)

१. दिलीपः।
२. नन्दिनीम्।
३. प्रभाते।
४. वने।
५. छाया।

## अधिकवाचनाय ग्रन्थाः (Suggested Readings)


१. कालिदासः, रघुवंशमहाकाव्यम्, सर्गः द्वितीयः, व्याख्या पि.के.रामचन्द्र अय्यर्, आर्.एस्.वाध्यार् आन्ड् सन्स्, कल्पात्ति, पालक्काट्,२०१३।
२. कालिदासः, रघुवंशमहाकाव्यम्, व्याख्या,कुट्टिकृष्णमारार्, मातृभूमि पब्लिक्केषन्स्, कोट्टयम्।
३. कालिदासः, रघुवंशमहाकाव्यम्,हिंदी टीका, श्रीब्रह्मशङ्करमिश्रः साहित्यशास्त्री.चौखम्बा संस्कृतसीरीज़ बनारस।

# Unit - 2

## ११-२० श्लोकाः।

### उद्देश्यानि (Learning Outcomes)

- पद्यं (श्लोकं) यतितालानुसारम् आलपति।
- महाकविं कालिदासं, तस्य ग्रन्थान् च परिचिनोति।
- महाकाव्येषु रघुवंशस्य प्राधान्यं जानाति।
- आधुनिकं भरणाधिकारिणं प्रति तुलनां करोति।
- काव्यरसानुभूतिं अनुभूयते।
- अलङ्कारप्रयोगे, विशिष्य उपमालङ्कारप्रयोगे कालिदासस्य अनितरसाधारणीं प्रतिभां अवगच्छति।
- नूतनपदावलीं वर्धयति।
- आशयावगतिः जायते।

### प्राग्व्यपेक्षाः (Prerequisites)

महाकवेः कालिदासस्य रघुवंशे द्वितीयसर्गे राजा दिलीपः कुलगुरोः वसिष्ठस्य आश्रमम् उपेत्य कामधेनुसुतां नन्दिनीं परिसेवितुम् आरब्धवान्। यदा नन्दिनी निद्रां प्राप तदा कुशम् आस्तीर्य तस्या सकाशं शेतवान् आसीत्। अतिप्रभाते महर्षिशिष्याणां मन्त्रोच्चारणध्वनिमाकर्ण्य सुप्तोत्थितः महाराजः भूयोऽपि तस्याः परिचरणे श्रद्धावान् आसीत्। तादृशं राजानं अत्र कविः वर्णयति।

### मुख्यपदानि (Keyterms)

धनुर्भृतः, मारुतपूर्णरन्ध्रैः, पृक्तः, दवाग्निः, पल्लवरागताम्रा, अन्वग्ययौ, गृष्टिः।

### Discussion

**११. हरिण्यः विश्वस्ताः राजानमवलोकयन्त्यः तस्थुः।**

**धनुर्भृतोऽप्यस्य दयार्द्रभाव-**<br>
**माख्यातमन्तःकरणैर्विशङ्कैः।**<br>
**विलोकयन्त्यो वपुरापुरक्ष्णां**<br>
**प्रकामविस्तारफलं हरिण्यः।।११।।**

**पदच्छेदः** - धनुर्भृतोऽप्यस्य - धनुर्भृतः + अपि + अस्य।

वपुरापुरक्ष्णां - वपुः + आपुः + अक्ष्णाम्।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| धनुर्भृतः अपि | - | चापधारिणः अपि |
| अस्य | - | दिलीपस्य |
| विशङ्कैः | - | संशयविहीनैः |
| अन्तःकरणैः | - | मनोभिः |
| दयार्द्रभावं | - | करुणार्द्रभावं |
| आख्यातं | - | प्रकटितं |
| वपुः | - | शरीरं |
| विलोकयन्त्यः | - | दर्शयन्त्यः |
| हरिण्यः | - | मृग्यः |
| अक्ष्णां | - | नेत्राणां |
| प्रकामविस्तारफलं | - | अत्यन्तविशालफलं |
| आपुः | - | प्रापुः। |

**सारः** - धनुर्धरस्यापि दिलीपस्य शङ्काविहीनैः मनोभिः प्रकटितं करुणार्द्रभावं विलोकयन्त्यः मृग्यः नयनानां सायूज्यम् प्राप्तवन्तः अभूवन्।

**विग्रहः** - धनुर्भृतः - धनुः विभर्ति इति धनुर्भृत्, तस्य।

दयार्द्रभावम् - दयया आर्द्रः भावः यस्य तत्।

विशङ्कैः - विगता शङ्का येषां ते विशङ्काः, तैः।

**क्रिया** - आपुः - आप्लृ गतौ धातु परस्मैपदी-लिट्-प्रथमपुरुषः-एकवचनम्।

आप - आपतुः - आपुः।

**१२. वनदेवताभिः गीयमानमात्मनो यशः श्रृण्वन्नगच्छत्।**

**स कीचकैर्मारुतपूर्णरन्ध्रैः**
**कूजद्भिरापादितवंशकृत्यम्।**
**शुश्राव कुञ्जेषु यशः स्वमुच्चै-**
**रुद्गीयमानं वनदेवताभिः।।१२।।**

**पदच्छेदः** - कीचकैर्मारुतपूर्णरन्ध्रैः - कीचकैः + मारुतपूर्णरन्ध्रैः।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| सः | - | स राजा |
| मारुतपूर्णरन्ध्रैः | - | वायुना पूरितद्वारैः |
| कूजद्भिः | - | कूजनं कुर्वद्भिः |

| | | |
|---|---|---|
| कीचकैः | - | वेणुभिः |
| आपादितवंशकृत्यं | - | सम्पादितवंशानुचरितम् |
| कुञ्जेषु | - | लतानिकुञ्जेषु |
| वनदेवताभिः | - | अरण्यदेवताभिः |
| उच्चैः | - | उच्चम् |
| उद्गीयमानं | - | स्तूयमानं |
| स्वं यशः | - | स्वस्य कीर्तिं |
| शुश्राव | - | श्रुतवान्। |

**सारः** - वने विचरन् स राजा वायुना पूरितरन्ध्रद्वारा कूजद्भिः वेणुभिः सम्पादितवंशकृत्ये लतानिकुञ्जेषु आसीनाभिः वनदेवताभिः उच्चैः गीयमानं स्वं यशः श्रुतवान्। (वायुः वेणुनादम् उत्पादयति, वनदेवताः दिलीपकीर्तिं गायन्ति)

**विग्रहः** - मारुतपूर्णरन्ध्रैः - मारुतेन पूर्णानि रन्ध्राणि मारुतपूर्णरन्ध्राणि, तैः।

**१३. पवनः क्लान्तं राजानं सिषेवे।**

**पृक्तस्तुषारैर्गिरिनिर्झराणा-**
**मनोकहाकम्पितपुष्पगन्धी।**
**तमातपक्लान्तमनातपत्र-**
**माचारपूतं पवनः सिषेवे।।१३।।**

**पदच्छेदः** - पृक्तस्तुषारैर्गिरिनिर्झराणां - पृक्तः + तुषारैः + गिरिनिर्झराणाम्।
तमातपक्लान्तमनातपत्रं - तम् + आतपक्लान्तम् + अनातपत्रम्।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| गिरिनिर्झराणां | - | पर्वतवारिप्रवाहाणां |
| तुषारैः | - | शीकरैः |
| पृक्तः | - | संपृक्तः |
| अनोकहाकम्पितपुष्पगन्धी | - | वृक्षाणां चलनेन जातकुसुमगन्धो |
| पवनः | - | वायुः |
| अनातपत्रं | - | आतपत्ररहितं |
| आतपक्लान्तं | - | आतपेन क्षीणितं |
| आचारपूतं | - | आचारेण पवित्रं |
| तं | - | दिलीपं |
| सिषेवे | - | सेवितवान्। |

**सारः** - गिरिनिर्झरप्रवाहशीकरैः वृक्षाणां कम्पनेन जातकुसुमगन्धेन वायुः आतपत्ररहितं आतपेन क्लान्तं आचारेण पवित्रं च राजानं सेवितवान्।

**विग्रहः** - गिरिनिर्झराणां - गिरिषु निर्झराः गिरिनिर्झराः, तेषाम्।

अनोहाकम्पितपुष्पगन्धी - अनोकहानां आकम्पितानि पुष्पाणि
अनोकहाकम्पितपुष्पाणि। तेषां गन्धः अस्य अस्तीति।
आचारपूतं - आचारेण पूतम्।
अनातपत्रम् - न विद्यते आतपत्रं यस्य सः, तम्।

**क्रिया** - सिषेवे - षिव् सेवने आत्मनेपदी लिट् प्रथमपुरुषः एकवचनम्।
सिषेवे - सिषेवाते - सिषेविरे।

**१४. गोप्तरि वनं प्रविश्यमाने सर्वं शान्तमभवत्।**

**शशाम वृष्ट्यापि विना दवाग्नि-**
**रासीद्विशेषा फलपुष्पवृद्धिः।**
**ऊनं न सत्वेष्वधिको बबाधे**
**तस्मिन्वनं गोप्तरि गाहमाने।।१४।।**

**पदच्छेदः** - वृष्ट्यापि - वृष्ट्या + अपि।
दवाग्निरासीद्विशेषा - दवाग्निः + आसीत् + विशेषा।
सत्वेष्वधिकः - सत्वेषु + अधिकः।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| गोप्तरि | - | राज्ञि तस्मिन् |
| वनं गाहमाने | - | वनं प्रविशति सति |
| वृष्ट्या विनापि | - | वृष्टिराहित्येऽपि |
| दवाग्निः | - | वनाग्निः |
| शशाम | - | शमितवान्। |
| फलपुष्पवृद्धिः | - | फलपुष्पाणाम् अभिवृद्धिः |
| विशेषा आसीत् | - | अतिशायिता अभवत्। |
| सत्वेषु अधिकः | - | जन्तुषु मध्ये प्रबलः |
| ऊनं | - | दुर्बलं |
| न बबाधे | - | न अपीडयत्। |

**सारः** - यदा राजा वनं प्राविशत्, तदा वृष्ट्या विना वनाग्निः शशाम। फलपुष्पाणां अभिवृद्धिः अतिशायितः आसीत्। व्याघ्रादयः प्रबलाः जन्तवः दुर्बलान् हरिणादीन् नापीडयन्।

**विग्रहः** - फलपुष्पवृद्धिः - फलानां पुष्पाणां च वृद्धिः।

**क्रिया** - शशाम - शम शमने धातु परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।
शशाम - शेमतुः - शेमुः।

**२५. दिनान्ते धेनुः निलयाय गन्तुं प्रचक्रमे।**

**सञ्चारपूतानि दिगन्तराणि**
**कृत्वा दिनान्ते निलयाय गन्तुम्।**
**प्रचक्रमे पल्लवरागताम्रा**
**प्रभा पतङ्गस्य मुनेश्च धेनुः।।१५।।**

**पदच्छेदः** - मुनेश्च - मुनेः+ च।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| पल्लवरागताम्रा | - | नवपल्लवस्य रागवर्ण इव अरुणा |
| पतङ्गस्य प्रभा | - | सूर्यस्य कान्तिः |
| मुनेः | - | वसिष्ठस्य |
| धेनुः च | - | नन्दिनी च |
| दिगन्तराणि | - | दिशः अन्तराणि |
| सञ्चारपूतानि | - | सञ्चारेण पवित्रीभूतानि |
| कृत्वा | - | विधाय |
| दिनान्ते | - | दिनावसाने |
| निलयाय गन्तुं | - | आलयगमनाय |
| प्रचक्रमे | - | उद्यतः अभूत्। |

**सारः** - नूतनपल्लवस्य वर्ण इव प्रशोभमाना सूर्यप्रभा तथा यागधेनुः नन्दिनी च सञ्चारेण दिशः पवित्रीकृत्य सायंकाले निलयाय गन्तुं प्रचक्रमे।

**विग्रहः** - पल्लवरागताम्रा - पल्लवस्य राग इव रागः ताम्रः च।
दिगन्तराणि - दिशाम् अन्तराणि।
सञ्चारपूतानि - सञ्चारेण पूतानि।

**क्रिया** - प्रचक्रमे - प्र इत्युपसर्गपूर्वक क्रमु पादविक्षेपे धातुः आत्मनेपदी लिट् प्रथमपुरुषः एकवचनम्।
प्रचक्रमे - प्रचक्रमाते - प्रचक्रमिरे
प्रचक्रमे इत्यत्र प्र पूर्वक क्रम् धातोः आत्मनेपदित्वं लभते।

**अलङ्कारः** - दीपकालङ्कारः (वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः)

**१६. राजा तां नन्दिनीम् अनुययौ।**

**तां देवतापित्रतिथिक्रियार्था-**
**मन्वग्ययौ मध्यमलोकपालः।**
**बभौ च सा तेन सतां मतेन**
**श्रद्धेव साक्षाद्विधिनोपपन्ना।।१६।।**

**पदच्छेदः** - श्रद्धेव - श्रद्धा + इव।

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| मध्यमलोकपालः | - | भूलोकपालो दिलीपः |
| देवतापित्रतिथिक्रियार्थाम् | - | देवतानां पितॄणां अतिथीनां च क्रियार्थं |
| तां | - | नन्दिनीं |
| अन्वग्ययौ | - | अन्वगच्छत्। |
| सतां मतेन | - | सज्जनसम्मतेन |
| तेन | - | दिलीपेन |
| उपपन्ना सा (सतां मतेन) | - | युक्ता सा नन्दिनी |
| विधिना | - | अनुष्ठानेन (युक्ता) |
| साक्षात् | - | यथार्थतः |
| श्रद्धा इव बभौ | - | श्रद्धा इव शुशुभे। |

**सारः** - भूलोकपालो दिलीपः देवतापित्रादीनां क्रियार्थां नन्दिनीं अन्वगच्छत्। सज्जनसम्मतेन दिलीपेन सह सा नन्दिनी सतां मतेन विधिना युक्ता यथार्थतः श्रद्धा इव शुशुभे।

**विग्रहः** - मध्यमलोकपालः - मध्यमः लोकः मध्यमलोकः मध्यमलोकं पालयतीति मध्यमलोकपालः।

**क्रिया** - अन्वग्ययौ - अन्वक् (अव्ययपूर्वक) या प्रापणे धातु परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।
अन्वग्ययौ - अन्वग्ययतुः - अन्वग्ययुः।

**अलङ्कारः** - उत्प्रेक्षालङ्कारः।

**१७. दिलीपः श्यामायमानानि वनानि पश्यन् ययौ।**

**स पल्वलोत्तीर्णवराहयूथा-**
**न्यावासवृक्षोन्मुखबर्हिणानि।**
**ययौ मृगाध्यासितशाद्वलानि**
**श्यामायमानानि वनानि पश्यन्।।१७।।**

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| सः | - | स राजा |
| पल्वलोत्तीर्णवराहयूथानि | - | अल्पजलाशयेभ्यः निर्गच्छतः वराहसमूहान् |
| आवासवृक्षोम्नुखबर्हिणानि | - | वासवृक्षोन्मुखान् मयूरान् |
| मृगाध्यासितशाद्वलानि | - | मृगैः अध्यासितहरिततृणप्रदेशान् |
| श्यामायमानानि वनानि | - | श्यामीकृतानि काननानि (च) |
| पश्यन् ययौ | - | दृश्यमानः अगच्छत्। |

**सारः** - महाराजः अल्पजलाशयेभ्यः निर्गतान् सूकरजालान् वासवृक्षोन्मुखान् मयूरान् हरितप्रदेशस्थान् हरिणान् श्यामीकृतानि काननानि च दृश्यमानः सन् अगच्छत्।

**विग्रहः** - पल्वलोत्तीर्णवराहूथानि - पल्वलेभ्यः उत्तीर्णानि वराहाणां यूथानि, येषु तानि।
मृगाध्यासितशाद्वलानि - मृगैः अध्यासिताः शाद्वलाः येषु तानि।
ययौ इति क्रियां पूर्वश्लोकेन अन्वेति।

**१८. उभौ गताभ्यां तपोवनावृत्तिपथं अलञ्चक्रतुः।**

**आपीनभारोद्वहनप्रयत्नात्**
**गृष्टिर्गुरुत्वाद्वपुषो नरेन्द्रः।**
**उभावलञ्चक्रतुरञ्चिताभ्यां**
**तपोवनावृत्तिपथं गताभ्याम्।।१८।।**

**पदच्छेदः** - गृष्टिर्गुरुत्वाद्वपुषो - गृष्टिः + गुरुत्वात् + वपुषः।
उभावलञ्चक्रतुरञ्चिताभ्यां - उभौ + अलंचक्रतुः + अञ्चिताभ्याम्।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| आपीनभारोद्वहनप्रयत्नात् | - | ऊधसः भारवहनप्रयत्नात् |
| गृष्टिः | - | गौः नन्दिनी |
| वपुषः | - | शरीरस्य |
| गुरुत्वात् | - | भारवत्वात्, आधिक्यात् |
| नरेन्द्रः | - | राजा (च) |
| उभौ | - | नन्दिनीदिलीपौ |
| अञ्चिताभ्यां | - | मनोज्ञाभ्यां |
| गताभ्यां | - | गमनाभ्याम् |
| तपोवनावृत्तिपथं | - | तपोवनप्रत्यागमनमार्गम् |
| अलञ्चक्रतुः | - | भूषितवन्तौ। |

सारः - ऊधसः भारत्वात् नन्दिनी, शरीरस्य गुरुत्वात् राजा च उभौ मनोज्ञाभ्यां गताभ्यां तपोवनप्रत्यागमनमार्गम् अलञ्चक्रतुः।

**विग्रहः** - नरेन्द्रः - नरेषु इन्द्रः।
तपोवनावृत्तिपथं - तपोवनं प्रति आवृत्तेः पन्थानम्।

**क्रिया** - अलञ्चक्रतुः - अलं पूर्वक डुकृञ् करणे धातु परस्मैपदी लिट् प्रथमपुरुषद्विवचनम्।
अलञ्चकार - अलञ्चक्रतुः - अलञ्चक्रुः।

**१९. वनान्तादावर्तमानं तं सुदक्षिणा अतितृष्णया व्यलोकयत्।**

**वसिष्ठधेनोरनुयायिनं त-**
**मावर्तमानं वनिता वनान्तात्।**
**पपौ निमेषालसपक्ष्मपङ्क्ति-**
**रुपोषिताभ्यामिव लोचनाभ्याम्।।१९।।**

**पदच्छेदः** - वसिष्ठधेनोरनुयायिनम् - वसिष्ठधेनोः + अनुयायिनम्।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| वसिष्ठधेनोः | - | वसिष्ठस्य होमधेनोः |
| अनुयायिनं | - | अनुचरं |
| वनान्तात् आवर्तमानं | - | वनान्तात् प्रत्यागच्छन्तं |
| तं | - | राजानं |
| वनिता | - | सुदक्षिणा |
| निमेषालसपक्ष्मपङ्क्तिः | - | निर्निमेषपक्ष्मपङ्क्तिः सती |
| उपोषिताभ्याम् इव | - | कृतोपवासाभ्याम् इव |
| लोचनाभ्यां | - | नयनाभ्यां |
| पपौ | - | पीतवती। |

**सारः** - वसिष्ठस्य यागधेनोः नन्दिन्याः अनुचरं वनात् प्रत्यागतं राजानं सुदक्षिणा निर्निमेषा सती दृष्टवती।

**विग्रहः** - निमेषालसपक्ष्मपङ्क्तीः - निमेषेषु अलसा पक्ष्मणां पङ्क्तिः यस्याः सा।

**अलङ्कारः** - उत्प्रेक्षालङ्कारः । (उपोषिताभ्यामिव)

**क्रिया** - पपौ - पा पाने-पर-लिट्-प्र-पु-ए-व।

पपौ - पपतुः - पपुः।

**२०. सुदक्षिणा धेनुं प्रत्युद्ययौ।**

**पुरस्कृता वर्त्मनि पार्थिवेन**
**प्रत्युद्गता पार्थिवधर्मपत्न्या।**
**तदन्तरे सा विरराज धेनु-**
**र्दिनक्षपामध्यगतेव सन्ध्या।।२०।।**

**पदच्छेदः** - दिनक्षपामध्यगतेव - दिनक्षपामध्यगता + इव।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| वर्त्मनि | - | मार्गे |
| पार्थिवेन | - | राज्ञा |
| पुरस्कृता | - | पुरतः कृता |
| पार्थिवधर्मपत्न्या | - | राज्ञः धर्मपत्न्या सुदक्षिणया |
| प्रत्युद्गता | - | स्वीकृता |
| सा धेनुः | - | नन्दिनी |
| तदन्तरे | - | तयोः सुदक्षिणदिलीपयोः मध्ये |
| दिनक्षपामध्यगता | - | दिनरात्र्योः मध्ये स्थिता |
| सन्ध्या इव | - | सायम् इव |
| विरराज | - | शुशुभे। |

**सारः** - मार्गे राज्ञः पुरतः गच्छती, राजपत्न्या स्वीकृता च नन्दिनी सुदक्षिणादिलीपयोः मध्ये दिवसरजन्योः मध्यगता सन्ध्या इव अशोभत।

**विग्रहः** - पार्थिवधर्मपत्न्या - पार्थिवस्य धर्मपत्नी पार्थिवधर्मपत्नी, तया।

**क्रिया** - विरराज - वि + राजृ दीप्तौ-पर-लिट्-प्र पु-ए व।
विरराज - विरेजतुः - विरेजुः।

## पुनरावृत्तिः(Recap)

- दिलीपदर्शनेन आश्रमस्थाः मृग्यः नयनानां सायुज्यं प्राप्तवन्तः अभुवन्।
- दिलीपः वनदेवतानां गानैःस्वं यशः श्रुतवान्।
- वसिष्ठाश्रमे प्रबलाः जन्तवः दुर्बलान् हरिणादीन् नापीडयन्।
- नन्दिनी सञ्चारेण दिशः पवित्रीकरोति।
- सुदक्षिणा निर्निमेशा प्रत्यागच्छन्तं राजानं दृष्टवती।
- दिवसरजन्योः मध्यगता सन्ध्या इव नन्दिनी अशोभत।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. काः नयनानां सायुज्यं प्राप्तवन्तः अभूवन्?
२. कः स्वं यशः श्रुतवान्?
३. नन्दिनी केन दिशः पवित्रीकरोति?
४. नन्दिनी राजा च किम् अलञ्चक्रतुः?
५. नन्दिनी कस्य यागधेनुः अस्ति?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

## (Answer the following questions in one or two sentences)

१. मृग्यः किं विलोकयन्त्यः नयनानां सायुज्यं प्राप्तवन्तः अभूवन्?
२. कीदृशः वायुः राजानं सेवितवान्?
३. वनाग्निः कदा शशाम?

## निर्दिष्टाभ्यासः (Assignments)

१. पाठान्तर्गतानां श्लोकानां आशयं लिखत।
२. कालिदासस्य रघुवंशमहाकाव्ये तृतीयसर्गे वर्तमानं षट्श्लोकादारभ्य पञ्चदशश्लोकपर्यन्तं भागं पठन्तु।

## उत्तराणि (Answer to Objective type questions)

१. मृग्यः ।
२. दिलीपः ।
३. सञ्चारेण ।
४. तपोवनप्रत्यागमनमार्गम्।
५. वसिष्ठस्य।

## अधिकवाचनाय ग्रन्थाः (Suggested Readings)


१. कालिदासः, रघुवंशमहाकाव्यम्, सर्गः द्वितीयः, व्याख्या टि.के.रामचन्द्र अय्यर्, आर्.एस्.वाध्यार् आन्ड् सन्स्,कल्पात्ति, पालक्काट्,२०१३।
२. कालिदासः, रघुवंशमहाकाव्यम्, व्याख्या,कुट्टिकृष्णमारार्, मातृभूमि पब्लिक्केषन्स्, कोट्टयम्।
३. कालिदासः, रघुवंशमहाकाव्यम्,हिंदी टीका, श्रीब्रह्मशङ्करमिश्रः साहित्यशास्त्री.चौखम्बा संस्कृतसीरीज़ बनारस।

# Unit - 3

## २१-३० श्लोकाः।

### उद्देश्यानि (Learning Outcomes)

- पद्यं (श्लोकं) यतितालानुसारम् आलपति।
- महाकाव्येषु रघुवंशस्य प्राधान्यं जानाति।
- आधुनिकं भरणाधिकारिणं प्रति तुलनां करोति।
- काव्यरसानुभूतिं अनुभूयते।
- अलङ्कारप्रयोगे, कालिदासस्य प्रतिभां जानाति।
- नूतनपदावलीं वर्धयति।
- आशयावगतिः जायते।

### प्राग्व्यपेक्षाः (Prerequisites)

महाकवेः कालिदासस्य रघुवंशे द्वितीयसर्गेराजा दिलीपः कुलगुरोः वसिष्ठस्य आश्रमम् उपेत्य कामधेनुसुतां नन्दिनीं परिसेवितुम् आरब्धवान्। यदा नन्दिनी निद्रां प्राप तदा कुशम् आस्तीर्य तस्या सकाशं शेतवान् आसीत्। अतिप्रभाते महर्षिशिष्याणां मन्त्रोच्चारणध्वनिमाकर्ण्य सुप्तोत्थितः महाराजः भूयोऽपि तस्याः परिचरणे श्रद्धावान् आसीत्। नन्दिनीपरिचरणम् अत्र वर्णयति।

### मुख्यपदानि (Keyterms)

सुदक्षिणा, प्रदक्षिणीकृत्य, सपर्यां, प्रसादचिह्नानि, दोहावसाने, महनीयकीर्तिः, गुहा, धातुमय्याम्।

### Discussion

**२१. सुदक्षिणा नन्दिनीं नमस्कृत्यार्चयामास।**

**प्रदक्षिणीकृत्य पयस्विनीं तां**
**सुदक्षिणा साक्षतपात्रहस्ता।**
**प्रणम्य चानर्च विशालमस्याः**
**श्रृङ्गान्तरं द्वारमिवार्थसिद्धेः।।२१।।**

**पदच्छेदः** - चानर्च - च + आनर्च।

इवार्थसिद्धेः - इव +अर्थसिद्धेः

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| साक्षतपात्रहस्ता | - | अक्षतपात्रं हस्ते गृहीता |
| सुदक्षिणा | - | राज्ञी सुदक्षिणा |
| पयस्विनीं तां | - | तां धेनुं |
| प्रदक्षिणीकृत्य | - | प्रदक्षिणं कृत्वा |
| प्रणम्य च | - | नमस्कृत्य च |
| अस्याः | - | नन्दिन्याः |
| विशालं | - | विस्तृतं |
| श्रृङ्गान्तरं | - | विषाणयोः मध्यं |
| अर्थसिद्धेः | - | उद्दिष्टकार्यसिद्धेः |
| द्वारम् इव | - | प्रवेशनमार्गम् इव |
| आनर्च | - | अर्चितवती। |

**सारः** - दिलीपपत्नी सुदक्षिणा अक्षतपात्रं हस्ते गृहीत्वा पयस्विनीं तां धेनुं प्रदक्षिणीकृत्य नमस्कृत्य च तस्याः विशालं श्रृङ्गान्तरं उद्दिष्टकार्यसिद्धेः मार्गमिव पूजयामास।

**विग्रहः** - पयस्विनीं - प्रशस्तः पयः अस्याः अस्तीति पयस्विनी, ताम्।

**अलङ्कारः** - उत्प्रेक्षा - (अर्थसिद्धेः द्वारमिव)

**क्रिया** - आनर्च - अर्च पूजायां लिट्-पर-प्र-पु-ए-व।

आनर्च - आनर्चतुः - आनर्चुः।

**२२. धेनुः वत्सोत्सुकापि स्तिमिता पूजां स्वीकृतवती।**

**वत्सोत्सुकापि स्तिमिता सपर्यां**
**प्रत्यगृहीत्सेति ननन्दतुस्तौ।**
**भक्त्योपपन्नेषु हि तद्विधानां**
**प्रसादचिह्नानि पुरः फलानि।।२२।।**

**पदच्छेदः** - सेति - सा +इति।

ननन्दतुस्तौ - ननन्दतुः + तौ।

भक्त्योपपन्नेषु - भक्त्या + उपपन्नेषु।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| सा | - | सा धेनुः नन्दिनी |
| वत्सोत्सुका अपि | - | वत्सं द्रष्टुम् उत्सुका अपि |
| स्तिमिता सती | - | निश्चला सती |
| सपर्यां | - | पूजां |
| प्रत्यग्रहीत् | - | स्वीकृतवती |

| | | |
|---|---|---|
| इति | - | इत्यतः |
| तौ ननन्दतुः | - | तौ दम्पती आनन्दं प्रापतुः |
| भक्त्या उपपन्नेषु | - | भक्त्या युक्तेषु |
| तद्विधानां | - | तत्सदृशानां (नन्दिनीतुल्यानां) |
| प्रसादचिह्नानि | - | प्रसन्नताचिह्नानि |
| पुरःफलानि हि | - | पुरतः सत्फलानि भविष्यन्ति इति सूचयति। |

**सारः** - सा नन्दिनी वत्से उत्कण्ठिता अपि निश्चला सती पूजां स्वीकृतवती इति तौ दम्पती ननन्दतुः। भक्त्या उपपन्नेषु प्रसादचिह्नानि अचिरेणैव फलसिद्धिः भविष्यति इति सूचयति।

**विग्रहः** - वत्सोत्सुका - वत्से उत्सुका। प्रसादचिह्नानि - प्रसादस्य चिह्नानि।

**अलङ्कारः** - अर्थान्तरन्यासः। उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः।

**क्रिया** - ननन्दतुः नन्द् समृद्धौ धातु-पर-लिट्-प्र-पु-द्वि-व।

ननन्द - ननन्दतुः - ननन्दुः।

**२३.सन्ध्याविधिं समाप्य राजा पुनरपि धेनुं भेजे।**

**गुरोः सदारस्य निपीड्य पादौ**
**समाप्य सान्ध्यं च विधिं दिलीपः।**
**दोहावसाने पुनरेव दोग्ध्रीं**
**भेजे भुजोच्छिन्नरिपुर्निषण्णाम्।।२३।।**

**पदच्छेदः** - पुनरेव - पुनः + एव।

भुजोच्छिन्नरिपुर्निषण्णाम् - भुजोच्छिन्नरिपुः + निषण्णाम्।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| भुजोच्छिन्नरिपुः | - | भुजबलेन रुद्धशत्रुः |
| दिलीपः | - | राजा दिलीपः |
| सदारस्य | - | पत्न्या सहितस्य |
| गुरोः पादौ | - | गुरोः वसिष्ठस्य पादौ |
| निपीड्य | - | अभिवन्द्य |
| सान्ध्यं विधिं च | - | सन्ध्याविधिं च |
| समाप्य | - | परिसमाप्य |
| दोहावसाने | - | दोहनावसाने |
| निषण्णाम् | - | उपविष्टाम् |
| दोग्ध्रीं | - | दोहनशीलां धेनुं |
| पुनः एव | - | भूयोऽपि |

भेजे - असेवत।

**सारः** - महाबाहुः पराक्रमशाली शत्रुनाशकः च राजा दिलीपः पत्न्या सह गुरुं वसिष्ठं नमस्कृत्य सन्ध्याकर्माणि परिसमाप्य च दोहनानन्तरम् उपविष्टां नन्दिनीं भूयोऽपि असेवत।

**विग्रहः** - सदारस्य - दारैः सह वर्तते इति सदारः, तस्य।

**क्रिया** - भेजे - भज् सेवायां धातु-आत्मनेपदी-लिट्-प्रथमपुरुषः-एकवचनम्।
भेजे - भेजाते - भेजिरे।

**२४. राजा सुप्तां तामनुसंविवेश, सुप्तोत्थितामनूदतिष्ठत्।**

**तामन्तिकन्यस्तबलिप्रदीपा-**
**मन्वास्य गोप्ता गृहिणीसहायः।**
**क्रमेण सुप्तामनुसंविवेश**
**सुप्तोत्थितां प्रातरनूदतिष्ठत्।।२४।।**

**पदच्छेदः** - तामन्तिकन्यस्तबलिप्रदीपाम् - ताम् + अन्तिकन्यस्तबलिप्रदीपाम्।
सुप्तामनुसंविवेश - सुप्ताम् + अनुसंविवेश।
प्रातरनूदतिष्ठत् - प्रातः + अनूदतिष्ठत्।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| गोप्ता | - | रक्षिता |
| गृहिणीसहायः | - | पत्नीसहितः |
| अन्तिकन्यस्तबलिप्रदीपां | - | समीपे स्थापितदीपयुक्तां |
| ताम् | - | नन्दिनीं |
| अन्वास्य | - | अनुपविश्य |
| क्रमेण सुप्तां | - | क्रमेण नन्दिन्यां सुप्तायां |
| अनुसंविवेश | - | पश्चात् सुप्तः अभवत् |
| प्रातः | - | प्रभाते |
| सुप्तोत्थिताम् | - | सुषुप्त्यनन्तरम् उत्थिताम् |
| अनूदतिष्ठत् | - | उदतिष्ठत्। |

**सारः** - पत्नीसहायः दिलीपः समीपस्थां दीपयुक्तां नन्दिनीम् अनूपविश्य क्रमेण नन्दिन्यां सुप्तायां पश्चात् सुप्तः अभवत्। प्रभाते नन्दिन्याम् उत्थितायां राजापि उदतिष्ठत्।

**विग्रहः** - गृहिणीसहायः - गृहिणी सहायः यस्य सः।
सुप्तोत्थिताम् - पूर्वं सुप्तः ततः उत्थिता, ताम्।
गोप्ता - गोपयितुं शीलम् अस्य इति।

**क्रिया** - उदतिष्ठत् - उत् + स्था धातु परस्मैपदी-लङ्-प्रथमपुरुषः-एकवचनम्।
उदतिष्ठत् - उदतिष्ठताम् - उदतिष्ठन्।

२५. एवं व्रतमनुष्ठितः एकविंशति दिनानि व्यतीयुः।

**इत्थं व्रतं धारयतः प्रजार्थं**
**समं महिष्या महनीयकीर्तेः।**
**सप्त व्यतीयुस्त्रिगुणानि तस्य**
**दिनानि दीनोद्धरणोचितस्य।।२५।।**

**पदच्छेदः** - व्यतीयुस्त्रिगुणानि - व्यतीयुः + त्रिगुणानि।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| इत्थं | - | एवं प्रकारेण |
| प्रजार्थं | - | पुत्रलाभाय |
| महिष्या समं | - | पत्न्या सह |
| व्रतं धारयतः | - | नियमं धारयतः |
| महनीयकीर्तेः | - | उदारकीर्तेः |
| दीनोद्धरणोचितस्य | - | दीनानां रक्षणे तत्परस्य |
| तस्य | - | राज्ञः |
| सप्तत्रिगुणानि | - | एकविंशतिः |
| दिनानि | - | दिवसानि |
| व्यतीयुः | - | यापयामासुः। |

**सारः** - एवं पुत्रलाभाय पत्न्या सह नियमं धारयन् महनीयकीर्तेः दीनोद्धरणे तत्परस्य च राज्ञः एकविंशतिः दिनानि गतानि।

**विग्रहः** - महनीयकीर्तेः - महनीया कीर्तिः यस्य सः महनीयकीर्तिः, तस्य।
दीनोद्धरणोचितस्य - दीनानाम् उद्धरणे उचितः दीनोद्धरणोचितः, तस्य।
त्रिगुणानि - त्रयः गुणाः येषां तानि।

**क्रिया** - व्यतीयुः - वि + अति +इण् गतौ धातु-परस्मैपदी-लिट्-प्रथमपुरुषः-बहुवचनम्।
व्यतीय - व्यतीयतुः -व्यतीयुः।

**प्रयोगविशेषः** - 'महिष्या समम्'इत्यत्र 'समम्'इत्यस्य योगे तृतीया विभक्तिः।

**२६. नन्दिनी हिमालयस्य एकां गुहां प्रविवेश।**

**अन्येद्युरात्मानुचरस्य भावं**
**जिज्ञासमाना मुनिहोमधेनुः।**
**गङ्गाप्रपातान्तविरूढशष्पं**
**गौरीगुरोः गह्वरमाविवेश।।२६।।**

**पदच्छेदः** - अन्येद्युरात्मानुचरस्य - अन्येद्युः + आत्मानुचरस्य।

गह्वरमाविवेश - गह्वरम् + आविवेश।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| अन्येद्युः - | अन्यस्मिन् दिने |
| मुनिहोमधेनुः - | नन्दिनी |
| आत्मानुचरस्य भावं - | स्वसेवकस्य दिलीपस्य दृढभक्तिं |
| जिज्ञासमाना - | ज्ञातुमिच्छन्ती |
| गङ्गाप्रपातान्तविरूढशष्पं - | गङ्गायाः पतनप्रदेशस्थैः बालतृणैरावृतं |
| गौरीगुरोः - | पार्वतीपितुः हिमवतः |
| गह्वरं - | गुहां |
| आविवेश - | प्रविवेश। |

**सारः** - अन्यस्मिन् दिने नन्दिनी दिलीपस्य भक्तिं ज्ञातुमिच्छन्ती इव गङ्गायाः पतनप्रदेशस्य समीपे बालतृणैः आवृतम् हिमवतः गुहां प्राविशत्।

**विग्रहः** - गौरीगुरोः - गौर्याः गुरुः गौरीगुरुः, तस्य।

**क्रिया** - आविवेश - आङ् इति उपसर्गपूर्वस्य विश् विशने इति धातोः पर-लिट्-प्र-पु-ए-व।
आविवेश - आविविशतुः - आविविशुः।

**२७. क्रूरसिंहेन आक्रमितानन्दिनी।**

**सा दुष्प्रधर्षा मनसाऽपि हिंस्रै-**
**रित्यद्रिशोभाप्रहितेक्षणेन।**
**अलक्षिताभ्युत्पतनो नृपेण**
**प्रसह्य सिंहः किल तां चकर्ष।।२७।।**

**पदच्छेदः** - मनसापि - मनसा + अपि।
इत्यद्रिशोभाप्रहितेक्षणा - इति + अद्रिशोभाप्रहितेक्षणा।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| सा - | नन्दिनी |
| हिंस्रैः - | क्रूरमृगैः |
| मनसाऽपि - | चित्तेन अपि |
| दुष्प्रधर्षा इति - | दुर्निग्रहा इति हेतोः |
| अद्रिशोभाप्रहितेक्षणेन - | रम्ये पर्वते निविष्टदर्शनेन |
| नृपेण - | दिलीपेन |
| अलक्षिताभ्युत्पतनः - | अदृष्टोत्पतनः |
| सिंहः - | केसरी |
| तां - | नन्दिनीं |

| | | |
|---|---|---|
| प्रसह्य | - | हठात् |
| चकर्ष किल | - | आक्रमितवान् खलु। |

**सारः** - सिंहव्याघ्रादयः क्रूरमृगाः नन्दिनीं आक्रमितुं मनसाऽपि अशक्ताः इति मन्यमानः दिलीपः पर्वतस्य निरतिशयशोभायां आकृष्टमनाः आसीत्। तदा दिलीपेन अलक्षितः एकःक्रूरसिंहः नन्दिनीं बलेन चकर्ष।

**विग्रहः** - हिंस्रैः - हिंसितुं शीलमेषामिति हिंस्राः, तैः।

**क्रिया** - चकर्ष - कृष् विलेखने धातुः परस्मैपदी-लिट्-प्रथमपुरुषः-एकवचनम्।
चकर्ष - चकर्षतुः - चकर्षुः।

**२८. धेनोः आक्रन्दनं राजा शुश्राव।**

**तदीयमाक्रन्दितमार्तसाधो-**
**गुहानिबद्धप्रतिशब्ददीर्घम्।**
**रश्मिष्विवादाय नगेन्द्रसक्तां**
**निवर्तयामास नृपस्य दृष्टिम्।।२८।।**

**पदच्छेदः** - रश्मिष्विवादाय - रश्मिषु +इव + आदाय।
तदीयमाक्रन्दितमार्तसाधोः - तदीयम् + आक्रन्दितम् + आर्तसाधोः।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| गुहानिबद्धप्रतिशब्ददीर्घं | - | गह्वरे प्रतिबद्धेन रोदनप्रतिध्वनिना दीर्घीभूतं |
| तदीयं | - | नन्दिन्याः |
| आक्रन्दितं | - | उच्चैर्विलापं |
| आर्तसाधोः | - | दीनानुकम्पस्य |
| नृपस्य | - | दिलीपस्य |
| नगेन्द्रसक्तां दृष्टिं | - | पर्वतकान्तिं आस्वादयन्तीं दृष्टिं |
| रश्मिषु आदाय इव | - | प्रग्रहेषु गृहीत्वा इव |
| निवर्तयामास | - | व्यावर्तयत्। |

**सारः -** सिंहेन आक्रान्ता धेनुः उच्चैः विललाप। गुहानिबद्धत्वात् तद्रोदनस्य प्रतिध्वनिः द्विगुणितः। तदा पर्वतशोभामास्वादयतः राज्ञः दृष्टिः रश्मिषु गृहीत्वा इव न्यवर्तयत्।

**विग्रहः** - आर्तसाधोः - आर्तेषु साधुः आर्तसाधुः, तस्य।
नगेन्द्रः - नगेषु इन्द्रः।

**क्रिया** - निवर्तयामास – नि + वृत् वर्तने धातोः पर-लिट्-प्र-पु-ए-व।
निवर्तयामास - निवर्तयामासतुः - निवर्तयामासुः।

**२९. धेनोरुपरि स्थितं सिंहं राजा अपश्यत्।**

**स पाटलायां गवि तस्थिवांसं**

**धनुर्धरः केसरिणं ददर्श।**
**अधित्यकायामिव धातुमय्यां**
**लोध्रद्रुमं सानुमतः प्रफुल्लम्।।२९।।**

**पदच्छेदः** - अधित्यकायामिव - अधित्यकायाम् +इव।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| धनुर्धरः सः | - | धनुर्धारी सः राजा |
| पाटलायां गवि | - | रक्तवर्णायां धेनौ |
| तस्थिवांसं | - | स्थितं |
| केसरिणं | - | सिंहं |
| सानुमतः | - | पर्वतस्य |
| धातुमय्यां | - | धातुभिः युक्तायाम् |
| अधित्यकायां | - | उपरिभूमौ |
| प्रफुल्लं | - | पुष्पितं |
| लोध्रद्रुमम् इव | - | लोध्रवृक्षम् इव (पाच्चोत्ति इति कैरल्याम्) |
| ददर्श | - | अपश्यत्। |

**सारः** - सिंहः नन्दिनीम् आक्रमितवान्। नन्दिन्याः उपरि स्थितं सिंहं पर्वतस्याधित्यकायां पुष्पितं लोध्रवृक्षमिव अपश्यत्।

**विग्रहः** - धातुमय्याम् - धातुः अस्याः अस्तीति धातुमयी, तस्याम्।
सानुमतः - सानूनि सन्ति अस्मिन् इति सानुमान्, तस्य।

**अलङ्कारः** - उपमा।

**क्रिया** - ददर्श - दृशिर् प्रेक्षणे-लिट्-पर-प्र-पु-ए-व।
ददर्श - ददर्शतुः - ददर्शुः।

**३०. सिंहं हन्तुं राजा शरम् उद्धृतवान्।**

**ततो मृगेन्द्रस्य मृगेन्द्रगामी**
**वधाय वध्यस्य शरं शरण्यः।**
**जाताभिषङ्गो नृपतिर्निषङ्गा-**
**दुद्धर्तुमैच्छत् प्रसभोद्धृतारिः।।३०।।**

**पदच्छेदः** - ततो मृग्न्द्रस्य - ततः + मृगेन्द्रस्य।
नृपतिर्निषङ्गात् - नृपतिः + निषङ्गात्।
उद्धर्तुमैच्छत् - उद्धर्तुम् + ऐच्छत्।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| ततः | - | सिंहदर्शनानन्तरं |

| | | |
|---|---|---|
| मृगेन्द्रगामी | - | मृगराजानुगामी |
| शरण्यः | - | शरणे साधुः |
| प्रसभोद्धतारिः | - | रंहसा शत्रुनाशकः |
| नृपतिः | - | राजा |
| जाताभिषङ्गः (सन्) | - | जातपराभवः सन् |
| वध्यस्य मृगेन्द्रस्य वधाय | - | वधार्हस्य सिंहस्य हननाय |
| निषङ्गात् शरम् उद्धर्तुं | - | तूणीरात् बाणोद्धारणाय |
| ऐच्छत् | - | अभिललाष। |

**सारः** - वीरः शत्रूणाम् उन्मूलने सर्वथा समर्थः शरणागतवत्सलः सः दिलीपः सिंहाक्रान्तां नन्दिनीं रक्षितुम् आलोक्य जातपराभवः सन् वधार्हस्य सिंहस्य वधाय तूणीरात् बाणम् उद्धर्तुम् अभिललाष।

**विग्रहः** - शरण्यः - शरणे साधुः।

मृगेन्द्रगामी - मृगाणाम् इन्द्रः मृगेन्द्रः, मृगेन्द्र इव गमनं शीलं यस्य सः।

वध्यः - वधम् अर्हति इति।

**क्रिया** - ऐच्छत् - इष् इच्छायां धातोः लङ्-प्रपु-ए-व।

ऐच्छत् - ऐच्छताम् - ऐच्छन्।

## पुनरावृत्तिः (Recap)

- राज्ञी राजानं दिलीपं धेनुं च स्वीकृतवती।
- सुदक्षिणा तां प्रदक्षिणीकृत्य तस्याः विशालं श्रृङ्गान्तरम् अर्थसिद्धेः द्वारमिव पूजितवती।
- सन्ध्यावन्दनं समाप्य तौ धेनुं पुनरपि सेवितवन्तौ।
- नन्दिन्यां सुप्तायां राजा निद्रां प्राप।
- एवं राजा एकविंशतिः दिनानि व्यतीतानि।
- एकस्मिन् दिने नन्दिनी हिमवतः गुहां प्राविशत्।
- सिंहेन धेनुः आक्रान्ता।
- दिलीपः धेनुं रक्षितुं अभिललाष।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. का धेनुं पूजयामास?
२. कया उपपन्नेषु प्रसादचिह्नानि फलसिद्धिः भविष्यति?
३. राजा कदा सुप्तः अभवत्?
४. राज्ञः दिलीपस्य कति दिनानि धेनुसेवायां लब्धः?

| |
|---|
| ५. नन्दिनि कुत्र प्राविशत्? |
| ६. कः नन्दिनीं बलेन चकर्ष? |
| ७. केन आक्रान्ता धेनुः उच्चैः विललाप? |
| ८. कः नन्दिनीं रक्षितुम् अभिललाष? |

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

**(Answer the following questions in one or two sentences)**

| |
|---|
| १. धेनोः श्रृङ्गान्तरं किमर्थं पूजयामास? |
| २. कीदृशः दिलीपः गुरुं वसिष्ठं नमस्करोति? |
| ३. धेनोः उपरि स्थितः सिंहः कीदृशः आसीत्? |

**निर्देशानुसारम् उत्तरत।**

| |
|---|
| **I. विग्रहणीत।** |
| क. दिगन्तराणि। |
| ख. तपोवनावृत्तिपथम्। |
| ग. पयस्विनीम्। |
| घ. गृहिणीसहायः। |
| **II. अन्तलिङ्गविभक्तिवचनानि लिखत।** |
| क. वर्त्मनि। |
| ख. सपर्याम्। |
| ग. गौरीगुरोः। |
| घ. गोप्ता। |
| **III. धातुपदलकारपुरुषवचनानि लिखत।** |
| क. ययौ। |
| ख. विरराज। |
| ग. आनर्च। |
| घ. व्यतीयुः। |

## निर्दिष्टाभ्यासः(Assignments)

| |
|---|
| १. अस्य एककस्य कथां संक्षिप्य लिखत। |
| २. कालिदासस्य रघुवंशमहाकाव्ये तृतीयसर्गे वर्तमानं षोडशश्लोकादारभ्य पञ्चविंशतिः श्लोकपर्यन्तं भागं |

पठन्तु।

## उत्तराणि (Answer to Objective type questions)

१. सुदक्षिणा।
२. भक्त्या।
३. नन्दिन्यां सुप्तायां सत्याम्।
४. एकविंशतिः।
५. हिमवतः गुहाम्
६. सिंहः।
७. सिंहेन
८. दिलीपः।

## अधिकवाचनाय ग्रन्थाः (Suggested Readings)

१. कालिदासः, रघुवंशमहाकाव्यम्, सर्गः द्वितीयः, व्याख्या टि.के.रामचन्द्र अय्यर्, आर्.एस्.वाध्यार् आन्ड् सन्स्,कल्पात्ति, पालक्काट्,२०१३।
२. कालिदासः, रघुवंशमहाकाव्यम्, व्याख्या,कुट्टिकृष्णमारार्, मातृभूमि पब्लिक्केषन्स्, कोट्टयम्।
३. कालिदासः, रघुवंशमहाकाव्यम्,हिंदी टीका, श्रीब्रह्मशङ्करमिश्रः साहित्यशास्त्री.चौखम्बा संस्कृतसीरीज़ बनारस।

# Unit - 4

## ३१-४० श्लोकाः।

### उद्देश्यानि (Learning Outcomes)

- पद्यं (श्लोकं) यतितालानुसारम् आलपति।
- महाकविं कालिदासं, तस्य ग्रन्थान् च परिचिनोति।
- महाकाव्येषु रघुवंशस्य प्राधान्यं जानाति।
- आधुनिकं भरणाधिकारिणं प्रति तुलनां करोति।
- काव्यरसानुभूतिं अनुभूयते।
- अलङ्कारप्रयोगे, विशिष्य उपमालङ्कारप्रयोगे कालिदासस्य प्रतिभां जानाति।
- नूतनपदावलीं वर्धयति।
- आशयावगतिः जायते।

### प्राग्व्यपेक्षाः (Prerequisites)

महाकवेः कालिदासस्य रघुवंशे द्वितीयसर्गे राजा दिलीपः कुलगुरोः वसिष्ठस्य आश्रमम् उपेत्य कामधेनुसुतां नन्दिनीं परिसेवितुम् आरब्धवान्। यदा नन्दिनी निद्रां प्राप तदा कुशम् आस्तीर्य तस्याः सकाशं शेतवान् आसीत्। अतिप्रभाते महर्षिशिष्याणां मन्त्रोच्चारणध्वनिमाकर्ण्य सुप्तोत्थितः महाराजः भूयोऽपि तस्याः परिचरणे श्रद्धावान् आसीत्। द्वाविंशे दिने हिमवतः एकां गुहां प्रविष्टां धेनुं कश्चन सिंहः आक्रमितवान्। सिंहं हन्तुं उत्सुकस्य दिलीपस्य सर्वोऽपि प्रयत्नः निष्फलमभूत्। पुनः किं संभूतमितिइति अत्र वर्णयति।

### मुख्यपदानि (Keyterms)

सक्ताङ्गुलिः, नखप्रभाभिः, मन्त्रौषधिभिः, पादपोन्मूलनशक्तिः, कुम्भोदरः, देवदारुवृक्षस्य त्वक्।

### Discussion

**३१. दिलीपस्य दक्षिणकरः चित्रार्पितारम्भ इव अवतस्थे।**

**वामेतरस्तस्य करः प्रहर्तु-**
**र्नखप्रभाभूषितकङ्कपत्रे।**
**सक्ताङ्गुलिः सायकपुङ्ख एव**
**चित्रार्पितारम्भ इवावतस्थे।।३१।।**

**पदच्छेदः** - वामेतरस्तस्य - वामेतरः + तस्य।

सायकपुङ्ख एव -सायकपुङ्खः + एव

इवावतस्थे - इव + अवतस्थे।

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| प्रहर्तुः तस्य | - | प्रहर्तुमिच्छोः दिलीपस्य |
| वामेतरः करः | - | दक्षिणः करः |
| नखप्रभाभूषितकङ्कपत्रे | - | नखकान्त्या प्रशोभितकङ्कपत्रे |
| सायकपुङ्खे एव | - | बाणमूले एव |
| सक्ताङ्गुलिः (सन्) | - | संलग्नाङ्गुलिः भूत्वा |
| चित्रार्पितारम्भ इव | - | चित्रे आलिखितःइव |
| अवतस्थे | - | स्थितिं चकार। |

**सारः** - सिंहं प्रहर्तुमिच्छन् राजा बाणम् उद्धर्तुं करं तूणीरे न्यस्तवान्। तदा तस्य नखकान्त्या प्रशोभितकङ्कपत्रे बाणमूले सक्ताङ्गुलिः सन् चित्रार्पितारम्भ इव अवर्तत।

**विग्रहः** - सक्ताङ्गुलिः - सक्ता अङ्गुलिः यस्य सः।

चित्रार्पितारम्भः - चित्रे अर्पितः आरम्भः यस्य सः।

**अलङ्कारः** - उत्प्रेक्षा।

**क्रिया** - अवतस्थे - अव उपसर्गपूर्वक (ष्ठा गतिनिवृत्तौ) स्था धातोः लिट्-प्र-पु-ए-व।

अवतस्थे - अवतस्थाते - अवतस्थिरे।

अव इत्युपसर्गपूर्वक ष्ठा (स्था) धातोः 'समवप्रविभ्यः स्थः'इति सूत्रेण आत्मनेपदं लभते।

**३२. बाहुस्तम्भेन राजा नष्टवीर्यः बभूव।**

**बाहुप्रतिष्टम्भविवृद्धमन्युः**
**अभ्यर्णमागस्कृतमस्पृशद्भिः।**
**राजा स्वतेजोभिरदह्यतान्तः**
**भोगीव मन्त्रौषधिरुद्धवीर्यः।।३२।।**

**पदच्छेदः** - अभ्यर्णमागस्कृतमस्पृशद्भिः - अभ्यर्णम् + आगस्कृतम् + अस्पृशद्भिः।

भोगीव - भोगी + इव।

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| बाहुप्रतिष्टम्भविवृद्धमन्युः | - | बाह्वोः स्तम्भनेन प्रवृद्धरोषः |
| मन्त्रौषधिरुद्धवीर्यः भोगी इव | - | मन्त्रौषधिभ्यां प्रतिबद्धशक्तिः सर्पः इव |
| अभ्यर्णम् | - | समीपम् |
| आगस्कृतं | - | अपराधकारिणं |
| स्वतेजोभिः | - | स्वप्रभाभिः |

अन्तः अदह्यत - स्वान्तः एव अतप्यत।

(बाहुस्तम्भेन राजा नष्टतेजोभिरन्तरदह्यत इति आशयः)

**सारः** - भुजस्तम्भनेन प्रवृद्धकोपः दिलीपः समीपस्थम् अपराधिनं स्वप्रभावेन स्प्रष्टुमपि न शशाक इति चिन्तया मनसि महान् खेदः अजायत। मन्त्रौषधिभिः विनष्टवीर्यः सर्प इव।

**अलङ्कारः** - उपमा।

**विग्रहः** - रुद्धवीर्यः - रुद्धः वीर्यः यस्य सः।

विवृद्धमन्युः - विवृद्धः मन्युः यस्य सः।

**क्रिया** - अदह्यत - दह् भस्मीकरणे धातोः आत्मनेपदी कर्मणि लङ्-प्र-पु-ए-व।

अदह्यत - अदह्येतां - अदह्यन्त।

**३३. सिंहः राजानं मनुष्यवाचा उवाच।**

**तमार्यगृह्यं निगृहीतधेनु-**
**र्मनुष्यवाचा मनुवंशकेतुम्।**
**विस्माययन्विस्मितमात्मवृत्तौ**
**सिंहोरुसत्वं निजगाद सिंहः।।३३।।**

**पदच्छेदः** - तमार्यगृह्यम् - तम् + आर्यगृह्यम्।

विस्मितमात्मवृत्तौ - विस्मितम् + आत्मवृत्तौ।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| निगृहीतधेनुः सिंहः | - | धेनुं बलात्कारेण गृहीतः सिंहः |
| आर्यगृह्यं | - | सज्जनश्रेष्ठं |
| मनुवंशकेतुं | - | रघुकुलचूडामणिं |
| सिंहोरुसत्वं | - | मृगराज इव पराक्रमशालिनं |
| आत्मवृत्तौ विस्मितं | - | बाहुस्तम्भेन विस्मयाकुलं |
| तं | - | दिलीपराजं |
| विस्माययन् | - | आश्चर्यं जनयन् |
| निजगाद | - | उवाच। |

**सारः** - उन्नतकुलजातं मनुष्यकुलतिलकं सिंहोरुसत्त्वं बाहुस्तम्भनात् आश्चर्यान्वितं दिलीपराजम् इतोऽपि आश्चर्यं प्रापयन् सिंहः मनुष्यवाचा अभाषत।

**विग्रहः** - मनुष्यवाचा - मनुष्यस्य वाक् मनुष्यवाक्, तया मनुष्यवाचा।

**क्रिया** - निजगाद - नि उपसर्गपूर्वक गद व्यक्तायां वाचि धातोः परस्मैपदी लिट्-प्र-पु-ए-व।

निजगाद - निजगददुः - निजगदुः।

**३४. दिलीपस्य अस्त्रप्रयोगः फलरहितः सञ्जातः।**

**अलं महीपाल तव श्रमेण**
**प्रयुक्तमप्यस्त्रमितो वृथा स्यात्।**
**न पादपोन्मूलनशक्तिरंहः**
**शिलोच्चये मूर्च्छति मारुतस्य।।३४।।**

**पदच्छेदः** -अप्यस्त्रमितः- अपि + अस्त्रम् + इतः।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| महीपाल | - | पृथ्वीनाथ |
| तव श्रमेण अलं | - | तव श्रमेण नास्ति प्रयोजनं (साध्याभावात् श्रमः न कर्तव्यः इत्यर्थः) |
| इतः मयि | - | अस्मिन् मयि |
| प्रयुक्तम् अपि अस्त्रं | - | क्षिप्तम् आयुधम् |
| वृथा स्यात् | - | व्यर्थं भविष्यति |
| पादपोन्मूलनशक्तिः | - | वृक्षोन्मूलनशक्तिः |
| मारुतस्य रंहः | - | पवनस्य वेगः |
| शिलोच्चये | - | पर्वते |
| न मूर्च्छति | - | न प्रसरति। |

**सारः** - हे राजन्, बाणप्रयोगेण अलम्। वृक्षोत्पाटनसमर्थः वायुः शिलोच्चये असमर्थः। बाणप्रयोगस्य निष्फलत्वं भवतः शक्तिराहित्येन न, किन्तु मम प्रभावः एव इति सिंहः राजानं वदति इति फलितोऽर्थः।

**विग्रहः** - महीपालः - मह्याः पालः।
पादपः - पादैः पिबति इति पादपः।

**अलङ्कारः** - दृष्टान्तः। (चेद् बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिः)

**क्रिया** - मूर्च्छति - मूर्च्छ मोहने धातोः पर-लट्-प्र-पु-ए-व।
मूर्च्छति - मूर्च्छतः - मूर्च्छन्ति।

**३५. अहं अष्टमूर्तेः महादेवस्य किंकरः कुम्भोदरः।**

**कैलासगौरं वृषमारुरुक्षोः**
**पादार्पणानुग्रहपूतपृष्ठम्।**
**अवेहि मां किङ्करमष्टमूर्तेः**
**कुम्भोदरं नाम निकुम्भतुल्यम्।।३५।।**

**पदच्छेदः** - किङ्करमष्टमूर्तेः - किङ्करम् + अष्टमूर्तेः।
वृषमारुरुक्षोः - वृषम् + आरुरुक्षोः।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| कैलासगौरं वृषं | - | कैलासपर्वतसदृशं शुभ्रं ऋषभं |
| आरुरुक्षोः अष्टमूर्तेः | - | आरोढुम् अभिलषतः परमशिवस्य |
| पादार्पणानुग्रहपूतपृष्ठं | - | पादन्यासेन पवित्रीभूतं पृष्ठभागं |
| कुम्भोदरं नाम | - | कुम्भोदरनामकं |
| किङ्करं | - | सेवकं |
| निकुम्भमित्रं | - | निकुम्भस्य मित्रं |
| माम् अवेहि | - | माम् जानीहि। |

**सारः** - अहं वृषभारूढस्य अष्टमूर्तेः शिवस्य सेवकः कुम्भोदरः भवामि।

**विग्रहः** - कैलासगौरम् - कैलास इव गौरम्।

अष्टमूर्तेः - अष्टौ मूर्तयः यस्य सः, तस्य।

**क्रिया** - अवेहि - अव् + इण् गतौ पर-लोट्-म-पु-ए-व।

अवेहि - अवेतां - अवेत।

**३६. शिवेन पुत्रीकृतः देवदारुः पुरतः अस्ति।**

**अमुं पुरः पश्यसि देवदारुं**
**पुत्रीकृतोऽसौ वृषभध्वजेन।**
**यो हेमकुम्भस्तननिस्सृतानां**
**स्कन्दस्य मातुः पयसां रसज्ञः।।३६।।**

**पदच्छेदः** - पुत्रीकृतोऽसौ - पुत्रीकृतः + असौ।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| पुरः | - | अग्रतः |
| अमुं देवदारुं | - | इमं देवदारुनामकं वृक्षं |
| पश्यसि | - | वीक्ष्यसे |
| यः असौ | - | यः अयं |
| वृषभध्वजेन | - | वृषभवाहनेन शिवेन |
| पुत्रीकृतः | - | पुत्रत्वेन स्वीकृतः |
| स्कन्दस्य मातुः | - | कुमारस्य मातुः |
| हेमकुम्भस्तननिःसृतानां | - | हेमकुम्भस्तनाभ्यां निःसृतानां |
| पयसां | - | क्षीराणां, नीराणां। |
| रसज्ञः (भवति) | - | स्वादु ज्ञातवान् (भवति) (पुरः स्थितोऽयं देवदारुः शिवेन पुत्रीकृतः) |

**सारः** - हे राजन्, त्वं अग्रतो एनं देवदारुवृक्षं पश्यसि खलु? अयं पार्वतीपरमेश्वराभ्यां पुत्रत्वेन स्वीकृतः। यथा पार्वतीदेवी स्कन्दं वात्सल्येन स्तन्यं पाययति स्म, तथा जलसेचनेन एनं देवदारुं परिपालयति हेमकुम्भसदृशाभ्यां स्तनाभ्यां स्कन्दं पयसा पाययति। हेमकुम्भमेव स्तनं, तेन देवदारुं जलेन प्रवर्धयति।

**विग्रहः** - रसज्ञः - रसं जानातीति रसज्ञः।

पुत्रीकृतः - अपुत्रं पुत्रं सम्पद्यमानं कृतः।

वृषभध्वजेन - वृषभः ध्वजः यस्य सः वृषभध्वजः, तेन।

**क्रिया** - पश्यसि - दृशिर् प्रेक्षणे पर-लट्-म-पु-ए-व।

पश्यसि - पश्यथः - पश्यथ।

**३७. पार्वती एनं देवदारुं दृष्ट्वा शुशोच।**

**कण्डूयमानेन कटं कदाचि-**
**द्वन्यद्विपेनोन्मथिता त्वगस्य।**
**अथैनमद्रेस्तनया शुशोच**
**सेनान्यमालीढमिवासुरास्त्रैः।।३७।।**

**पदच्छेदः** - अथैनमद्रेस्तनया - अथ + एनम् + अद्रेः अ तनया।

त्वगस्य - त्वक् + अस्य।

वन्यद्विपेनोन्मथिता - वन्यद्विपेन + उन्मथिता।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| कदाचित् | - | एकदा |
| कटं | - | कपोलं |
| कण्डूयमानेन | - | घर्षयता |
| वनद्विपेन | - | वनगजेन |
| अस्य त्वक् | - | अस्य देवदारुवृक्षस्य त्वक् |
| उन्मथिता | - | उत्पाटिता |
| अथ | - | तदनन्तरं |
| अद्रेः तनया | - | पार्वती |
| असुरास्त्रैः | - | दैत्यास्त्रैः |
| आलीढं | - | क्षतं |
| सेनान्यमिव | - | सेनापतिं स्कन्दमिव |
| एनं | - | व्रणीतं अमुं तरुं दृष्ट्वा |
| शुशोच | - | शोचितवती। |

**सारः** - एकदा केनचित् गजेन देवदारुवृक्षस्य त्वक् कपोलघर्षणेन उत्पाटिता। दैत्यास्त्रैः व्रणितस्य कुमारस्य (सुब्रह्मण्यस्य) अवस्थायां यथा पार्वती तथा एनं देवदारुं प्रति शुशोच।

**विग्रहः** - द्विपः - द्वाभ्यां पिबतीति द्विपः।
**क्रिया** - शुशोच - शुच् शोके पर-लिट्-प्र-पु-ए-व।
शुशोच - शुशुचतुः - शुशुचुः।

**३८. वनद्विपानां निवारणार्थं अत्राहं नियुक्तः।**

**तदा प्रभृत्येव वनद्विपानां**
**त्रासार्थमस्मिन्नहमद्रिकुक्षौ।**
**व्यापारितः शूलभृता विधाय**
**सिंहत्वमङ्कागतसत्ववृत्तिः।।३८।।**

**पदच्छेदः** - प्रभृत्येव - प्रभृति + एव।
अस्मिन्नहम् - अस्मिन् + अहम्।
त्रासार्थमस्मिन्नहमद्रिकुक्षौ - त्रासार्थम् + अस्मिन् + अहम् + अद्रिकुक्षौ।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| तदा प्रभृति | - | तत्कालात् आरभ्य एव |
| वनद्विपानां त्रासार्थं | - | वनगजानां भयार्थं |
| शूलभृता | - | शिवेन |
| अङ्कागतसत्ववृत्तिः | - | समीपमागतप्राणिभक्षणशीलः एव |
| सिंहत्वं | - | केसरित्वं |
| विधाय | - | कृत्वा |
| अस्मिन् अद्रिकुक्षौ | - | एतस्मिन् पर्वतगह्वरे |
| अहं व्यापारितः | - | अहं नियुक्तः। |

**सारः** - 'सिंहरूपधारिणा समीपागतजन्तुभोजिना त्वया वनगजेभ्यः अयं वृक्षः रक्षणीयः'इति मत्स्वामिनः शिवस्य आज्ञा। तदारभ्य अस्यां गुहायां निवसामि। (इति सिंहः राजानमवदत्)
**विग्रहः** - शूलभृता - शूलं बिभर्ति इति शूलभृत्, तेन।
सत्ववृत्तिः - सत्वैः वृत्तिः यस्य सः सत्ववृत्तिः।
सिंहत्वम् - सिंहस्य भावः सिंहत्वम्।

**३९. इयं धेनुः क्षुधितस्य मम तृप्त्यै अलम्।**

**तस्यालमेषा क्षुधितस्य तृप्त्यै**
**प्रदिष्टकाला परमेश्वरेण।**
**उपस्थिता शोणितपारणा मे**
**सुरद्विषश्चाद्रमसी सुधेव।।३९।।**

**पदच्छेदः** - सुधैव - सुधा + एव।

तस्यालम् - तस्य + अलम्।

सुरद्विषश्चान्द्रमसी - सुरद्विषः + चान्द्रमसी।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| परमेश्वरेण | - | शिवेन |
| प्रदिष्टकाला | - | निर्दिष्टसमयं यावत् |
| उपस्थिता | - | सम्प्राप्ता |
| एषा शोणितपारणा | - | इयं रक्तपारणा (गोरूपा) (पारणा तु व्रतावसाने समाप्तिरूपकं पानीयस्य नाम) |
| सुरद्विपः | - | देवारीणाम् (दैत्यानां) |
| चान्द्रमसी | - | चन्द्रसम्बन्धिनी |
| सुधा इव | - | अमृतमिव |
| मे तृप्त्यै | - | मम तृप्त्यर्थं |
| अलम् | - | पर्याप्तमस्ति। |

**सारः** - अतः परमेश्वरेण प्रदत्ता एषा धेनुः मम पारणासमये प्राप्ता एव। देववैरिणां चान्द्रमसी सुधा इव एषा मम तृप्त्यै पर्याप्ता अस्ति।

**अलङ्कारः** - उपमा।

**विग्रहः** - चान्द्रमसी - चन्द्रमसः इयम्।

क्षुधितस्य - क्षुत् अस्य अस्तीति क्षुधितः, तस्य।

परमेश्वरेण - परमः ईश्वरः परमेश्वरः, तेन।

**४०. त्वं लज्जां विहाय गच्छ।**

**स त्वं निवर्तस्व विहाय लज्जां**
**गुरोर्भवान् दर्शितशिष्यभक्तिः।**
**शस्त्रेण रक्ष्यं यदशक्यरक्षं**
**न तद्यशः शस्त्रभृतां क्षिणोति।।४०।।**

**पदच्छेदः** - गुरोर्भवान् - गुरोः + भवान्।

यदशक्यरक्षम्— यत् + अशक्यरक्षम्।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| सः त्वं | - | तादृशः (शत्रुनाशने समर्थः) भवान् |
| लज्जां विहाय | - | व्रीडां परित्यज्य |
| निवर्तस्व | - | प्रतिगच्छ |
| भवान् | - | त्वं |
| गुरोः दर्शितशिष्यभक्तिः | - | गुरुं वसिष्ठं प्रति प्रकाशितभक्तिः अस्ति |

| | | |
|---|---|---|
| यद् शस्त्रेण अशक्यरक्ष्यं | - | यद् आयुधेन अपि रक्षितुमशक्यं |
| तद् रक्ष्यं | - | तद् संरक्षणीयं वस्तु नष्टं चेदपि |
| शस्त्रभृतां यशः | - | शस्त्रधारिणां कीर्तिं |
| न क्षिणोति | - | न हिनस्ति। |

**सारः** - गुरुधनस्य रक्षणे तव श्रद्धा महती। अतः लज्जाम् उपेक्ष्य गच्छ। यद् आयुधेनापि रक्षितुम् अशक्यं वस्तु नष्टं चेदपि तत् शस्त्रधारिणां कीर्तिं न हिनस्ति।

**विग्रहः** - रक्ष्यं - रक्षितुं योग्यम्।

शस्त्रभृतां - शस्त्रं बिभर्ति इति शस्त्रभृत्, तेषाम्।

**क्रिया** - निवर्तस्व - नि + वृतु वर्तने आत्म लोट्-म-पु-ए-व।

निवर्तस्व - निवर्तेथाम् - निवर्तध्वम्।

## पुनरावृत्तिः (Recap)

- सिंहः हठात् धेनुं चकर्ष।
- तदा द्विगुणीभूतो गोः विलापप्रतिध्वनिः राज्ञः दृष्टिं रश्मिभिः आकृष्टा इव निवर्तयामास।
- चापसारी स दिलीपः पाटलवर्णायां गवि स्थितं केसरिणं, धातुमय्यां अधित्यकायां स्थितं लोध्रवृक्षं यदा, तदा ददर्श। ततः सिंहतुल्यपराक्रमः शरणागतवत्सलःसराजा दिलीपः वध्यस्य सिंहस्य वधाय शरमुद्धर्तुं ऐच्छन्।
- तदर्थं प्रहर्तुः तस्य दक्षिणः करः नखकान्त्या भूषितकङ्कपत्रे तेन शोभितसायकपुङ्खे चित्रार्पित इव निश्चलो जातः।

बाहुप्रतिष्ठम्भेन प्रवृद्धकोपः राजा मन्त्रौषधादिना निरुद्धवीर्यः सर्प इव स्वतेजसा अन्तः अदह्यत।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. गोरीगुरोर्गह्वरमाविवेश - का?
२. तदीयमाक्रन्दितमार्तसाधोः - आर्तसाधुः कः?
३. ततो मृगेन्द्रस्य मृगेन्द्रगामी - मृगेन्द्रगामी कः?
४. चित्रार्पितारम्भ इवावतस्थे - कः?
५. बाहुप्रतिष्टम्भ विवृद्धमन्युः - कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

## (Answer the following questions in one or two sentences)

१.. गोरीगुरोः गह्वरमाविवेश - का? किमर्थम्?
२. प्रसह्य सिंहः किल तां चकर्ष - काम्? कदा?

३. धनुर्धरः केसरिणं ददर्श - कीदृशं केसरिणम्?

## निर्दिष्टाभ्यासः (Assignments)

१. उद्धर्तुमैच्छत् प्रसभोद्धृतारिः -विशदयत।
२. कालिदासस्य रघुवंशमहाकाव्ये तृतीयसर्गे वर्तमानं षट्विंशतिः श्लोकादारभ्य पञ्चस्त्रिंशत् श्लोकपर्यन्तं भागं पठन्तु।

## उत्तराणि (Answer to Objective type questions)

१. नन्दिनी।
२. नृपः।
३. दिलीपः।
४. दिलीपस्य करः।
५. राजा।

## अधिकवाचनाय ग्रन्थाः (Suggested Readings)


१.कालिदासः, रघुवंशमहाकाव्यम्, सर्गः द्वितीयः, व्याख्या टि.के.रामचन्द्र अय्यर्, आर्.एस्.वाध्यार् आन्ड् सन्स्, कल्पात्ति, पालक्काट्,२०१३।
२.कालिदासः, रघुवंशमहाकाव्यम्, व्याख्या,कुट्टिकृष्णमारार्, मातृभूमि पब्लिक्केषन्स्, कोट्टयम्।
३. कालिदासः, रघुवंशमहाकाव्यम्,हिंदी टीका, श्रीब्रह्मशङ्करमिश्रः साहित्यशास्त्री.चौखम्बा संस्कृतसीरीज़ बनारस।

BLOCK - 4

# रघुवंशमहाकाव्यम्
# (महाकविः कालिदासः)

## द्वितीयसर्गः
## ४१-७५ श्लोकाः।

# Unit - 1

## ४१-५० श्लोकाः।

### उद्देश्यानि (Learning Outcomes)

- महाकाव्येषु रघुवंशस्य प्राधान्यं जानाति।
- आधुनिकं भरणाधिकारिणं प्रति तुलनां करोति।
- काव्यरसानुभूतिं अनुभूयते।
- अलङ्कारप्रयोगे, विशिष्य उपमालङ्कारप्रयोगे कालिदासस्य प्रतिभां प्रत्यभिजानाति।
- नूतनपदावलीं वर्धयति।
- आशयावगतिः जायते।
- धातुपदलकारपुरुषवचनानि जानाति।

### प्राग्व्यपेक्षाः (Prerequisites)

रघुवंशे द्वितीयसर्गे राज्ञा दिलीपेन परिरक्षितं धेनुं वने सिंहः गृह्णाति।राजा दिलीपः धेनुं रक्षितुं सिंहस्य वधाय शरं उद्धर्तुं ऐच्छत्। बाहुप्रतिष्ठम्भेन प्रवृद्धकोपः राजा मन्त्रौषधादिनां निरुद्धवीर्यः सपःइव स्वतेजसा अन्तः अदह्यत। तदनन्तरं किं भविष्यति इति अस्मिन् पाठभागे पश्यामः।

### मुख्यपदानि (Keyterms)

प्रगल्भम्, वितथप्रयत्नः, विवक्षुः, प्राणभृतम्, , अनुपेक्षणीयम्, घटोघ्नीः, दंष्ट्रामयूखैः,प्रभुत्वम्।

### Discussion

**४१. राजा दिलीपः लज्जाम् उपेक्षितवान्।**

**इति प्रगल्भं पुरुषाधिराजो**
**मृगाधिराजस्य वचो निशम्य।**
**प्रत्याहतास्त्रो गिरिशप्रभावा-**
**दात्मन्यवज्ञांशिथिलीचकार।।४१।।**

**पदच्छेदः** - आत्मन्यवज्ञाम् - आत्मनि + अवज्ञाम्।
वचो निशम्य -वचः+ निशम्य।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| पुरुषाधिराजः | - | नृपः |
| इति | - | वक्ष्यमाणं |
| प्रगल्भं | - | प्रकृष्टं |
| मृगाधिराजस्य वचः | - | वनराजस्य वचनं |
| निशम्य | - | श्रुत्वा |
| गिरिशप्रभावात् | - | ईश्वरस्य तेजोविशेषात् |
| प्रत्याहतस्त्रः (सन्) | - | विफलीकृतास्त्रः सन् |
| आत्मनि | - | स्वस्य विषये |
| अवज्ञां | - | अपमानं |
| शिथिलीचकार | - | अत्यजत्। |

**सारः** - वनराजस्य वचनं श्रुत्वा दिलीपः आत्मनि अवज्ञां दूरीचकार। मदीयः क्षात्रतेजसः न्यूनता न। अपि तु परमशिवस्य तेजोविशेषः एव कारणमिति ज्ञातवान्।

**विग्रहः** - पुरुषाधिराजः - पुरुषाणाम् अधिराजः।
गिरिशः - गिरं शेते इति गिरिशः।

**क्रिया** - शिथिलीचकार - अशिथिलं शिथिलं सम्पद्यमानं चकार शिथिलीचकार।
शिथिलपूर्वक डुकृञ् करणे पर-लिट्-प्र-पु-ए-व।
शिथिलीचकार - शिथिलीचक्रतुः - शिथिलीचक्रुः।

**अलङ्कारः** - काव्यलिङ्गालङ्कारः। (समर्थनीयार्थस्य समर्थनं काव्यलिङ्गम्)

**४२. अथ राजा अब्रवीत्।**

**प्रत्यब्रवीच्चैनमिषुप्रयोगे**
**तत्पूर्वभङ्गे वितथप्रयत्नः।**
**जडीकृतस्त्र्यम्बकवीक्षणेन**
**वज्रं मुमुक्षन्निव वज्रपाणिः।।४२।।**

**पदच्छेदः** - प्रत्यब्रवीच्चैनमिषुप्रयोगे - प्रत्यब्रवीत् + च + एनम् +इषुप्रयोगे।
जडीकृतस्त्र्यम्बकवीक्षणेन - जडीकृतः + त्र्यम्बकवीक्षणेन।
मुमुक्षन्निव - मुमुक्षन् +इव।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| तत्पूर्वभङ्गे | - | प्रथमतः संजातप्रतिबन्धे |
| इषुप्रयोगे | - | बाणप्रयोगे |
| वितथप्रयत्नः | - | विफलप्रयत्नः |
| वज्रं मुमुक्षन् | - | वज्रायुधं मोक्तुमिच्छन् |
| जडीकृतः | - | निस्पन्दीकृतः |
| वज्रपाणिः इव | - | इन्द्रः इव |
| एनं प्रत्यब्रवीत् च | - | सिंहं प्रत्यवदत् च। |

**सारः** - बाणप्रयोगे विफलप्रयत्नः  त्रिनेत्रवीक्षणेन निष्पन्दीकृत इन्द्रः इव स्थितः नृपः एनं सिंहं प्रत्यब्रवीत्।

**विग्रहः** - वितथप्रयत्नः - वितथः प्रयत्नः यस्य सः।

त्र्यम्बकः - त्रीणि अम्बकानि यस्य सः।

वज्रपाणिः - वज्रं पाणौ यस्य सः।

**क्रिया** - प्रत्यब्रवीत् - प्रति उपसर्गपूर्वक ब्रूञ् व्यक्तायां वाचि धातोः पर-लङ्-प्र-पु-ए-व।

प्रत्यब्रवीत् - प्रत्यब्रुताम् - प्रत्यब्रुवन्।

**अलङ्कारः** - उदात्तालङ्कारः। उदात्तमृद्धिश्चरितं श्लाघ्यं चान्योपलक्षणम्।। (कुवलयानन्दम्)

**४३. मम वचनं हास्यं भवेत्, तथापि वक्ष्ये।**

**संरुद्धचेष्टस्य मृगेन्द्रकामं**
**हास्यं वचस्तद्यदहं विवक्षुः।**
**अन्तर्गतं प्राणभृतां हि वेद**
**सर्वं भवान्भावमतोऽभिधास्ये।।४३।।**

**पदच्छेदः** - वचस्तद्यदहम् - वचः + तत् + यद् + अहम्।

भावमतोऽभिधास्ये - भावम् + अतः + अभिधास्ये।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| हे मृगेन्द्र | - | हे वनराज |
| संरुद्धचेष्टस्य | - | प्रतिबद्धव्यापारस्य मम |

| | | |
|---|---|---|
| तद् वचः | - | तद् वाक्यं |
| कामं हास्यम् (अस्ति) | - | नूनं परिहसनीयं भवेत्। |
| यद् (वचः) अहं विवक्षुः | - | यत् वाक्यं अहं विवक्षुः (अस्मि) |
| हि | - | निश्चयेन (यस्मात्) |
| प्राणभृतां | - | जीविनां |
| अन्तर्गतं सर्वं भावं | - | हृद्गतं सर्वम् अभिप्रायं |
| भवान् वेद | - | भवान् जानाति |
| अतः अभिधास्ये | - | तस्मात् वक्ष्यामि। |

**सारः** - हे मृगेन्द्र, शस्त्रप्रयोगे विफलीकृतस्य मम वचनं यद्यपि परिहासास्पदं तथापि अहं वक्तुमिच्छामि। भूतानां मनोगतं सर्वं त्वं जानासि इति हेतोः वक्ष्यामि।

**विग्रहः** - मृगेन्द्रः - मृगाणाम् इन्द्रः।
विवक्षुः - वक्तुम् इच्छुः।

**क्रिया** - अभिधास्ये - अभि (उपसर्ग) + डुधाञ् धारणे आत्म-लृट्-उ-पु-ए-व।
अभिधास्ये - अभिधास्यावहे - अभिधास्यामहे।

**४४. मया धेनुः येन केनापि प्रकारेण संरक्षितव्या।**

**मान्यः स मे स्थावरजङ्गमानां**
**सर्गस्थितिप्रत्यवहारहेतुः।**
**गुरोरपीदं धनमाहिताग्ने-**
**र्नश्यत्पुरस्तादनुपेक्षणीयम्।।४४।।**

**पदच्छेदः** - गुरोरपीदम् - गुरोः + अपि + इदम्।
धनमाहिताग्नेः - धनम् + आहिताग्नेः।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| स्थावरजङ्गमानां | - | चराचराणां |
| सर्गस्थितिप्रत्यवहारहेतुः | - | सृष्टिस्थितिप्रलयकारणं |
| सः | - | ईश्वरः |
| मे मान्यः | - | मम पूज्यः |
| पुरस्तात् नश्यत् | - | पुरतः नश्यमानः |
| आहिताग्नेः गुरोः | - | अग्निहोत्रिणः वसिष्ठस्य |

| | | |
|---|---|---|
| इदं धनम् अपि | - | इयं धेनुः अपि |
| अनुपेक्षणीयम् | - | उपेक्षानर्हं भवति। |

**सारः** - चराचराणां सृष्टिस्थितिसंहारहेतुः सः महेश्वरः मे पूज्यः एव। तथापि मम पुरतः गुरोः वसिष्ठस्य धेनोः नश्यमाना स्थितिः अपि न उपेक्षणीया भवति। ।

**विग्रहः** - अनुपेक्षणीयम् - उपेक्षितुं योग्यम् उपेक्षणीयम्, न उपेक्षणीयम् अनुपेक्षणीयम्।

**४५.मां भक्षयतु, धेनुं मोचयतु।**

**स त्वं मदीयेन शरीरवृत्तिं**
**देहेन निर्वर्तयितुं प्रसीद।**
**दिनावसानोत्सुकबालवत्सा**
**विसृज्यतां धेनुरियं महर्षेः।। ४५।।**

**पदच्छेदः** - धेनुरियम् - धेनुः + इयम्।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| सः त्वं | - | अङ्कागतसत्ववृत्तिः त्वं |
| मदीयेन देहेन | - | मम शरीरेण |
| शरीरवृत्तिं | - | क्षुत्पिपासादिकं |
| निर्वर्तयितुं | - | शमयितुं |
| प्रसीद | - | प्रसन्नो भव |
| दिनावसानोत्सुकबालवत्सा | - | सायंकाले वत्सं द्रष्टुम् उत्कण्ठाकुला |
| इयं महर्षेः धेनुः | - | एषा वसिष्ठाचार्यस्य गौः |
| विसृज्यताम् | - | मुच्यताम्। |

**सारः** - गोः स्थाने भवान् भक्षणरूपेण मम शरीरं स्वीकृत्य सन्तुष्टो भवतु। सायंकाले स्ववत्सं दृष्टुमुत्सुकां महर्षेः इमां धेनुं मोचयतु।

**विग्रहः** - मदीयेन - मम इदं मदीयं, तेन।

**क्रिया** - विसृज्यताम् - वि + सृज् विसर्गे आत्म-लोट्-प्रपु-ए-व।
विसृज्यताम् - विसृज्येताम् - विसृज्यन्ताम्।

**४६. सिंहः पुनरप्युवाच।**

**अथान्धकारं गिरिगह्वराणां**
**दंष्ट्रामयूखैः शकलानि कुर्वन्।**
**भूयः स भूतेश्वरपार्श्ववर्ती**
**किञ्चिद्विहस्यार्थपतिं बभाषे।।४६।।**

**पदच्छेदः** - अथान्धकारम्- अथ + अन्धकारम्।

विहस्यार्थपतिम् - विहस्य + अर्थपतिम्।

स भूतेश्वरपार्श्ववर्ती - सः+ भूतेश्वरपार्श्ववर्ती।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| अथ | - | अनन्तरम् |
| भूतेश्वरपार्श्ववर्ती | - | शिवस्य अनुचरः |
| सः | - | सः सिंहः |
| गिरिगह्वराणां | - | पर्वतगुहानां |
| अन्धकारं | - | तमः |
| दंष्ट्रामयूखैः | - | स्थूलदन्तकिरणैः |
| शकलानि | - | खण्डानि |
| कुर्वन् | - | वितन्वन् |
| किञ्चित् | - | ईषत् |
| विहस्य | - | हसित्वा |
| अर्थपतिम् | - | नृपम् (दिलीपम्) |
| भूयः | - | पुनः |
| बभाषे | - | उवाच। |

**सारः** - अनन्तरं महेशभृत्यः स सिंहः स्वदंष्ट्राशोभया गुहान्धकारं शिथिलीचकार। ततः किञ्चित् हसित्वा दिलीपं वक्ष्यमाणप्रकारेण अवदत्।

**विग्रहः** - दंष्ट्रामयूखैः - दंष्ट्राणां मयूखाः दंष्ट्रामयूखाः, तैः।

गिरिगह्वराणाम् - गिरेः गह्वराणि गिरिगह्वराणि, तेषाम्।

**क्रिया** - बभाषे - भाष व्यक्तायां वाचि -आत्म-लिट्-प्र-पु-ए-व।

बभाषे - बभाषाते - बभाषिरे।

**४७. त्वं चिन्तारहितः इति मन्ये।**

**एकातपत्रं जगतः प्रभुत्वं**
**नवं वयः कान्तमिदं वपुश्च।**
**अल्पस्य हेतोर्बहुहातुमिच्छन्**
**विचारमूढः प्रतिभासि मे त्वम्।।४७।।**

**पदच्छेदः** - वपुश्च - वपुः + च।

हातुमिच्छन् - हातुम् + इच्छन्।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| एकातपत्रम् | - | एकच्छत्रम् |
| जगतः | - | लोकस्य |

| | | |
|---|---|---|
| प्रभुत्वम् | - | स्वामित्वम् |
| नवं वयः | - | तारुण्यं |
| इदम् | - | एतत् |
| कान्तम् | - | रम्यम् |
| वपुःच | - | शरीरञ्च |
| बहु | - | सर्वम् |
| अल्पस्य हेतोः | - | अल्पस्य कारणस्य रक्षणार्थं |
| हातुम् | - | त्यक्तुम् |
| इच्छन् | - | अभिलषन् |
| त्वम् | - | भवान् |
| विचारमूढः | - | कार्याकार्ये विचारहीनः |
| मे प्रतिभासि | - | मे लक्ष्यते। |

**सारः** - चक्रवर्तित्वं लोकस्य स्वामित्वं नवतारुण्यं सुन्दरं शरीरञ्च भवतः अस्ति। एतत् सर्वं त्वम् अल्पफलाय नन्दिनीसंरक्षणाय त्यक्तुमिच्छसि वा? एतादृशः त्वं चिन्तारहितः इति अहं मन्ये।

**विग्रहः** - एकातपत्रम् - एकं च तत् आतपत्रं च एकातपत्रम्।
प्रभुत्वम् - प्रभोः भावः।
विचारमूढः - विचारे मूढः।

**क्रिया** - प्रतिभासि - प्रति इत्युपसर्गपूर्वक भा दीप्तौ-पर-लट्-म-पु-ए-व।
प्रतिभासि - प्रतिभाथः - प्रतिभाथ।

**४८. तव अनुकम्पयापि स्वदेहत्यागः न युक्तः।**

**भूतानुकम्पा तव चेदियं गौ-**
**रेका भवेत्स्वस्तिमती त्वदन्ते।**
**जीवन्पुनःशश्वदुपप्लवेभ्यः**
**प्रजाः प्रजानाथ पितेव पासि।।४८।।**

**पदच्छेदः** - चेदिदम् - चेत् + इदम्।
गौरेका- गौः + एका।
शश्वदुपप्लवेभ्यः - शश्वत् + उपप्लवेभ्यः।
पितेव - पिता +इव।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| तव | - | भवतः |
| भूतानुकम्पा | - | भूतेषु दयालुत्वं |
| चेत् | - | यदि अस्ति |

| | | |
|---|---|---|
| त्वदन्ते | - | तव नाशे |
| इयं एका गौः | - | एषा नन्दिनी |
| स्वस्तिमती | - | क्षेमवती भवेत् |
| प्रजानाथ | - | हे जनेश्वर |
| जीवन् | - | त्वं जीवसि चेत् |
| पुनः | - | भूयः |
| पिता इव | - | तात इव |
| प्रजाः | - | जनान् |
| उपप्लवेभ्यः | - | उपद्रवेभ्यः |
| शश्वत् | - | सदा |
| पासि | - | त्रायसे। |

**सारः** - प्राणिनां कृते भवतः नितराम् अनुकम्पा अस्ति इति अहं मन्ये। एकस्याः धेनोः कृते स्वप्राणान् विहातुं भवान् इच्छति वा? किन्तु यदि त्वं प्राणान् धारयसि चेत् पिता इव सर्वेषां भूतजालानां रक्षिता भविष्यसि खलु?

**विग्रहः** - भूतानुकम्पा - भूतेषु अनुकम्पा।

स्वस्तिमती - स्वस्तिःअस्याः अस्तीति।

प्रजानाथ - प्रजानां नाथः प्रजानाथः, तत्सम्बुद्धौ।

**क्रिया** - पासि - पा रक्षणे पर-लट्-म-पु-ए-व।

पासि - पाथः - पाथ।

**४९. गुरोः कोपः बहुगोदानेन परिहर्तुं शक्यते।**

**अथैकधेनोरपराधचण्डाद्-**
**गुरोः कृशानुप्रतिमाद्बिभेषि।**
**शक्योऽस्य मन्युर्भवता विनेतुं**
**गाः कोटिशः स्पर्शयता घटोघ्नीः।।४९।।**

**पदच्छेदः** - अथैकधेनोः - अथ + एकधेनोः। शक्योऽस्य - शक्यः + अस्य।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| अथ | - | अनन्तरं |
| एकधेनोः अपराधचण्डात् | - | नन्दिनीं न रक्षिता इति अपराधेन कुपितात् |
| कृशानुप्रतिमात् गुरोः | - | अग्निकल्पात् आचार्यवसिष्ठात् |
| बिभेषि (चेत् ) | - | भयाकुलः भवसि चेत् |
| घटोघ्नीः कोटिशः गाः | - | कलशस्तनीः कोटिसंख्याकाः धेनूः |
| स्पर्शयता | - | समर्पयता |
| भवता | - | त्वया |
| अस्य मन्युः | - | अस्य आचार्यस्य कोपः |
| विनेतुं शक्यः | - | दूरीकर्तुं शक्यते। |

**सारः** - नन्दिन्याः कृते कोटिशः पयस्विनीः गाः दत्वा मुनेः वसिष्ठस्य कोपात् विमुक्तिं प्राप्तुं त्वया शक्यते। अलं चिन्तया।

**क्रिया** - बिभेषि - भी भये धातोः पर-लट्-मपु-ए-व।

बिभेषि - बिभिथः/बिभीथः - बिभिथ/बिभीथ। ।

**व्याकरणविशेषः** - कृशानुप्रतिमात् कोपात् बिभेषि इत्यत्र भीत्रार्थानां भयहेतुः इति सूत्रेण पञ्चमी।

**५०. भवतः शरीरं संरक्ष।**

**तद्रक्ष कल्याणपरम्पराणां**
**भोक्तारमूर्जस्वलमात्मदेहम्।**
**महीतलस्पर्शनमात्रभिन्न-**
**मृद्धं हि राज्यं पदमैन्द्रमाहुः।।५०।।**

**पदच्छेदः** - तद्रक्ष - तत् + रक्ष।

भोक्तारमूर्जस्वलमात्मदेहम् - भोक्तारम् + ऊर्जस्वलम् + आत्मदेहम्।

महीतलस्पर्शनमात्रभिन्नमृद्धम् - महीतलस्पर्शनमात्रभिन्नम् + ऋद्धम्।

पदमैन्द्रमाहुः - पदम् + ऐन्द्रम् + आहुः।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| तत् | - | तस्मात् हेतोः |
| कल्याणपरम्पराणाम् | - | मङ्गलश्रेणीनाम् |
| भोक्तारम् | - | अनुभूतवन्तम् |
| ऊर्जस्वलम् | - | ऊर्जस्विनम् |
| आत्मदेहं | - | निजं शरीरं |
| रक्ष | - | पालय |
| हि | - | यतः |
| ऋद्धं राज्यं | - | समृद्धं राज्यं |
| महीतलस्पर्शनमात्रभिन्नं | - | भूतलस्पर्शेन भिन्नं |
| ऐन्द्रं पदं | - | स्वर्गं |
| आहुः | - | विद्वांसःकथयन्ति। |

**सारः** - मनीषिणः सुसमृद्धं राज्यं भूलोकस्वर्गमिति वदन्ति। अतः समस्तमङ्गलानाम् उपभोक्तारं तव शरीरं पालय।

**विग्रहः** - कल्याणपरम्पराणाम् - कल्याणानां परम्पराः कल्याणपरम्पराः, तेषाम्।
ऊर्जस्वलम् - ऊर्जः अस्य अस्तीति ऊर्जस्वलः, तम्।
आत्मनदेहम् - आत्मनः देहः आत्मदेहः, तम्।
ऐन्द्रम् - इन्द्रस्य इदम्।

**क्रिया** - आहुः - ब्रूञ् व्यक्तायां वाचि पर-लट्-प्र-पु-ब-व।
ब्रवीति/आह - ब्रूतः/आहतुः - ब्रुवन्ति/आहुः।

**अलङ्कारः** - व्यतिरेकः (व्यतिरेको विशेषश्चेदुपमानोपमेययोः)

## पुनरावृत्तिः (Recap)

- सिंहेन सूचितं वृत्तान्तं ज्ञात्वा राजा दिलीपः आत्मनि लज्जाम् उपेक्षितवान्।
- इषुप्रयोगे वितथप्रयत्नः राजा सिंहम् एवम् अवदत्। भवान् प्राणिनामन्तर्गतं भावं जानाति।
- मम वचः कदाचित् परिहास्यं भवेत्। तथापि वक्ष्ये। मया गुरोः नन्दिनी परिपालनीया। शिवः आदरणीयः च।
- मदीयं शरीरं तुभ्यं भक्षणाय समर्पयामि।

- गुरोः इमां धेनुं मोचय। एतदाकर्ण्य सिंहः अर्थपतिं राजानम् एवमवदत्।
- एकातपत्रं जगतः प्रभुत्वं नवं वयः मनोहरं शरीरं च तव सन्ति।
- एतत्सर्वमपि अल्पाय कार्याय त्यक्तुं सन्नद्धः त्वं विचारमूढः इत्यहं मन्ये।
- त्वयि भूतानुकम्पा अधिका। त्वं जीवसि चेत् पितेव प्रजाः उपप्लवेभ्यः रक्षितुं शक्यते।
- गुरोः कोपात् विमुक्तिं प्राप्तुं कोटिशः घटोघ्नीः गाः दातुं शक्यते।
- अतः भूतलस्वर्गमिति विद्वद्भिः परिकीर्तितं राज्यं नोपेक्ष्य राज्यसुखमनुभवतु।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. आत्मन्यवज्ञां शिथिलीचकार - कः?
२. गुरोः भवान् दर्शितशिष्यभक्तिः - कथं शिष्यभक्तिं प्रकटितवान्?
३. भवान् प्राणभृताम् अन्तर्गतं भावं वेत्ति - कः?
४. गिरिगह्वराणाम् अन्धकारं शकलानि कुर्वन् - कैः?
५. 'मदीयं शरीरं तुभ्यं भक्षणाय समर्पयामि।'इति कः वदति?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।
## (Answer the following questions in one or two sentences)

१. मृगाधिराजः कः?
२. त्र्यम्बकवीक्षणेन कः वज्रमुपेक्षितवान्?
३. सर्गस्थितिप्रत्यवहारहेतुः कः?
४. विचारमूढः प्रतिभासि मे त्वम् - केन कारणेन?
५. गुरोः कोपात् विमुक्तिं प्राप्तुं कम् उपायं सिंहः निर्दिशति?

## निर्दिष्टाभ्यासः (Assignments)

१. सिंहदिलीपसंवादं संक्षिप्य लिखत।
२. कालिदासस्य रघुवंशमहाकाव्ये चतुर्थसर्गे वर्तमानाः प्रथमाः पञ्चश्लोकाः सविस्तरं पठन्तु।

## उत्तराणि (Answer to Objective type questions)

१. दिलीपः।

२. रक्ष्यां धेनुं रक्षितुं यतितान्।
३. सिंहः।
४. दंष्ट्रामयूखैः।
५. दिलीपः।

## अधिकवाचनाय ग्रन्थाः (Suggested Readings)


१. कालिदासः, रघुवंशमहाकाव्यम्, सर्गः द्वितीयः, व्याख्या टि.के.रामचन्द्र अय्यर्, आर्.एस्.वाध्यार् आन्ड् सन्स्, कल्पात्ति, पालक्काट्,२०१३।
२. कालिदासः, रघुवंशमहाकाव्यम्, व्याख्या,कुट्टिकृष्णमारार्, मातृभूमि पब्लिक्केषन्स्, कोट्टयम्।
३. कालिदासः, रघुवंशमहाकाव्यम्,हिंदी टीका, श्रीब्रह्मशङ्करमिश्रः साहित्यशास्त्री.चौखम्बा संस्कृतसीरीज़ बनारस।

# Unit - 2

## ५१-५८ श्लोकाः।

## उद्देश्यानि (Learning Outcomes)

- महाकाव्येषु रघुवंशस्य प्राधान्यं जानाति।
- दिलीपं आधुनिकं भरणाधिकारिणं प्रति तुलनां करोति।
- काव्यरसानुभूतिं अनुभूयते।
- अलङ्कारप्रयोगे, विशिष्य उपमालङ्कारप्रयोगे कालिदासस्य प्रतिभां जानाति।
- नूतनपदावलीं वर्धयति।
- आशयावगतिः जायते।
- धातुपदलकारपुरुषवचनानि जानाति।

## प्राग्व्यपेक्षाः (Prerequisites)

कालिदासस्य रघुवंशे द्वितीये सर्गे राज्ञः दिलीपस्य नन्दीनीपरिपालनं वर्णयति। राज्ञा दिलीपेन पालितां धेनुः कश्चन सिंहः आक्रमितवान्। राजा दिलीपः धेनुं सिंहात् रक्षितुं स्वशरीरं दातुं सन्नद्धः भवति। तदनन्तरं किं संभूतमिति अस्मिन् पाठभागे पश्यामः।

## मुख्यपदानि (Keyterms)

मृगेन्द्रे, उच्चैः, धेन्वा, वाचं, क्षतात्, विपरीतबुद्धेः, सुरभेः।

## Discussion

**५१. सिंहः स्ववचोभ्यः विरराम।**

**एतावदुक्त्वा विरते मृगेन्द्रे**
**प्रतिस्वनेनास्य गुहागतेन।**
**शिलोच्चयोऽपि क्षितिपालमुच्चैः**
**प्रीत्या तमेवार्थमभाषतेव।।५१।।**

**पदच्छेदः** - एतावदुक्त्वा – एतावत् + उक्त्वा
तमेवार्थमभाषतेव - तम् + एव + अर्थम् + अभाषत +इव।

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| मृगेन्द्रे | - | सिंहे |
| एतावत् | - | एतत्पर्यन्तं |
| उक्त्वा | - | कथयित्वा |
| विरते (सति) | - | विरामं गते सति |
| गुहागतेन | - | गुहापूरितेन |
| अस्य प्रतिस्वनेन | - | सिंहशब्दस्य प्रतिशब्देन |
| शिलोच्चयः अपि | - | पर्वतः अपि |
| तमेवार्थं | - | मृगराजेन यदुक्तं तद् |
| प्रीत्या | - | सन्तोषेण |
| क्षितिपालं | - | दिलीपं |
| उच्चैः | - | उच्चस्तरं |
| अभाषत इव | - | अवदत् इव (प्रतिभाति)। |

**सारः** - एतत्पर्यन्तम् उक्त्वा मृगेन्द्रे विरते सति दरीगतेन प्रतिशब्देन पर्वतोऽपि अतिप्रीत्या राजानं तदेव उच्चैस्तरं अवदत् इव प्रतिभाति।

**अलङ्कारः** - उत्प्रेक्षा। (सम्भावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना)

**विग्रहः** - मृगेन्द्रः - मृगाणाम् इन्द्रः मृगेन्द्रः।

क्षितिपालः - क्षितेः पालः क्षितिपालः।

**क्रिया** - अभाषत - भाष व्यक्तायां- वाचि -आत्म-लङ्-प्र-पु-एव।

अभाषत - अभाषेतां - अभाषन्त।

**प्रयोगविशेषः** - विरते मृगेन्द्रे - सति सप्तमीप्रयोगः।

**५२. राजा पुनरपि उवाच।**

**निशम्य देवानुचरस्य वाचं**
**मनुष्यदेवः पुनरप्युवाच।**
**धेन्वा तदध्यासितकातराक्ष्या**
**निरीक्ष्यमाणः सुतरां दयालुः।।५२।।**

**पदच्छेदः** - पुनरप्युवाच - पुनः + अपि + उवाच।

तदध्यासितकातराक्ष्या – तत् + अध्यासितकातराक्ष्या।

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| देवानुचरस्य | - | देवस्य (शिवस्य) अनुयायिनः (सिंहस्य) |
| वाचं निशम्य | - | वाणीम् आकर्ण्य |
| मनुष्यदेवः | - | राजा दिलीपः |

| | | |
|---|---|---|
| तदध्यासितकातराक्ष्या धेन्वा | - | सिंहाक्रमणेन भयचकितया धेन्वा |
| निरीक्ष्यमाणः | - | वीक्ष्यमाणः |
| सुतरां दयालुः | - | अत्यधिकं कृपालुः सन् |
| पुनः अपि उवाच | - | भूयोऽपि अवदत् |

**सारः** - सिंहाक्रमणेन भयचकितायाः धेन्वाः अवलोकनेन राजा नितरां दयालुः अभवत्। देवानुचरस्य सिंहस्य वाणीम् आकर्ण्य मनुष्यदेवः सः भूयोऽपि अवदत्।

**विग्रहः** - मनुष्यदेवः - मनुष्याणां देवः मनुष्यदेवः।

कातराक्ष्या - कातरे अक्षिणी यस्याः सा कातराक्षी, तया।

**क्रिया** - उवाच - ब्रूञ् व्यक्तायां वाचि पर-लिट्-प्र-पु-ए-व।

उवाच - ऊचतुः - ऊचुः।

**५३. क्षतात् त्राणमेव क्षत्रियस्य मुख्यः धर्मः।**

**क्षतात्किल त्रायत इत्युदग्रः**
**क्षत्रस्य शब्दो भुवनेषु रूढः।**
**राज्येन किं तद्विपरीतवृत्तेः**
**प्राणैरुपक्रोशमलीमसैर्वा।।५३।।**

**पदच्छेदः** - त्रायत इति - त्रायते +इति।

इत्युदग्रः - इति + उदग्रः।

प्राणैरुपक्रोशमलीमसैर्वा - प्राणैः + उपक्रोशमलीमसैः + वा।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| क्षतात् | - | आपदः |
| त्रायते इति | - | रक्ष्यते इति |
| उदग्रः क्षत्रस्य शब्दः | - | श्रेष्ठः क्षत्रियशब्दः इति |
| भुवनेषु रूढः किल | - | त्रिषु लोकेषु प्रसिद्धः खलु |
| तत् विपरीतवृत्तेः | - | तस्य प्रतिलोमेन आचरतः |
| राज्येन किं | - | राज्येन किं प्रयोजनम्? |
| उपक्रोशमलीमसैः प्राणैः वा | - | निन्दया मलीमसेन प्राणधारणेन वा किम्? |

**सारः** - क्षतात् त्रायते इति क्षत्रियः इति श्रेष्ठः शब्दः लोकेषु सर्वत्र प्रसिद्धः खलु। एवं स्थिते तद्विपरीतेन आचरितस्य पुरुषस्य राज्येन, उपक्रोशमलीमसेन जीवितेन वा किं प्रयोजनम्? (न किमपि प्रयोजनम् इत्यर्थः)

**विग्रहः** - उपक्रोशमलीमसेन - उपक्रोशेन (निन्दया) मलीमसः उपक्रोशमलीमसः, तेन।

**५४. अन्यगवां प्रदानेन महर्षिम् अनुनेतुं न शक्यते।**

**कथं नु शक्योऽनुनयो महर्षे-**
**र्विश्राणनादन्यपयस्विनीनाम्।**
**इमामनूनां सुरभेरवेहि**
**रुद्रौजसा तु प्रहृतं त्वयास्याम्।।५४।।**

**पदच्छेदः** - शक्योऽनुनयः - शक्यः + अनुनयः।
विश्राणनाच्चान्यपयस्विनीनाम् - विश्राणनात् + च +अन्यपयस्विनानाम्।
सुरभेरवेहि - सुरभेः + अवेहि।
त्वयास्याम् - त्वया + अस्याम्।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| अन्यपयस्विनीनां | - | अन्यधेनूनां |
| विश्राणनात् | - | दानात् |
| महर्षेः | - | वसिष्ठस्य |
| अनुनयः | - | सान्त्वनं |
| कथं नु शक्यः | - | अशक्यः एव |
| इमां | - | नन्दिनीं |
| सुरभेः | - | कामधेनोः |
| अनूनाम् अवेहि | - | अन्यूनाम् जानीहि |
| अस्यां | - | अस्यां गवि |
| त्वया प्रहृतं तु | - | त्वया कृतम् अपहरणं तावत् |
| रुद्रौजसा | - | रुद्रस्य शिवस्य शक्त्या एव। |

**सारः** - अन्यधेनूनाम् प्रदानेन महर्षेः सान्त्वनं साध्यं न। इयं धेनुः कामधेनोः अनन्या एव। केवलं शिवशक्त्या एव इमां प्रहृतवान् अस्ति।

**विग्रहः** - पयस्विनी - प्रशस्तं पयः यस्याः सा पयस्विनी।

**क्रिया** - अवेहि - अव आ इत्युपसर्ग-द्वयपूर्वकइण् गतौ पर-लोट्-म-पु-एव।
अवेहि -अवेतम् - अवेत।

**५५. राजा स्वदेहार्पणेन धेन्वाः मोचनम् इच्छति।**

**सेयं स्वदेहार्पणनिष्क्रयेण**
**न्याय्या मया मोचयितुं भवत्तः।**
**न पारणा स्याद्विहता तवैवं**
**भवेदलुप्तश्च मुनेः क्रियार्थः।।५५।।**

**पदच्छेदः** - सेयम् - सा + इयम्।

स्याद्विहता- स्यात् + विहता।

तवैवम् - तव + एवम्।

भवेदलुप्तश्च - भवेत्+ अलुप्तः + च।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| सा इयं | - | इयं नन्दिनी |
| मया | - | राज्ञा |
| स्वदेहार्पणनिष्क्रयेण | - | स्वदेहसमर्पणविनिमयेन |
| भवत्तः | - | त्वत्तः |
| मोचयितुं | - | विमोचयितुं |
| न्याय्या | - | न्यायादनपेता |
| तव | - | सिंहस्य |
| पारणा | - | व्रतावसानभोजनं |
| विहता न स्यात् | - | विनष्टा न भवेत् |
| मुनेः | - | वसिष्ठस्य |
| क्रियार्थः च | - | क्रियायाः साधनं (धेनुः) |
| अलुप्तः भवेत् | - | अन्यूनं न भवेत्। |

**सारः** - मम शरीरप्रदानेन त्वत्तः इमां धेनुं मोचयितुम् इच्छामि। एवं चेत् तव पारणायाः हानिः न भवति, महर्षेः क्रियायाः हेतोः धेनोः लोभश्च न स्यात्।

**विग्रहः** - न्याय्या - न्यायात् अनपेता।

**क्रिया** - भवेत् - भू सत्तायाम् पर-विधिलिङ्-प्र-पु-ए-व।

भवेत् - भवेतां - भवेयुः।

**५६. गोः रक्षाम् अकृत्वा स्वामिनः पुरतः स्थातुं न शक्यते।**

**भवानपीदं परवानवैति**
**महान् हि यत्नस्तव देवदारौ।**
**स्थातुं नियोक्तुर्नहि शक्यमग्रे**
**विनाश्य रक्ष्यं स्वयमक्षतेन।।५६।।**

**पदच्छेदः** - भवानपीदं - भवान् + अपि + इदम्।

यत्नस्तव - यत्नः + तव।

नियोक्तुर्न - नियोक्तुः + न।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| परवान् भवान् अपि | - | यजमानेन नियुक्तः भवान् अपि |

| | | |
|---|---|---|
| इदम् अवैति | - | एतत् जानातु |
| हि तव | - | कुतः इति चेत् भवतः |
| देवदारौ | - | देवदारुसंरक्षणे |
| महान् यत्नः | - | अधिकः यत्नः |
| रक्ष्यं | - | रक्षणीयं वस्तु |
| विनाश्य | - | नाशयित्वा |
| अक्षतेन | - | विना क्षतं |
| स्वयं नियोक्तुः | - | स्वयं यजमानस्य |
| अग्रे | - | पुरतः |
| स्थातुं शक्यं नहि | - | उपैतुम् अशक्यं खलु। |

**सारः** - त्वं देवदारोः रक्षणाय नियुक्तः असि। त्वया अस्मिन् कर्मणि महान् क्लेशः अनुभूयते किल। एवं स्थिते रक्ष्यं वस्तु अरक्ष्य अक्षतेन यजमानस्य पुरः स्थातुं कथं शक्यते? विना नन्दिनीम् ऋषिम् उपैतुम् अशक्तः इति भावः।

**विग्रहः** - रक्ष्यः - रक्षितुं योग्यः।

**५७. महतां देहापेक्षया यशः वरीयः।**

**किमप्यहिंस्यस्तव चेन्मतोऽहं**
**यशः शरीरे भव मे दयालुः।**
**एकान्तविध्वंसिषु मद्विधानां**
**पिण्डेष्वनास्था खलु भौतिकेषु।।५७।।**

**पदच्छेदः** - किमप्यहिंस्यस्तव - किम् + अपि + अहिंस्यः + तव।
चेन्मतोऽहम् - चेत् + मतः + अहम्।
पिण्डेष्वनास्था – पिण्डेषु + अनास्था।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| किमप्यहं | - | येन केनापि कारणेन अहं (दिलीपः) |
| तव | - | सिंहस्य |
| अहिंस्यः मतः इति चेत् | - | हिंसानर्हः इति चिन्ता चेत् |
| मे यशः शरीरे | - | मम यश एव शरीरे |
| दयालुः भव | - | करुणावान् भव |
| मद्विधानां | - | मादृशानां |
| एकान्तविध्वंसिषु | - | अत्यन्तनश्वरेषु |
| भौतिकेषु पिण्डेषु | - | पञ्चभूतनिर्मितेषु शरीरेषु |
| अनास्था खलु | - | आसक्तिः न अस्त्येव। |

**सारः** - अहम् अवध्यः इति भवान् चिन्तयति तर्हि मम यशः एव शरीरे दयालुः भव। कुतः इति चेत् मादृशानां पञ्चभूतनिर्मितेषु शरीरेषु आसक्तिः नास्ति एव।

**विग्रहः** - अहिंस्यः - हन्तुं योग्यः हिंस्यः, न हिंस्यः।
दयालुः - दया अस्य अस्ति इति दयालुः।

**५८. सम्भाषणेन सौहृदं जायते।**

**सम्बन्धमाभाषणपूर्वमाहु-**
**वृत्तः स नौ संगतयोर्वनान्ते।**
**तद्भूतनाथानुग नार्हसि त्वं**
**सम्बन्धिनो मे प्रणयं विहन्तुम्।।५८।।**

**पदच्छेदः** - संगतयोर्वनान्ते - संगतयोः + वनान्ते।
तद्भूतनाथानुग - तत् + भूतनाथानुग।
नार्हसि - न + अर्हसि ।
सम्बन्धिनो मे - सम्बन्धिनः+ मे

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| सम्बन्धं | - | सौहृदं |
| आभाषणपूर्वम् (इति) आहुः | - | सम्भाषणहेतुकम् इति विद्वांसःवदन्ति |
| वनान्ते संगतयोः | - | वने मिलितयोः आवयोः |
| सः नौ वृत्तः | - | सम्बन्धः जातः |
| तत् | - | तस्मात् |
| हे भूतनाथानुग ! | - | हे शिवकिङ्कर ! |
| त्वं संबन्धिनः मे | - | सुहृद्भूतस्य मे (त्वं मम सुहृत् संजातः असि) |
| प्रणयं विहन्तुं नार्हसि | - | मम प्रार्थनां त्यक्तुं नार्हसि। |

**सारः** - मिथः सम्भाषणेन सौहृदं संजायते इति अभिज्ञाः वदन्ति। तादृशः सम्बन्धः अत्र संजातः। तस्मात् मम प्रार्थनां स्वीकुरु।

**क्रिया** - आहुः - ब्रूञ् व्यक्तायां वाचि धातोः पर-लट्-प्रपु-बव।
ब्रवीति /आह - ब्रूतः /आहतुः - ब्रुवन्ति/आहुः।

## पुनरावृत्तिः (Recap)

- सिंहस्य वचनानि यदा समाप्तः तदा शिलोच्चयोऽपि गुहागतेन प्रतिस्वनेन तमेवार्थम् अभाषत इव काचन प्रतीतिः अवर्तत।

- हे राजन्, मङ्गलपरम्पराणां भोक्तारं तव शरीरं रक्ष।
- समृद्धं तव राज्यं स्वर्गमेव।
- एवम् उक्त्वा मृगेन्द्रे विरमिते सति तदुक्तेः प्रतिध्वनिना पर्वतोऽपि राजानम् एतदुच्चैः अभाषित इति प्रतिभाति। देवानुचरस्य वाचं श्रुत्वा धेन्वाः दयनीयाम् अवस्थां दृष्ट्वा दिलीपः अतीव दयालुः सन् पुनः अवदत्। क्षतात् त्रायते इति क्षत्रियः।
- यदि तन्न साध्यते तर्हि राज्येन शरीरेण वा किं प्रयोजनम्? सुरभेः अनूनां नन्दिनीं विहाय अन्याः धेनूः दत्वा महर्षेः कोपः कथं शाम्यते?
- रुद्रौजसा एव एषा आक्रान्ता। अतः मम शरीरं स्वीकृत्य एनां मोचय।
- यागादिकमपि सुष्ठु प्रचलिष्यति, तव पारणापि सम्भवेत्।
- देवदारोः रक्षणे भवानिव गोरक्षणे दत्तश्रद्धः अहं कथं रक्षणीयं गाम् अरक्ष्य मुनेः सकाशं गमिष्यामि?
- यद्यहं अहिंस्यः इति भवान् मन्यते चेत् मम यशःशरीरे दयालुः भव।
- मादृशानां नश्यमानेषु आमिषपिण्डेषु अनास्था एव। सम्बन्धमाभाषणपूर्वम् इत्यतः मम प्रार्थनां अङ्गीकुरु।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. मेवार्थम् अभाषत - कः?
२. निरीक्ष्यमाणः सुतरां दयालुः - काम् निरीक्ष्यमाणः?
३. विनाश्य रक्ष्यं स्वयमक्षतेन - किं रक्ष्यम्?
४. केन सौहृदं सञ्जायते
५. क्षतात् त्रायते इति ------। रिक्तस्थानं पूरयत।

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।
## (Answer the following questions inone or two sentences)

१. प्राणैरुपक्रोशमलीमसैः वा - कुतः एवम् अवदत्?
२. रुद्रौजसा तु प्रहतं त्वायास्याम् - केन ? कस्याम्?
३. स्थातुं नियोक्तुः न हि शक्यमग्रे - कुतः?

**निर्देशानुसारम् उत्तरयत**

**I. विग्रहं लिखत।**
क. देवानुचरस्य।
ख. क्षत्रियः।
ग. भूतनाथानुगः।

**II. पदच्छेदं कुरुत।**
क. अभाषतेव।
ख. सुरभेरवेहि।
ग. तवैवम्।

## एकैकया खण्डिकयाउत्तराणि लिखत।
## (Answer the following question in a paragraph)

१.सम्बन्धिनो मे प्रणयं विहन्तुं नार्हसि - कुतः?

## निर्दिष्टाभ्यासः (Assignments)

१. अस्मिन् एकके आगतानि विग्रहवाक्यानि लिखत।
२. कालिदासस्य रघुवंशमहाकाव्ये चतुर्थसर्गे वर्तमानानां प्रथमानां दशश्लोकानां आशयं लिखन्तु ।

## उत्तराणि (Answer to Objective type questions)

१. शिलोच्चयः।
२. नन्दिनीम्।
३. नन्दिनी।
४. सम्भाषणेन।
५. क्षत्रियः।

## अधिकवाचनाय ग्रन्थाः (Suggested Readings)

१. कालिदासः, रघुवंशमहाकाव्यम्, सर्गः द्वितीयः, व्याख्या टि.के.रामचन्द्र अय्यर्, आर्.एस्.वाध्यार् आन्ड् सन्स्, कल्पात्ति, पालक्काट्,२०१३।
२. कालिदासः, रघुवंशमहाकाव्यम्, व्याख्या,कुट्टिकृष्णमारार्, मातृभूमि पब्लिक्केषन्स्, कोट्टयम्।
३. कालिदासः, रघुवंशमहाकाव्यम्,हिंदी टीका, श्रीब्रह्मशङ्करमिश्रः साहित्यशास्त्री.चौखम्बा संस्कृतसीरीज़ बनारस।

# Unit - 3

## ५९-६७ श्लोकाः।

## उद्देश्यानि (Learning Outcome)

- महाकाव्येषु रघुवंशस्य प्राधान्यं जानाति।
- आधुनिकं भरणाधिकारिणं प्रति तुलनां करोति।
- काव्यरसानुभूतिं अनुभूयते।
- अलङ्कारप्रयोगे कालिदासस्य प्रतिभां जानाति।
- नूतनपदावलीं वर्धयति।
- आशयावगतिः जायते।
- धातुपदलकारपुरुषवचनानि जानाति।

## प्राग्व्यपेक्षाः (Prerequisites)

क्रूरं सिंहं हन्तुं उद्युक्तस्य दिलीपस्य श्रमः पराजितः। तदा सिंहः मनुष्यवाचा 'अहं शिवकिङ्करः, त्वं लज्जां त्यज'इत्याधिक्षम् अवदत्। 'धेनोः नन्द्न्याः संरक्षणाय मम शरीरमर्पयामि'इत्युक्त्वा भूमौ राजा स्वादेहत्यागाय सन्नद्धः भूत्वा पपात। किं संभूतमिति पश्यामः।

## मुख्यपदानि (Keyterms)

उत्पश्यतः, प्रतिष्टम्भविमुक्तबाहुः, सिंहनिपातं, उद्धितं, मायां, व्रणीष्व, हस्तौ, प्रतिश्रुत्या।

## Discussion

**५९. दिलीपः स्वदेहम् उपानयत्।**

**तथेति गां मुक्तवते दिलीपः**
**सद्य प्रतिष्टम्भविमुक्तबाहुः।**
**स न्यस्तशस्त्रो हरये स्वदेह-**
**मुपानयत्पिण्डमिवामिषस्य।।५९।।**

**पदच्छेदः** - तथेति - तथा +इति।
न्यस्तशस्त्रो हरये - न्यस्तशस्त्रः + हरये

पिण्डमिवामिषस्य - पिण्डम् +इव + आमिषस्य।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| तथा इति | - | तथा अस्तु इत्युक्त्वा |
| गां मुक्तवते हरये | - | यदा सिंहः गां मुक्तवान् तदा |
| सद्य | - | प्रसभं |
| प्रतिष्टम्भविमुक्तबाहुः सः दिलीपः | - | बन्धनात् विमुक्तहस्तः राजा |
| न्यस्तशस्त्रः | - | उपेक्षितशस्त्रः सन् |
| स्वदेहं | - | स्वशरीरं |
| आमिषस्य पिण्डम् इव | - | मांसपिण्डमिव |
| उपानयत् | - | सविधं समर्पितवान्। |

**सारः** - तथा अस्तु अति भावेन सिंहः गां नन्दिनीं मुमोच। सद्य एव स्वतन्त्रहस्तः राजा दिलीपःशस्त्राणि त्यक्त्वा स्वशरीरं पललपिण्डमिव सिंहाय समर्पितवान्।

**व्याकरणविशेषः** - गां मुक्तवते - सति सप्तमी।

**क्रिया** - उपानयत् - उपइत्युपसर्गपूर्वक णीञ् प्रापणे पर-लङ्-प्र-पु-ए-व।
उपानयत् -उपानयताम् -उपानयन्

**६०. राज्ञोपरि पुष्पवृष्टिः पपात।**

**तस्मिन्क्षणे पालयितुः प्रजाना-**
**मुत्पश्यतः सिंहनिपातमुग्रम्।**
**अवाङ्मुखस्योपरि पुष्पवृष्टिः**
**पपात विद्याधरहस्तमुक्ता।।६०।।**

**पदच्छेदः** - अवाङ्मुखस्योपरि - अवाङ्मुखस्य + उपरि।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| तस्मिन् क्षणे | - | तदानीं |
| उग्रं सिंहनिपातं | - | अतिभयानकं सिंहपतनं |
| उत्पश्यतः | - | प्रतीक्ष्यमाणस्य |
| अवाङ्मुखस्य | - | विनम्रमुखस्य |
| प्रजानां पालयितुः उपरि | - | राज्ञः उपरि |
| विद्याधरहस्तमुक्ता | - | विद्याधराणां हस्तेभ्यः मुक्ता |
| पुष्पवृष्टिः | - | कुसुमवृष्टिः |
| पपात | - | अपतत्। |

**सारः** - सिंहस्य भयानकं पतनं प्रतीक्ष्य शयानस्य क्षितिपालस्य दिलीपस्य उपरि विद्याधरवर्षिता पुष्पवृष्टिः पपात।

**क्रिया** - पपात - पत्लृ पतने पर-लिट्-प्र-पु-ए-व।

पपात - पेततुः - पेतुः।

**६१. उत्तिष्ठ वत्सेति वचो निशम्योत्थितः गां ददर्श, न सिंहम्।**

**उत्तिष्ठ वत्सेत्यमृतायमानं**
**वचो निशम्योत्थितमुत्थितः सन्।**
**ददर्श राजा जननीमिव स्वां**
**गामग्रतः प्रस्रविणीं न सिंहम्।।६१।।**

**पदच्छेदः** - निशम्योत्थितमुत्थितः - निशम्य + उत्थितम् + उत्थितः।

वत्सेत्यमृतायमानम् - वत्स + इति + अमृतायमानम्।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| राजा | - | दिलीपः |
| उत्तिष्ठ वत्सइति अमृतायमानम् | - | वत्स उत्तिष्ठ इति अमृततुल्यं |
| उत्थितं वचः | - | श्रेष्ठं वचः |
| निशम्य | - | श्रुत्वा |
| उत्थितः सन् | - | उत्थाय |
| अग्रतः | - | पुरतः |
| प्रस्रविणीं गां | - | क्षीरस्राववतीं धेनुं |
| स्वां जननीम् इव | - | आत्मीयां मातरम् इव |
| ददर्श | - | अपश्यत् |
| सिंहं न ददर्श | - | केसरिणं न ददर्श। |

**सारः** - हे पुत्र, उत्तिष्ठ इति अमृतायमानां वाणीम् आकर्ण्य उत्थितः राजा दिलीपःस्वपुरः क्षीरस्राववतीं नन्दिनीम् स्वमातरमिवअपश्यत्, न तु सिंहम्।

**विग्रहः** - अमृतायमानम् - अमृतम् इव आचरति इति अमृतायमानम्।

प्रस्रविणीम् - प्रस्रवः अस्याः अस्तीति प्रस्रविणी, ताम्।

**क्रिया** - ददर्श - दृशिर् प्रेक्षणे पर-लिट्-प्र पु-ए-व।

ददर्श - ददृशतुः - ददृशुः

**६२. विस्मितं राजानं धेनुरुवाच।**

**तं विस्मितं धेनुरुवाच साधो**
**मायां मयोद्भाव्यपरीक्षितोऽसि।**
**ऋषिप्रभावान्मयि नान्तकोऽपि**
**प्रभुः प्रहर्तुं किमुतान्यहिंस्राः।।६२।।**

**पदच्छेदः** - मयोद्भाव्य - मया + उद्भाव्य।

परीक्षितोऽसि - परीक्षितः + असि।

ऋषिप्रभावान्मयि - ऋषिप्रभावात् + मयि ।

नान्तकोऽपि - न + अन्तकः + अपि।

किमुतान्यहिंस्राः - किम् + उत + अन्यहिंस्राः।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| विस्मितं तं | - | आश्चर्यभरितं तं दिलीपं |
| धेनुः उवाच | - | नन्दिनी अवदत् |
| साधो | - | हे सौम्यशील |
| मया मायाम् उद्भाव्य | - | मम मायया |
| (त्वं) परीक्षितः असि | - | त्वं परीक्षितवान् भवसि |
| ऋषिप्रभावात् | - | वसिष्ठप्रभावात् |
| मयि अन्तकः अपि | - | मयि यमः अपि |
| प्रहर्तुं न प्रभुः | - | हन्तुं न समर्थः |
| किमुत अन्यहिंस्राः | - | किं पुनः अन्यघातुकाः सिंहादयः। |

**सारः** - विस्मयापन्नं दिलीपं धेनुः नन्दिनीं अब्रवीत् यत् हे साधो! केसरीरूपां मायां विधाय त्वां अहं परीक्षितवती। वसिष्ठर्षिसामर्थ्यात् यमोऽपि मां प्रहर्तुं न समर्थः। किं पुनः अन्यहिंस्रजन्तवः?

**विग्रहः** - ऋषिप्रभावात् - ऋषेः प्रभावः ऋषिप्रभावः, तस्मात्।

क्रिया - उवाच - ब्रूञ् व्यक्तायां वाचि पर-लिट्-प्र-पु-ए-व।

उवाच - ऊचतुः - ऊचुः।

**अलङ्कारः** - अर्थापत्तिः। कैमुत्येनार्थसंसिद्धिः काव्ये अर्थापत्तिरिष्यते।

**६३. गुरौ भक्त्या मय्यनुकम्पया च ते प्रीतास्मि।**

**भक्त्या गुरौ मय्यनुकम्पया च**
**प्रीतास्मि ते पुत्र वरं वृणीष्व।**
**न केवलानां पयसां प्रसूति-**
**मवेहि मां कामदुधां प्रसन्नाम्।।६३।।**

**पदच्छेदः** - मय्यनुकम्पया - मयि + अनुकम्पया।

प्रीतास्मि - प्रीता + अस्मि।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| पुत्र! | - | हे वत्स! |
| गुरौ भक्त्या | - | वसिष्ठे नितान्तभक्त्या |
| मयि अनुकम्पया च | - | मयि (नन्दिन्यां) दयया च |
| ते प्रीता अस्मि | - | तुभ्यं प्रसन्ना अस्मि |
| वरं वृणीष्व | - | वरं स्वीकुरु |

| | | |
|---|---|---|
| मां | - | नन्दिनीं |
| केवलानां पयसां | - | दुग्धमात्रस्य |
| प्रसूतिं | - | कारणं |
| न अवेहि | - | न विद्धि |
| प्रसन्नां मां | - | प्रीतां मां |
| कामदुधां | - | मनोरथपूरयित्रीं |
| अवेहि | - | विद्धि। |

**सारः** - हे पुत्र, गुरौ तव भक्तिं मयि तव दयां च अवेक्ष्य प्रसन्नाहम्। अभीष्टं वरं स्वीकुरु। अहं केवलस्य पयसः दाता न भवामि।यदि अहं प्रसन्ना तर्हि सकलवरदायिनी भवेयम् इति जानीहि।

**विग्रहः** - कामदुधाम् - कामान् दोग्धि इति कामदुधा, ताम्।

**क्रिया** - वृणीष्व - वृङ् वरणे आत्म-लोट्-म-पु-ए-व।

वृणीष्व - वृणाथाम् - वृणीध्वम्।

अस्मि - अस भुवि धातोः पर-लट्-उ-पु-ए-व।

अस्मि - स्वः - स्मः।

**६४. ततः सुदक्षिणायां तनयं ययाचे।**

**ततः समानीय स मानितार्थी**
**हस्तौ स्वहस्तार्जितवीरशब्दः।**
**वंशस्य कर्तारमनन्तकीर्तिं**
**सुदक्षिणायां तनयं ययाचे।।६४।।**

**पदच्छेदः** - कर्तारमनन्तकीर्तिम् - कर्तारम् + अनन्तकीर्तिम्।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| ततः | - | अनन्तरं |
| मानितार्थी | - | सम्मानितयाचकः |
| स्वहस्तार्जितवीरशब्दः | - | स्वकर्मणा आर्जितवीर्यः |
| सः | - | दिलीपः |
| हस्तौ समानीय | - | अञ्जलिं बद्ध्वा |
| वंशस्य कर्तारं | - | कुलस्य प्रवर्धयितारं |
| अनन्तकीर्तिं | - | अनश्वरयशसं |
| तनयं | - | पुत्रं |
| सुदक्षिणायां | - | स्वभार्यायां |
| ययाचे | - | अयाचत (प्रार्थितवान्)। |

**सारः** - प्रार्थयितॄणां तोषकः वीरकर्मा च दिलीपचक्रवर्ती अञ्जलिं बद्ध्वा कामधेनुसुतां नन्दिनीं कुलप्रवर्तकं यशस्विनं च पुत्रं सुदक्षिणायां लब्धुं याचितवान्।

**विग्रहः** - मानितार्थी - मानिताः अर्थिनः येन सः।
अनन्तकीर्तिम् - अनन्ता कीर्तिः यस्य सः अनन्तकीर्तिः, तम्।

**क्रिया** - ययाचे - याचृ याञ्चायां आत्म-लिट्-प्र-पु-ए-व।
ययाचे - यायाचाते - ययाचिरे।

**६५. धेनुः राज्ञे कामं प्रतिशुश्राव।**

**सन्तानकामाय तथेति कामं**
**राज्ञे प्रतिश्रुत्य पयस्विनी सा।**
**दुग्ध्वा पयः पत्रपुटे मदीयं**
**पुत्रोपभुङ्क्ष्वेति तमादिदेश।।६५।।**

**पदच्छेदः** - तथेति - तथा + इति।
पुत्रोपभुङ्क्ष्वेति - पुत्र + उपभुङ्क्ष्व +इति।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| सा पयस्विनी | - | सा नन्दिनी |
| सन्तानकामाय | - | पुत्रकामाय |
| राज्ञे | - | दिलीपाय |
| तथा इति | - | तथास्त्विति |
| कामं प्रतिश्रुत्य | - | वरं प्रतिज्ञाय |
| पुत्र | - | हे वत्स |
| मदीयं पयः | - | मम दुग्धं |
| पत्रपुटे | - | पर्णपुटे |
| दुग्ध्वा | - | दोहनं कृत्वा |
| उपभुङ्क्ष्व इति | - | पिब इति |
| तम् | - | दिलीपम् |
| आदिदेश | - | उपदिदेश । |

**सारः** - सा नन्दिनी तथास्तु इति वरं प्रदाय पर्णैः निर्मिते पात्रे 'मम पयः दोहनं कृत्वा पिब'इति तम् आज्ञापितवती।

**विग्रहः** - पयस्विनी - प्रशस्तं पयः अस्याः अस्तीति।
सन्तानकामाय - सन्तानं कामयते इति सन्तानकामः, तस्मै।
मदीयम् - मम इदम्।
पत्रपुटे - पत्राणां पुटः पत्रपुटः, तस्मिन्।

**क्रिया** - आदिदेश - आङ् पूर्वक दिश् उच्चारणे पर-लिट्-प्र-पु-ए-व।
आदिदेश - आदिदिशतुः - आदिदिशुः।

**६६. राजा वत्सपीतावशिष्टं क्षीरं भोक्तुमैच्छत्।**

**वत्सस्य होमार्थविधेश्च शेष-**
**मृषेरनुज्ञामधिगम्य मातः।**
**औधस्यमिच्छामि तवोपभोक्तुं**
**षष्ठांशमुर्व्याःइव रक्षितायाः।।६६।।**

**पदच्छेदः** - होमार्थविधेश्च - होमार्थविधेः + च।
शेषमृषेरनुज्ञामधिगम्य - शेषम् + ऋषेः + अनुज्ञाम् + अधिगम्य।
तवोपभोक्तुम् - तव + उपभोक्तुम्।
षष्ठांशमुर्व्याः - षष्ठांशम् +उर्व्याः।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| (हे) मातः | - | हे जननि |
| वत्सस्य शेषं | - | वत्सपीतावशिष्टं |
| होमार्थविधेः च शेषं | - | यागानुष्ठानावशिष्टं च |
| तव औधस्यं | - | भवत्याः दुग्धं |
| रक्षितायाः | - | पालितायाः |
| ऊर्व्याः | - | पृथिव्याः |
| षष्ठांशमिव | - | षष्ठं भागमिव |
| ऋषेः अनुज्ञां | - | मुनेः अनुमतिं |
| अधिगम्य | - | प्राप्य |
| उपभोक्तुं | - | पातुं |
| इच्छामि | - | अभिलषामि। |

**सारः** - दिलीपः धेनुमुवाच - मातः, वत्सपानावशिष्टं यागावशिष्टं च तत् तव दुग्धं पालितायाः भूमेः षष्ठांशमिव गुरोः अनुमतिं प्राप्य भोक्तुम् इच्छामि।

**विग्रहः** - होमार्थविधेः - होमः एव अर्थः(प्रयोजनम्) होमार्थः।होमार्थस्य विधिः होमार्थविधिः, तस्य।
औधस्यम् - ऊधसि भवम्।
षष्ठांशम् - षष्ठः अंशः षष्ठांशः, तम्।

**अलङ्कारः** - उपमा।

**क्रिया** - इच्छामि - इष इच्छायां धातोः पर-लट्-उ-पु-ए-व।
इच्छामि - इच्छावः - इच्छामः।

**६७. प्रीत्या गौः तेन सह आश्रमं प्रत्याययौ।**

**इत्थं क्षितीशेन वसिष्ठधेनु-**
**र्विज्ञापिता प्रीततरा बभूव।**
**तदन्विता हैमवताच्च कुक्षेः**
**प्रत्याययावाश्रममश्रमेण।।६७।।**

**पदच्छेदः** - हैमवताच्च - हैमवतात् + च।

प्रत्याययावाश्रममश्रमेण - प्रत्याययौ + आश्रमम् + अश्रमेण।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| इत्थं | - | अनेन प्रकारेण |
| क्षितीशेन | - | भूपतिना |
| विज्ञापिता | - | निवेदिता |
| वसिष्ठधेनुः | - | नन्दिनी |
| प्रीततरा | - | अतिसन्तुष्टा |
| बभूव | - | अभवत् |
| तदन्विता | - | दिलीपेन युक्ता |
| हैमवतात् | - | हिमालयसम्बन्धिनः |
| कुक्षेः | - | कन्दरात् |
| अश्रमेण | - | अनायासेन |
| आश्रमं | - | गुरोः तपोवनं |
| प्रत्याययौ च | - | प्रत्यागता च। |

**सारः** - एवं दिलीपेन प्रार्थिता नन्दिनी पूर्वापेक्षया अधिकतरं सन्तुष्टा बभूव। ततः सा हिमाद्रेः गुहातः प्रस्थाय मुनेः आश्रमं प्रत्यागच्छत्। दिलीपोऽपि ताम् अनुगतः।

**विग्रहः** - हैमवतम् - हिमवतः इदम्।
क्षितीशः - क्षितेः ईशः।

**क्रिया** - प्रत्याययौ –'प्रति आङ्' पूर्वयोः अय गतौ पर-लिट्-प्र-पु-ए-व। प्रत्याययौ - प्रत्याययतुः - प्रत्याययुः।

## पुनरावृत्तिः (Recap)

- सिंहः गां मुमोच।
- राजा स्वशरीरं सिंहाय समर्पितवान्।
- राजा स्वपुरः सिंहस्य स्थाने नन्दिनीं अपश्यत्।
- नन्दिनी पूर्वापेक्षया अधिकतरं सन्तुष्टा बभूव।

- दिलीपोऽपि नन्दिनीं अनुगतः।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. सिंहः कां मुमोच?
२. राजा किं सिंहाय समर्पितवान्?
३. राज्ञः उपरि केभ्यः पुष्पवृष्टिः अपतत्?
४. राजा स्वपुरःकाम् अपश्यत्?
५. नान्तकोऽपि- पदच्छेदं कुरुत।

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

## (Answer the following questions in one or two sentences)

१. धेनुः दिलीपं किम् अब्रवीत्?
२. राजा धेनुं वररूपेण किं याचितवान्?
३. धेनुः राजानां किम् आज्ञापितवती?

## निर्दिष्टाभ्यासः (Assignments)

१. नन्दिनी दिलीपं कथं परीक्षितवती?

## उत्तराणि (Answer to Objective type questions)

१.गाम्।
२. स्वशरीरम्।
३. विद्याधराणां हस्तेभ्यः।
४. नन्दिनीम्।
५. न + अन्तकः + अपि।

## अधिकवाचनाय ग्रन्थाः (Suggested Readings)


१. कालिदासः, रघुवंशमहाकाव्यम्, सर्गः द्वितीयः, व्याख्या टि.के.रामचन्द्र अय्यर्, आर्.एस्.वाध्यार् आन्ड् सन्स्, कल्पात्ति, पालक्काट्,२०१३।

२. कालिदासः, रघुवंशमहाकाव्यम्, व्याख्या,कुट्टिकृष्णमारार्, मातृभूमि पब्लिक्केषन्स्, कोट्टयम्।

३. कालिदासः, रघुवंशमहाकाव्यम्,हिंदी टीका, श्रीब्रह्मशङ्करमिश्रः साहित्यशास्त्री.चौखम्बा संस्कृतसीरीज़ बनारस।

# Unit - 4

## ६८-७५ श्लोकाः।

## उद्देश्यानि (Learning Outcomes)

- महाकाव्येषु रघुवंशस्य प्राधान्यं जानाति।
- आधुनिकं भरणाधिकारिणं प्रति तुलनां करोति।
- काव्यरसानुभूतिं अनुभूयते।
- अलङ्कारप्रयोगे, विशिष्य उपमालङ्कारप्रयोगे कालिदासस्य प्रतिभां जानाति।
- नूतनपदावलीं वर्धयति।
- आशयावगतिः जायते।
- धातुपदलकारपुरुषवचनानि जानाति।

## प्राग्व्यपेक्षाः (Prerequisites)

कालिदासस्य रघुवंशे द्वितीयसर्गे नन्दिनीसेवां कविः वर्णयति। राज्ञः दिलीपस्य भक्तौ संतुष्टा नन्दिनी इष्टं वरं प्रार्थयितुं राजानमुपदिदेश। स्वभार्यायां सुदक्षिणायां 'कुलवर्धकं पुत्रं वाञ्चामि'इत्युत्तरमवदत्। पुत्रप्राप्तिरूपं फलं प्राप्तुं नन्दिनी तमनुगृहीतवती।

## मुख्यपदानि (Keyterms)

गुरवे, पपौ, प्रयुज्य,भर्तुः, सहिष्णुः, कर्शिताङ्गः, पौरैः, द्यौः।

## Discussion

**६८. राजा गुरवे प्रियायै च धेनोः प्रसादं न्यवेदयत्।**

**तस्याः प्रसन्नेन्दुमुखःप्रसादं**
**गुरुर्नृपाणां गुरवे निवेद्य।**
**प्रहर्षचिह्नानुमितं प्रियायै**
**शशंस वाचा पुनरुक्तयेव।।६८।।**

**पदच्छेदः** - गुरुर्नृपाणाम् - गुरुः + नृपाणाम्।

पुनरुक्तयेव - पुनः + उक्तया + इव

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| प्रसन्नेन्दुमुखः | - | प्रसन्नवदनः |
| नृपाणां गुरुः | - | भूपालानां चक्रवर्ती दिलीपः |
| प्रहर्षचिह्नानुमितं | - | मुखरागादिलक्षणैः ऊहितं |
| तस्याः | - | धेनोः |
| प्रसादं | - | अनुग्रहं |
| पुनः | - | भूयः |
| उक्तया इव | - | कथिता इव |
| वाचा | - | वाण्या |
| गुरवे | - | वसिष्ठाय |
| निवेद्य | - | विज्ञाप्य |
| (पश्चात्) प्रियायै | - | पुनःसुदक्षिणायै |
| शशंस | - | अकथयत्। |

**सारः** - दिलीपः यदा वसिष्ठसमीपम् आगतः तदा धेनोः मुखप्रसादात् वरः लब्धः इति ज्ञातवान्। राजा गुरवे तदनुग्रहकार्यं विज्ञाप्य सुदक्षिणायै पुनः कथितवान्।

**विग्रहः**- प्रसन्नेन्दुमुखः - प्रसन्नःइन्दुरिव मुखं यस्य सः।

**क्रिया** - शशंस - शंस् स्तुतौ पर-लिट्-प्र-पु-ए-व।

शशंस - शशंसतुः - शशंसुः।

**व्याकरणविशेषः** - गुरवे निवेद्य - अव नि पूर्वकस्य विध् धातोः प्रयोगे गुरुशब्दस्य चतुर्थी स्यात्।

**अलङ्कारः** - उत्प्रेक्षा।

**६९. वसिष्ठेन कृताभ्यनुज्ञो राजा नन्दिनीस्तन्यं पपौ।**

**स नन्दिनीस्तन्यमनिन्दितात्मा**

**सद्वत्सलो वत्सहुतावशेषम्।**

**पपौ वसिष्ठेन कृताभ्यनुज्ञः**

**शुभ्रं यशो मूर्तमिवातितृष्णः।।६९।।**

**पदच्छेदः** - नन्दिनीस्तन्यमनिन्दितात्मा - नन्दिनीस्तन्यम् + अनिन्दितात्मा।

मूर्तिमिवातितृष्णः - मूर्तिम् +इव + अतितृष्णः।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| अनिन्दितात्मा | - | अगर्हितस्वभावः |

| | | |
|---|---|---|
| सद्वत्सलः | - | सज्जनप्रियः |
| वसिष्ठेन | - | गुरुणा |
| कृताभ्यनुज्ञः | - | विहितानुमतः |
| सः | - | दिलीपः |
| वत्सहुतावशेषं | - | वत्सपानहवनावशिष्टं |
| नन्दिनीस्तन्यं | - | धेनुक्षीरं |
| शुभ्रं | - | धवलं |
| मूर्तं | - | मूर्तिमत् |
| यशः इव | - | कीर्तिरिव |
| अतितृष्णः (सन्) | - | अतिपिपासितः सन् |
| पपौ | - | पीतवान्। |

**सारः** - गुरोः वसिष्ठस्य अनुमतिं प्राप्य अगर्हितः सज्जनानुरागी दिलीपराजः वत्सपीतावशिष्टं हुतावशिष्टं च नन्दिन्याः औधस्यं नितरां तृषितः सन् मूर्तिमद्धवलः यश इव अपिबत्।

**विग्रहः** - अनिन्दितात्मा - अनिन्दितः आत्मा यस्य सः।

कृताभ्यनुज्ञः - कृता अभ्यनुज्ञा यस्य सः।

वत्सहुतावशेषम् - वत्सहुतयोः अवशेषं वत्सहुतावशेषं, तत्।

नन्दिनीस्तन्यम् - नन्दिन्याः स्तेन भवम्।

अतितृष्णः - अतिशयिता तृष्णा यस्य सः।

सद्वत्सलः - सत्सु वत्सलः।

**क्रिया** - पपौ - पा पाने पर-लिट्-प्र-पु-ए-व।

पपौ - पपतुः - पपुः।

**अलङ्कारः** - उत्प्रेक्षा।

**७०. प्रातः व्रतं समाप्य तौ दम्पती राजधानीं प्रति प्रस्थितौ।**

**प्रातर्यथोक्तव्रतपारणान्ते**

**प्रास्थानिकं स्वस्त्ययनं प्रयुज्य।**

**तौ दम्पती स्वां प्रति राजधानीं**
**प्रस्थापयामास वशी वसिष्ठः।।७०।।**

**पदच्छेदः** - प्रातर्यथोक्तव्रतपारणान्ते - प्रातः + यथोक्तव्रतपारणान्ते।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| वशी वसिष्ठः | - | जितेन्द्रियः वसिष्ठमुनिः |
| प्रातः | - | प्रभाते |
| यथोक्तव्रतपारणान्ते | - | पूर्वोक्तगोसेवारूपव्रतान्तभोजनान्ते |
| प्रास्थानिकं | - | प्रस्थानकालोचितं |
| स्वस्त्ययनं | - | आशीर्वादं |
| प्रयुज्य | - | दत्वा |
| तौ दम्पती | - | तौ सुदक्षिणादिलीपौ |
| स्वां राजधानीं प्रति | - | स्वकीयां राजधानीम् अयोध्यां प्रति |
| प्रस्थापयामास | - | प्रेषयामास। |

**सारः** - इत्थं पारणायां समनुष्ठितायां सत्यां गुरुर्वसिष्ठः प्रस्थानकालोचितां शुभाशिर्वादनं दत्वा सुदक्षिणादिलीपौ अयोध्यां प्रति प्रेषयामास।

**विग्रहः** - वशी - वशः अस्य अस्ति इति वशी।
प्रास्थानिकम् - प्रस्थाने भवम्।
दम्पती - जाया च पतिश्च दम्पती।

**क्रिया** - प्रस्थापयामास - प्र + स्था णिजन्तरूपम् पर-लिट्-प्र-पु-ए-व।
प्रस्थापयामास - प्रस्थापयामासतुः - प्रस्थापयामसुः।

**७१. राजा हुताशं धेनुं च प्रदक्षिणीकृत्य प्रतस्थे।**

**प्रदक्षिणीकृत्य हुतं हुताश-**
**मनन्तरं भर्तुररुन्धतीं च।**
**धेनुं सवत्सां च नृपः प्रतस्थे**
**सन्मङ्गलोदग्रतरप्रभावः।।७१।।**

**पदच्छेदः** - हुताशमनन्तरम् - हुताशम् + अनन्तरम्।
भर्तुररुन्धतीम् - भर्तुः + अरुन्धतीम्।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| नृपः | - | दिलीपराजः |
| हुतं | - | तर्पितं |
| हुताशं | - | अग्निं |
| अनन्तरं अरुन्धतीं च | - | प्रदक्षिणानन्तरं गुरुपत्नीं अरुन्धतीं |

| | | |
|---|---|---|
| भर्तुः | - | स्वामिनः वसिष्ठस्य |
| सवत्सां धेनुं च | - | वत्ससहितां नन्दिनीञ्च |
| प्रदक्षिणीकृत्य | - | परिक्रम्य |
| सन्मङ्गलोदग्रतरप्रभावः (सन्) | - | मङ्गलाचारैः विवृद्धतेजः सन् |
| प्रतस्थे | - | उपक्रान्तवान्। |

**सारः** - दिलीपः तर्पिताग्निं, गुरुं, गुरुपत्नीं, वत्सान्वितां धेनुं च सर्वान् क्रमशः प्रदक्षिणक्रियया पूजयित्वा सद्भिः मङ्गलाचारैः समृद्धपुरुषः सन् आश्रमतः राजधानीं प्रति प्रतस्थे।

**विग्रहः** - हुताशम् - हुतम् अश्नानि इति हुताशः, तम् हुताशम्।
सवत्साम् - वत्सेन सह विद्यमाना सवत्सा, ताम्।

**क्रिया** - प्रतस्थे - प्र + स्था गतिनिवृत्तौ आत्म-लिट्-प्र-पु-ए-व।
प्रतस्थे - प्रतस्थाते - प्रतस्थिरे।

**व्याकरणविशेषः** - प्रतस्थे - प्र पूर्वक स्था धातोः योगे आत्मनेपदम्।

**७२. राजा धर्मपत्नीसहितः रथेन ययौ।**

**श्रोत्राभिरामध्वनिना रथेन**
**स धर्मपत्नीसहितः सहिष्णुः।**
**ययावनुद्घातसुखेन मार्गं**
**स्वेनेव पूर्णेन मनोरथेन।।७२।।**

**पदच्छेदः** - ययावनुद्घातसुखेन - ययौ + अनुद्घातसुखेन।
स्वेनेव - स्वेन + इव।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| धर्मपत्नीसहितः | - | सुदक्षिणासहितः |
| सहिष्णुः | - | सहनशीलः |
| सः | - | दिलीपः |
| श्रोत्राभिरामध्वनिना | - | श्रवणाह्लादकरशब्देन |
| अनुद्घातसुखेन | - | विघ्नरहितेन सुखेन |
| रथेन | - | स्यन्दनेन |
| स्वेन पूर्णेन मनोरथेन इव | - | स्वकीयेन सफलेन मनोरथेन इव |
| मार्गं | - | अयोध्यापुरपथं |
| ययौ | - | अगच्छत्। |

**सारः** - सपत्नीकः सः रथारूढः प्रस्थितः। रथस्य स्तिमितगतिना स्निग्धस्वनेन च प्रचलितं प्रयाणं दिलीपस्य सफलमनोरथेन सम्पन्नम् इव आसीत्।

**विग्रहः** - धर्मपत्नीसहितः - धर्मपत्न्या सहितः।

श्रोत्राभिरामध्वनिना - श्रोत्रयोः अभिरामः ध्वनिः यस्य सः श्रोत्राभिरामध्वनिः, तेन।

मनोरथेन - मनसः रथः मनोरथः, तेन।

**अलङ्कारः** - उत्प्रेक्षा।

**क्रिया** - ययौ - या प्रापणे पर-लिट्-प्र-पु-ए-व।

ययौ - ययतुः - ययुः।

**७३. प्रजाः तं तृप्तिमनाप्नुवद्भिः नेत्रैः पपुः।**

**तमाहितौत्सुक्यमदर्शनेन**
**प्रजाः प्रजार्थव्रतकर्शिताङ्गम्।**
**नेत्रैः पपुस्तृप्तिमानाप्नुवद्भि-**
**र्नवोदयं नाथमिवौषधीनाम्।।७३।।**

**पदच्छेदः** - तमाहितौत्सुक्यमदर्शनेन - तम् + आहितौत्सुक्यम् + अदर्शनेन।

पपुस्तृप्तिमानाप्नुवद्भिः - पपुः + तृप्तिम् + अनाप्नुवद्भिः।

नाथमिवौषधीनाम् - नाथम् +इव + औषधीनाम्।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| अदर्शनेन | - | प्रवासनिमित्तेन दर्शनाभावेन |
| आहितौत्सुक्यम् | - | जनितदर्शनोत्कण्ठम् |
| प्रजार्थव्रतकर्शिताङ्गंतं | - | सन्तानार्थव्रतपालनेन कृशीकृतशरीरं |
| प्रजाः | - | जनाः |
| तृप्तिम् अनाप्नुवद्भिः नेत्रैः | - | तृप्तिम् अलभमानैः नेत्रैः |
| नवोदयं | - | नवाभ्युदयं |
| ओषधीनां नाथम् इव | - | सोमम् इव |

| | | |
|---|---|---|
| तं | - | राजानं |
| पपुः | - | सतृष्णम् अवलोकितवन्तः। |

**सारः** - यथा कृष्णपक्षे चन्द्रस्य अदर्शनात् उत्कण्ठा भवति, तथा राज्ञः अदर्शनात् प्रजाः उत्कण्ठिताः आसन्। प्रजार्थं व्रतम् आचरितवान् दिलीपः कृशकायः सञ्जातः। इदानिम् उदयन्तं चन्द्रमिव प्रशोभमानं दिलीपं प्रजाः साकूतमवलोकितवन्तः।

**विग्रहः** - अदर्शनेन - न दर्शनम् अदर्शनम्, तेन।
प्रजार्थव्रतकर्शिताङ्गम् - प्रजार्थव्रतेन कर्शितम् अङ्गं यस्य सः, तम्।
अनाप्नुवद्भिः - न आप्नुवन्तः अनाप्नुवन्तः,तैः।
नवोदयम् - नवः उदयः यस्य सः नवोदयः, तम्।

**अलङ्कारः** - उपमा।

**क्रिया** - पपुः - पा पाने पर-लिट्-प्र-पु-ब-व।
पपौ - पपतुः - पपुः।

**७४. पुरं प्रविश्य सः पुनरपि स्वभुजे भूमेर्धुरमाससञ्ज।**

**पुरन्दरश्रीः पुरमुत्पताकं**
**प्रविश्य पौरैरभिनन्द्यमानः।**
**भुजे भुजङ्गेन्द्रसमानसारे**
**भूयः स भूमेर्धुरमाससञ्ज।।७४।।**

**पदच्छेदः** - पुरमुत्पताकम् - पुरम् + उत्पताकम्।
पौरैरभिनन्द्यमानः - पौरैः + अभिनन्द्यमानः।
भूमेर्धुरमाससञ्ज - भूमेः + धुरम् + आससञ्ज।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| पुरन्दरश्रीः | - | इन्द्र इव ऋद्धिमान् |
| सः | - | दिलीपचक्रवर्ती |
| पौरैः | - | अयोध्यावासिभिः |
| अभिनन्द्यमानः | - | आशंस्यमानः |
| उत्पताकं | - | उच्छ्रितध्वजं |
| पुरं | - | नगरं |
| प्रविश्य | - | उपगम्य |
| भुजङ्गेन्द्रसमानसारे | - | सर्पराजस्य आदिशेषस्य तुल्यबले |

| | | |
|---|---|---|
| भुजे | - | बाहौ |
| भूयः | - | पुनः |
| भूमेः | - | पृथिव्याः |
| धुरं | - | भारं |
| आससज्ज | - | स्थापितवान्। |

**सारः** - अनुष्ठितव्रतः प्राप्तवरः देवेन्द्रतुल्यः दिलीपः राजधानीं प्रत्यागत्य भूयः राज्यभारं भुजगेन्द्रसदृशे स्वभुजे आरोपितवान्। प्रजाः तम् अभिनन्दन्ति स्म।

**विग्रहः** - पौरैः - पुरे भवाः पौराः, तैः।

उत्पताकम् - उच्छ्रिताः पताकाः यस्मिन् तत् उत्पताकम्।

**क्रिया** - आससञ्ज - आङ्पूर्वक सज् गतौ पर-लिट्-प्र-पु-ए-व।

आससज्ज - आससज्जतुः - आससज्जुः।

**७५. अथ नरपतिकुलभूत्यै राज्ञी गर्भमाधत्त।**

**अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः**
**सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम्।**
**नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी**
**गुरुभिरभिनिविष्टं लोकपालानुभावैः।।७५।।**

**पदच्छेदः** - ज्योतिरत्रेरिव - ज्योतिः + अत्रेः +इव।

सुरसरिदिव - सुरसरित् +इव।

गुरुभिरभिनिविष्टम् - गुरुभिः + अभिनिविष्टम्।

| **अन्वयः** | | **अन्वायार्थः** |
|---|---|---|
| अथ | - | अनन्तरं |
| द्यौः | - | आकाशं |
| अत्रेः | - | अत्रिमुनेः |
| नयनसमुत्थं | - | नेत्रोत्पन्नं |
| ज्योतिः इव | - | प्रकाशमिव |
| सुरसरित् | - | मन्दाकिनी |
| वह्निनिष्ठ्यूतं | - | अग्निप्रक्षिप्तं |
| ऐशं तेजः इव | - | महेशतेजः इव |
| राज्ञी | - | सुदक्षिणा |
| नरपतिकुलभूत्यै | - | दिलीपकुलैश्वर्याय |
| गुरुभिः | - | महद्भिः |

| | | |
|---|---|---|
| लोकपालानुभावैः | - | अष्टलोकपालतेजोभिः |
| अभिनिविष्टं | - | अनुप्रविष्टं |
| गर्भम् आधत्त | - | गर्भं धृतवती। |

**सारः** - यथा आकाशम् अत्रिमुनेः नयनोत्पन्नम् इन्दुं धारयति, यथा भागीरथी पावकप्रक्षिप्तस्कन्दोत्पादकं शिवसम्बन्धि तेजः दधार, तथैव राज्ञी सुदक्षिणापि दिलीपकुलभूतये महद्भिः अष्टलोकपालानां तेजोभिः अनुप्रविष्टं गर्भं धृतवती।

**क्रिया** - आधत्त - आङ् पूर्वस्य डुधाञ् धारणे आत्म-लङ्-प्र-पु-ए-व।
आधत्त - आदधतां - अदधत।

**वृत्तम्** - मालिनी। ननमयययुतेयं मालिनी भोगिलोकैः।

## पुनरावृत्तिः (Recap)

- राजा दिलीपः राजधानीं प्रति गन्तुं आरभाते।
- दिलीपः कामधेनुसुतां नन्दिनीं गुरुं गुरुपत्नीं च नमस्कृतवान्।
- राजा दिलीपः राज्यकार्येषु पुनरपि व्यापृतवान्।
- यथाकालं अत्रेः ज्योतिरिव राज्ञी सुदक्षिणा गर्भमादत्त ।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. औधस्यमिच्छामि तवोपभोक्तुम् - कदा?
२. तौ दम्पती स्वां प्रति राजधानीं ययतुः - कुत्र?
३. कां परिरक्षितुं दिलीपः स्वशरीरं समर्पितवान्?
४. कस्य मनोरथसाफल्यं अभवत् ?
५. काः दिलीपं साकूतं अवलोकितवन्तः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।
## (Answer the following questions in one or two sentences)

१. दिलीपः नन्दिनीं कीदृशं तनयं याचितवान्?
२. सन्तानकामं राजानं नन्दिनी किमादिदेश?
३. पपौ वसिष्ठेन् कृताभ्यनुज्ञः - किं पपौ? कः?
४. प्रतस्थे सन्मङ्गलोदग्रतरप्रभावः - कः? किं कृत्वा?

५. शशंस वाचा पुनरुक्तयेव - कः? कस्यै?

## निर्दिष्टाभ्यासः (Assignments)

१.नन्दिनीदिलीपयोः भाषणम्।
२.कालिदासस्य रघुवंशमहाकाव्ये चतुर्थसर्गे वर्तमानानां प्रथमानां एकादशश्लोकादारभ्य विंशतिः पर्यन्तानां श्लोकानां पठनं कार्यम्।

## उत्तराणि (Answer to Objective type questions)

१. वत्सस्य होमार्थविधेः च शेषम्।
२. अयोध्याम्।
३. नन्दिनीम्।
४. दिलीपस्य।
५. प्रजाः।

## अधिकवाचनाय ग्रन्थाः (Suggested Readings)


१. कालिदासः, रघुवंशमहाकाव्यम्, सर्गः द्वितीयः, व्याख्या टि.के.रामचन्द्र अय्यर्, आर्.एस्.वाध्यार् आन्ड् सन्स्, कल्पात्ति, पालक्काट्,२०१३।
२. कालिदासः, रघुवंशमहाकाव्यम्, व्याख्या,कुट्टिटकृष्णमारार्, मातृभूमि पब्लिक्केषन्स्, कोट्टयम्।
३. कालिदासः, रघुवंशमहाकाव्यम्,हिंदी टीका, श्रीब्रह्मशङ्करमिश्रः साहित्यशास्त्री.चौखम्बा संस्कृतसीरीज़ बनारस्।

BLOCK - 5

# गद्यपरिचयः

# बालरामायणम् ।

## (पि.एस्.अनन्तनारायणशास्त्री)

# Unit – 1

## बालकाण्डम्-(खण्डिका १-५)

### उद्देश्यानि (Learning Outcomes)

- भाषायाः स्वरूपं ज्ञातुम्।
- संस्कृतभाषां प्रति प्रीत्युत्पादनम्।
- संस्कृतेः ज्ञानम्।
- इतिहासावबोधः।
- नूतनपदावलीपरिचयः जायते। पद-पदार्थबन्धं स्थापयति।
- आशयावगतिः।
- बालरामायणस्य बालकाण्डस्य कथासारं प्राप्नोति।
- खण्डिकायाः अर्थग्रहणं लभते।

### प्राग्व्यपेक्षाः (Prerequisites)

हे छात्राः,

संस्कृतपत्रस्य प्रथमे सत्रे (semester) कार्ये कियत्पर्यन्तम् अस्माभिः पठितम्?

छात्राः - शब्दपरिचयार्थं कतिपयानां शब्दानां रूपाणि।

अध्यापकः - पुनः?

छात्राः - क्रियापदज्ञानार्थं कतिपयानां धातूनां सर्वेषु लकारेषु वर्तमानानि रूपाणि।

अध्यापकः - आम्। पुनः?

छात्राः - रघुवंशस्थाः केचन श्लोकाः।

अध्यापकः - जानाम्यहम्। इदानीं कश्चित् भागः अवशिष्यते। बालरामायणादेकः भागः पठनीयः। सांस्कारिकं महत्त्वं प्रत्यभिजानाति। भवतु नाम।

| **प्रश्नाः** | **सम्भावितोत्तराणि च** |
|---|---|
| आदिकाव्यं किम्? | रामायणम् आदिकाव्यं भवति। |
| आदिकविः कः? | आदिकविः वाल्मीकिः भवति। |
| रामायणस्य सविशेषताः काः? (एकैकं सूचयतु) | १. आर्षसंस्कारसूचकम्।<br>२.लोकसाहित्ये समुन्नतं स्थानं वहति। |

३. भारतीयानां चित्तेषु स्थिरप्रतिष्ठां प्रापुः।
४. भारतीयानां ऐक्यस्य आधारशिला।
५. उत्तमं सौन्दर्यानुभूतिदायकं च भवति।

भवतु तावत्। रामायणे किं वर्णयति? रामायणे रामस्य सीतायाः च वृत्तान्तं वर्णयति।
रामायणसम्बद्धाः अनेके कार्याः सन्ति। तेषु अवश्यमस्माभिः ज्ञेयानि कार्याणि वयं विशदीकरिष्यामः।

वाल्मीकिः पूर्वं कश्चन निषादः आसीत्। रत्नाकरः इति नाम। वने वसन् सः अन्यान् जनान् पीडयित्वा धनानि सम्पाद्य जीवितमधारयत्। एकदा वनमार्गेण आगतानाम् ऋषीणाम् उपदेशानुसारं सः तपश्चरणे निमग्नः भूत्वा कालमनैषीत्। कालान्तरे सप्तर्षीणां प्रत्यागमनसमये वल्मीकात् प्रबुध्य सः वाल्मीकिः भूत्वा आश्रमे अवसत्।

एकदा क्रौञ्चद्वन्द्वे अन्यतरस्य विलापेन शोकमनुभूय सः अज्ञात्वा

मा निषाद प्रतिष्ठां त्वमगमः शाश्वती समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।'इति श्लोकं पपाठ।

तं श्लोकमुपजीव्य वाल्मीकिना रामायणं रचितम्। तद् काव्यम् 'आदिकाव्यम्'इति प्रथां प्राप। भारतीयासु सर्वासु भाषासु वाल्मीकिरामायणस्य प्रभावं दृश्यते। लोकभाषास्वपि रामायणस्य स्वाधीनता वर्तते।

वात्मीकिरामायणस्य प्रभावेण संजाताः ग्रन्थाः बहवः एव। कतिपयाः ग्रन्थाः अधो निर्दिष्टाः भवन्ति।

| ग्रन्थाः | | ग्रन्थकर्तारः |
|---|---|---|
| रघुवंशः | - | कालिदासः |
| सेतुबन्धः | - | प्रवरसेनः |
| रावणवधः | - | भट्टिः |
| जानकीहरणम् | - | कुमारदासः |
| रामचरितम् | - | अभिनन्दः |
| रामायणकथामञ्जरी | - | क्षेमेन्द्रः |
| चम्पूरामायणम् | - | भोजराजः |
| राघवीयम् | - | रामपाणिपादः |
| प्रतिमानाटकम्, अभिषेकनाटकम् | - | भासः |
| उत्तररामचरितम्, महावीरचरितम् | - | भवभूतिः |
| कुन्दमाला | - | दिङ्नागः |
| अनर्घराघवम् | - | मुरारिः |
| आश्चर्यचूडामणिः | - | शक्तिभद्रः |

## मुख्यपदानि (Keyterms)

पावनम्, अयोध्या नगरी, दशरथो नाम राजर्षिः, वसिष्ठः, यज्ञकर्म, पायसं, साङ्गेषु वेदेषु, समभूजयत्।

## Discussion

भारते रामायणप्रभावेन संजाताः ग्रन्थाः सहस्रसंख्यकाः भवन्ति। केरलेषु अपि रामायणप्रभावेन सञ्जाताः संस्कृतग्रन्थाः अनेके सन्ति। तेषु अन्यतमं भवति अनन्तनारायणशास्त्रिमहोदयेन रचितं बालरामायणम् इति गद्यकाव्यम्।बालरामायणस्य कर्ता भवति पि.एस्.अनन्तनारायणशास्त्री। सः महाशयः केरलेषु तृश्शिवपुरे पुतुक्कोट् देशे १८८५ तमे वर्षे अजायत। पिता सीतारामय्यः, माता नारायणी अम्मा च आस्ताम्। तस्य गुरवः पुतुक्कोट्टु रामशास्त्री, वाटानुक्कुरिश्शि नारायणशास्त्री, पुन्नश्शेरि नम्पी, नीलकण्ठशर्मा, आर्.वी.कृष्णमाचार्यः चासन्। सोऽयं महाभागः १९०९ तमे वर्षे तृप्पूणित्तुरा विद्वत्सदसः पण्डितराजः इति बिरुदं सम्पादितवान्। एरणाकुले महाराजमहाविद्यालये संस्कृताध्यापकेन विराजमानः सः १९४६ तमे वर्षे दिवंगतः। बहुभाषापण्डितः प्रसाधकः निरूपकः इत्येवं रूपेण जाज्वल्यमानः सः अनेकानां ग्रन्थानां व्याख्यानमपि रचितवान्। अस्य योगदानं संक्षिप्ततया अधो दीयते।

| **संस्कृतभाषायाम्** | **व्याख्याग्रन्थाः** |
|---|---|
| १. कोकिलसन्देशः | विवृतिः-अच्युतपिषारटिनःप्रवेशकस्य व्यख्या |
| २. कृष्णविजयम् | अनुस्वानम् - भगवद्गीतायाः व्यख्यानम् |
| ३. तर्कसारः | देवीमाहात्म्यम् |
| ४. बालरामायणम् | नारायणीयम् |
| ५. वाक्यतत्वम् | मेघसन्देशविमर्शनम् |
| ६. विटराजविजयम् | |

एषु अनुस्वानं, देवीमाहात्म्यं, नारायणीयं मेघसन्देशविवर्तनं च कैरल्यां वर्तमानानि व्याख्यानानि भवन्ति।

मङ्गलश्लोकमवतरति - कल्याणानां निधानमिति। यत्किमपि मङ्गलकार्याचरणसमये भारतीयाः मङ्गलाचरणं कुर्वन्ति। किमर्थम्? निर्विघ्नपरिसमाप्त्यर्थम्। पुस्तकरचनावसरे बहुविधाः विघ्नाः कदाचित् सम्भवेयुः। तादृशानां विघ्नानां निवारणाय पूर्वसूरयः मङ्गलमाचरन्ति। इष्टदेवतानमस्कारपूर्वकं मङ्गलाचरणेन निर्विघ्नपरिसमाप्तिः जायते इति विश्वासः।अत्र अनन्तनारायणशास्त्रिमहाभागेन स्वग्रन्थस्य बालरामायणस्य निर्विघ्नपरिसमाप्त्यर्थं सर्वजगत्प्रभुं श्रीरामचन्द्रमेव स्तौति। मङ्गलाचरणेन न केवलं ग्रन्थकर्तुः किन्तु पठितॄणामपि मङ्गलं भूयात् इति विश्वासः।

**कल्याणानां निधानं कलिमलप्रमथनं पावनं पावनानाम्।**
**पाथेयं यन्मुमुक्षोः सपदि परपदप्राप्तये प्रस्थितस्य।।**
**विश्रामस्थानमेकं कविवरवचसां जीवनं सज्जनानाम्।**
**बीजं धर्मद्रुमस्य प्रभवतु भवतां भूतये रामनाम।।**

**पदच्छेदः** - यत् + मुमुक्षोः - यन्मुमुक्षोः।

विश्रामस्थानम् + एकम् - विश्रामस्थानमेकम्।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| कल्याणानाम् | - मङ्गलानाम् |
| निधानम् | - आवासभूमिः (आदिकारणम्) |
| कलिमलप्रमथनम् | - कलियुगे वर्तमानानां मलानां मालिन्यानां दूरीकरणयोग्यम्। |
| पावनानां पावनम् | - परमपवित्रम्। |
| परपदप्रप्तये | - परमलक्ष्यस्य मोक्षस्य प्राप्त्यर्थम् |
| प्रस्थितस्य | - यत्नं कुर्वतः (मोक्षप्राप्तिरेव कार्या इति विचिन्त्य यः तदर्थं यतते, तस्य) |
| यत् मुमुक्षोः | - यः मोक्षमिच्छतः, तस्य |
| सपदि | - सहसा |
| पाथेयम् | - पथि साधु (मार्गे भोक्तुं-पातुं योग्यम्) |
| कविवरवचसां | - कविश्रेष्ठानां वचसां (वचनानाम्) |
| एकं विश्रामस्थानम् | - एकमेवाश्रयस्थानम् |
| सज्जनानाम् | - सताम् |
| जीवनम् | - जीवनभूतम् (आश्रयभूतम्) |
| धर्मद्रुमस्य | - धर्मरूपस्य वृक्षस्य |
| बीजम् | - उत्पत्तिभूतमङ्कुरम् |
| रामनाम | - श्रीरामस्य नाम |
| भवतां | - भवज्जनानाम् (युष्माकं) |
| भूतये | - ऐश्वर्याय |
| प्रभवतु | - कारणत्वेन भवतु। |

**सारः -** समस्तानां मङ्गलानां निवासभूमिः भवति राममन्त्रम्। तद् कलियुगस्य मालिन्यदूरीकरणे समर्थं भवति। एतन्नाम परिशुद्धेषु विशुद्धमेव। ये मोक्षप्राप्तिं वाञ्चन्ति, तेभ्यः मोक्षदायकं भवति। रामनाममन्त्रेण मुमुक्षवः मोक्षं प्राप्नुवन्ति। कवीन्द्राणां वचसामाश्रयस्थानमेव तत्। सज्जनानां जीवनं भवति तत्। धर्मरूपस्य वृक्षस्य अङ्कुरं भवति रामनाम। तद् रामनाम युष्माकमैश्वर्याय कारणं भवतु।

**विग्रहः -**

पाथेयम् - पथि साधु। यात्रावेलायां मध्ये भक्षणाय उपयुक्तं द्रव्यमित्याशयः।

मुमुक्षोः - मोक्तुमिच्छा मुमुक्षा। मोक्तुम् इच्छुः मुमुक्षुः। तस्य मुमुक्षोः।

कविवरवचसाम् - कवीनां कविषु वा वरः (श्रेष्ठः) कविवरः। तेषां वचांसि कविवरवचांसि, तेषां कविवरवचसाम्।

धर्मद्रुमस्य - धर्म एव द्रुमः धर्मद्रुमः, तस्य धर्मद्रुमस्य।

**क्रिया-**

प्रभवतु - प्र पूर्वक भू सत्तायाम् इति धातोः पर लोट् प्रथमपुरुषैकवचनम्।

प्रभवतु - प्रभवतात् /प्रभवतां- प्रभवन्तु।

**पर्यायपदानि -**

कल्याणम् - मङ्गलम्, शुभम्, भावुकम्, भविकम्।

सपदि - द्रुतम्, तत्क्षणः, स्राक्, झटिति, सद्य।

सज्जनः - महाकुलः, महाकुलीनः, आर्यः, सभ्यः।

**गद्यम् - १**

कोसलनाम्नि समृद्धिमति जनपदे लोकविश्रुता मनुना स्वयं निर्मिता अयोध्या नाम नगरी आसीत्। तस्यां धर्मपरो विजितेन्द्रियो वैश्रवणोपमो लोकस्य परिरक्षिता दशरथो नाम राजर्षिरवर्तत। तस्य च कौसल्या, कैकेयी, सुमित्रेति तिस्रो भार्याः अभवन्। महात्मनस्तस्य राजर्षेः सुतार्थं तप्यमानस्यापि सुतो नाजायत। ततः स राजा पुरोधसा वसिष्ठेन ऋष्यश्रृङ्गं पुरस्कृत्य पुत्रार्थं यज्ञकर्म कारयामास। तस्मिन् यज्ञकर्मणि हुतवहात् प्रादुर्भूतो दिव्यपायससम्पूर्णं पात्रं दोर्भ्यां धारयन् प्राजापत्यः पुरुषो राजानमेवमब्रवीत्।

**व्याख्या**

**कोसल इति -** कोसलनाम्नि 'कोसलम्'इति नामधेयेन वर्तमानेसमृद्धिमति ऐश्वर्यवति, जनपदे देशे, लोकविश्रुता लोकप्रसिद्धा, मनुना मनुनामकेन आचार्येण, स्वयं निर्मिता आत्मना रचिता, अयोध्या नाम अयोध्या इति, नगरी पत्तनम्, आसीत् अवर्तत। कोसलराज्ये 'अयोध्या' नाम काचन नगरी आसीत्। वैवस्वतमनुना निर्मिता नगरी आसीत् अयोध्या इति। उक्तञ्च वाल्मीकिरामायणे 'मनुना मानवेन्द्रेण या पुरी निर्मिता स्वयम्'इति। नगरी (ई-स्त्री-प्र-एव)। नगरी - नगर्यौ - नगर्यः। नगरं, पुरं, पत्तनं, स्थानीयम् - पर्यायपदानि। जनपदे (अ-पु-स-एव)। जनपदे - जनपदयोः - जनपदेषु।

तास्यां नगर्यां धर्मपरः धर्मिष्ठः विजितेन्द्रियः जितेन्द्रियः वैश्रवणोपमः कुबेरतुल्यः लोकस्य भुवनस्य परिरक्षिता रक्षकः दशरथो नाम दशरथनामधेयः राजर्षिः राजा च असौ ऋषिः च अवर्तत आसीत्। तस्य दशरथस्य कौसल्या, कैकेयी, सुमित्रा चेति तिस्रः भार्याः भार्यात्रयम् अभवन् आसन्। तस्य (द-पु-ष-ए-व) तस्य - तयोः - तेषाम्। अभवन् (भूधातु-पर-लङ्-प्रपु-ब-व) अभवत् - अभवताम् - अभवन्। महात्मनस्तस्य महात्मनः तस्य दशरथस्य राजर्षेः राजा च असौ ऋषिः च राजर्षिः तस्य सुतार्थं पुत्रार्थं तप्यमानस्यापि दुःखितस्यापि सुतः पुत्रः नाजायत न जनिं प्राप। तप्यमानस्य +अपि - तप्यमानस्यापि। अजायत (जनी प्रादुर्भावे आत्म-लङ्-प्रपु-ए-व) अजायत - अजायेताम् - अजायन्त। अतः तेन स राजा भूपतिः पुरोधसा वसिष्ठेन पुरोहितेन वसिष्ठेन ऋष्यश्रृङ्गं पुरस्कृत्य विभाण्डकपुत्रस्य नेतृत्वे पुत्रार्थं सुतार्थं यज्ञकर्म यागं कारयामास कारितवान्। राजा (न-पु-प्र-ए-व) राजा - राजानौ - राजानः। पार्थिवः क्ष्माभृत्, नृपः, भूपः इत्यादीनि पर्यायपदानि। ऋष्यश्रृङ्गं (अ-पु-द्वि-ए-व) ऋष्यश्रृङ्गं - ऋष्यश्रृङ्गौ - ऋष्यश्रृङ्गाः।

तस्मिन् यज्ञकर्मणि यागे हुतवहात् अग्नेः प्रादुर्भूतः आविर्भूतः दिव्यपायससम्पूर्णं दिव्यपायसनिर्भरं पात्रं दौर्भ्यां भुजाभ्यां धारयन् वहन् प्राजापत्यः प्रजापतिसम्बन्धः पुरुषः राजानं भूपतिम् एवं वक्ष्यमाणप्रकारेण अब्रवीत् अवदत्। यज्ञाय कर्म यज्ञकर्म, तस्मिन् यज्ञकर्मणि। पयसः विकारः पायसम्, दिव्यं तत् पायसं दिव्यपायसम्, तेन सम्पूर्णं दिव्यपायससम्पूर्णम्। धारयन् (त-पु-प्र-ए-व)। धारयन् - धारयन्तौ - धारयन्तः।किमब्रवीत् इति सूचयति।

**गद्यम् - २**

'नृपशार्दूल! प्रजाकरमिदं देवनिर्मितं पायसं गृहाण प्रयच्छ चानुरूपाभ्यो महिषीभ्यः तासु त्वं लप्स्यसे पुत्रान्'इति। नृपतिः तत्प्रतिगृह्य तं पुरुषमभिवाद्य परमया मुदा समपूजयत्। परमभास्वरो दिव्यपुरुषः तत्रैवान्तर्दधे। प्रहृष्टो नरपतिरन्तःपुरं प्रविश्य कौसल्यायै पायसार्धं प्रथमं प्रददौ। द्वितीयादर्धादर्धं सुमित्रायै ददौ, ततोऽवशिष्टस्यार्धं कैकेय्यै दत्वा पुनरवशिष्टं सुमित्रायै प्रददौ। ताः महीपतेरुत्तमस्त्रियः पायसं तत्प्राश्य नचिरेणैव तेजस्विनो गर्भानधारयन्। ततश्च द्वादशे मासि नवम्यां तिथौ पुनर्वसुनक्षत्रे पञ्चसु ग्रहेषु स्वोच्चस्थानं गतेषु कौसल्या दिव्यलक्षणसंयुतं राममजनयत्, कैकेय्यां सत्यपराक्रमो भरतो जज्ञे, सुमित्रायां वीरौ लक्ष्मणशत्रुघ्नौ च जज्ञाते।

**व्याख्या**

**नृपशार्दूल इति-** नृपशार्दूल हे महाराज, प्रजाकरमिदं प्रजाहितकरं देवनिर्मितं देवैः निर्मितं पायसं गृहाण स्वीकुरु, अनुरूपाभ्यः महिषीभ्यः अनुयोग्याभ्यः भार्याभ्यः प्रयच्छ दीयतां च। तासु तव भार्यासु त्वं लप्स्यसे तुभ्यं लभते पुत्रान् सुतान् इति एवम्। नृपशार्दूल नृपः शार्दूलः इव नृपशार्दूलः, तत्सम्बोधने नृपशार्दूल। प्रशंसार्थे 'शार्दूल'इति प्रयोगः। प्रयच्छ (प्र + दाण् दाने- पर-लोट्-मपु-ए-व) प्रयच्छ, प्रयच्छतात् - प्रयच्छतम् - प्रयच्छत। महिषी - कृताभिषेकस्य पत्नी। लप्स्यसे (डुलभष् प्राप्तौ-आत्म-लृट्-मपु-ए-व)। लप्स्यसे - लप्स्येथे - लप्स्यध्वे।

नृपतिः राजा तथेति तथा करिष्यामि इति तत्प्रतिगृह्य तत्पायसं स्वीकृत्य तं पुरुषं दिव्यपुरुषम् अभिवाद्य अभिवादनं कृत्वा परमया मुदा अधिकेन सन्तोषेण समपूजयत् सम्यक् अर्चयामास। परमभास्वरः प्रशोभमानः सः दिव्यपुरुषः तत्रैव तस्मिन् यागभूमौ एव अन्तर्दधे अप्रत्यक्षो बभूव। तत्र + एव अन्तर्दधे - +तत्रैवान्तर्दधे। अन्तर्दधे ('अन्तर्' पूर्वस्य डुधाञ् धारणपोषणयोः-आत्म-लिट्-प्रपु-ए-व) अन्तर्दधे - अन्तर्दधाते - अन्तर्दधिरे। प्रहृष्टः सन्तुष्टः नरपतिः राजा अन्तःपुरं प्रविश्य कौसल्यायै प्रथममहिष्यै पायसार्धं पायसस्यार्धभागं प्रथमं आद्यतया प्रददौ अदात्। कौसल्यायै (आ-स्त्री-च-ए-व) द्वितीयाद् अवशिष्टस्य पायसस्य अर्धादर्धं चतुर्भागेषु अन्यतमं भागं सुमित्रायै ददौ ततः अनन्तरं अवशिष्टस्यार्धम् अवशिष्टभागस्य अर्धभागं कैकेय्यै दत्वा कैकेयीं प्रति दत्वा पुनरवशिष्टं पुनरप्यवशिष्टं सुमित्रायै प्रददौ सुमित्रायै अदात्। ततः+अवशिष्टस्य +अर्धम् - ततोऽवशिष्टस्यार्धम्। सुमित्रायै प्रददौ, कैकेय्यै दत्वा इत्यादिषु दानार्थकधातोः योगे चतुर्थी। सुमित्रायै, कैकेय्यै इत्यादीनि रूपाणि। ताः महीपतेः उत्तमस्त्रियः ताः राज्ञः महिष्यः कौसल्यासुमित्राकैकेय्यः पायसं तत्प्राश्य तत्पायसं भक्षयित्वा नचिरेणैव कालविलम्बं विना तेजस्विनो गर्भान् दीप्तिमतः गर्भलक्षणान् अधारयन् दधिरे। प्राश्य (प्र पूर्व अश् भोजने ल्यप्) ततश्च द्वादशे मासि नवम्यां तिथौ पुनर्वसुनक्षत्रे पञ्चसु ग्रहेषु स्वोच्चस्थानं गतेषु यदा पञ्चग्रहाः उच्चावस्थायाम् अवर्तन्त तदा कौसल्या दिव्यलक्षणयुतं दिव्यलक्षणेन युक्तं रामं श्रीरामम् अजनयत् प्रसूते, कैकेय्यां सत्यां पराक्रमः पराक्रमशीलः भरतः जज्ञे अजायत, सुमित्रायां सुमित्रादेव्यां लक्ष्मणशत्रुघ्नौ लक्ष्मणः शत्रुघ्नः इति नामानौ च जज्ञाते अजायेताम्। अजनयत् (जनी प्रादुर्भावे- पर-णिचि-लङ्-प्रपु-ए-व) अजनयत् - अजनयताम् - अजनयन्।

**गद्यम् - ३**

ते च राजपुत्राः शैशवमतीत्य साङ्गेषु वेदेषु च सर्वेषु शास्त्रेषु नैपुण्यं प्रत्यपद्यन्त। परस्परमतिमात्रमनुरक्तानां तेषां मध्ये लक्ष्मणस्य ज्येष्ठे रामे, शत्रुघ्नस्य च भरते काप्यसाधारणप्रीतिरभवत्। राजा दशरथश्चतुर्भिर्महाभागैः पुत्रैः परमप्रीतो बभूव। विवाहार्हे वयः प्राप्तानां तेषां दारक्रियां प्रति चिन्तयति दशरथे, विश्वामित्रो महामुनिरयोध्यां प्रपेदे।

**व्याख्या**

**ते इति** ते राजपुत्राः श्रीरामादयः राजकुमाराः शैशवमतीत्य साङ्गेषु वेदेषु अङ्गैः सह वर्तमानेषु वेदेषु (वेदाङ्गाः षट् - शिक्षा,कल्पं, व्याकरणं, छन्दः, निरुक्तं, ज्योतिषम् इत्यादिषु, वेदाः चत्वारः ऋक्-यजुस्-साम-अथर्वणः) च सर्वेषु शास्त्रेषु च नैपुण्यं सामर्थ्यं प्रत्यपद्यन्त प्राप्तवन्तः। परस्परम् अन्योन्यं अतिमात्रम् अत्यधिकम् अनुरक्तानां अनुरागिणां तेषां कुमाराणां मध्ये लक्ष्मणस्य लक्ष्मणकुमारस्य ज्येष्ठे रामे शत्रुघ्नस्य च भरते कापि असाधारणी असामान्या प्रीतिरभवत् तृप्तिरभवत्। अतिशयेन वृद्धः प्रशस्यो वा ज्येष्ठः। राजा दशरथः चतुर्भिः महाभागैः पुत्रैः परमप्रीतः नितरां सन्तुष्टो बभूव अभवत्। बभूव (भू सत्तायां-पर-लिट्-प्रपु-ए-व) बभूव - बभूवतुः - बभूवुः। विवाहार्हे विवाहाय योग्ये वयःप्राप्तानां यौवनप्राप्तानां तेषां कुमाराणां, दारक्रियां प्रति चिन्तयति दशरथे यथा दशरथः कुमारेभ्यः अनुयोज्यान् दारान् योजयितुं चिन्तितवान् तदा (सति सप्तमी) विश्वामित्रो महामुनिः विश्वामित्रनामकः महर्षिः अयोध्यां प्रपेदे अयोध्यां प्राप। प्रपेदे (प्र पूर्व आप्लृ प्रापणे आत्म-लिट्-प्रपु-ए-व) प्रपेदे - प्रपेदाते - प्रपेदिरे।

**गद्यम् - ४**

दशरथस्तमतिथिं प्रत्युद्गम्य यथाविधि समपूजयत्। मुनिरपि प्रतिगृह्य तां पूजां पुरे, कोशे, जनपदे, बान्धवेषु, सुहृत्सु च राज्ञः कुशलं पर्यपृच्छत्। अथ हृष्टमना राजा विश्वामित्रमुवाच - 'भगवन्, स्वागतं ते, अपुत्रस्येव पुत्रजन्म, तवेदमागमनं मन्ये। कं वा भवतः कामं करवाणि' इति।

**व्याख्या**

**दशरथ इति -** दशरथः तमतिथिं तं विश्वामित्रं, प्रत्युद्गम्य स्वीकृत्य यथाविधि विधिमनतिक्रम्य समपूजयत् सम्यक् अर्चयामास। मुनिरपि विश्वामित्रोऽपि तां पूजां प्रतिगृह्य तमतिथिसत्कारं स्वीकृत्य पुरे पत्तने, कोशे भण्डागारे, राष्ट्रे राज्ये, जनपदे देशे, बान्धवेषु बन्धुजनेषु, सुहृत्सु मित्रेषु च राज्ञः महाराजस्य कुशलं सौख्यं पर्यपृच्छत् अन्वेषितवान्। अथ अनन्तरं हृष्टमनाः सन्तुष्टचित्तः राजा विश्वामित्रम् उवाच अवोचत्। हृष्टः मनाः यस्य सः हृष्टमनाः। भगवन् हे महाशय, ते स्वागतं तुभ्यं स्वागतं अपुत्रस्य पुत्रजन्म इव अविद्यमानपुत्रस्य पुत्रलाभ इव तवेदमागमनं भवतः इदमागमनं मन्ये अहं मन्ये। तव + इदम् +आगमनम् - तवेदमागमनम्। तव (दकारान्तः-त्रिषु लिङ्गेषु समानः-युष्मद् शब्दः ष-ए-व)। भवतः कं कामं तव अभीष्टं कं कार्यं करवाणि इति अहं करवाणि। भवते मया किं कर्तव्यम् इति आशयः।

**गद्यम् - ५**

महातेजा विश्वामित्रः प्रत्यभाषत - 'राजन्, सर्वमेतदुपपन्नं महावंशप्रसूते वसिष्ठशिष्ये च भवति। अहं यदर्थमागतोऽस्मि तदाकर्ण्यताम्। सिद्ध्यर्थं नियममतिष्ठितो मे सुबाहुमारीचौ राक्षसौ विघ्नकरौ वर्तेते। न च मे व्रतमध्ये क्रोधावेशो युज्यत इति शापेन तयोर्निवारणमशक्यम्। तयोर्विनाशाय ज्येष्ठं पुत्रं रामं मे दातुमर्हसि' इति।

**व्याख्या - महातेजेति।**

महातेजा तेजस्वी विश्वामित्रः प्रत्यभाषत प्रत्युत्तरमदात् - राजन् हे महाराज, महावंशप्रसूते उन्नतकुलजाते वसिष्ठशिष्ये वसिष्ठस्य शिष्ये भवति दशरथे सर्वमेतदुपपन्नं एतत्सर्वं योज्यमेव। अहं विश्वामित्रः, यदर्थमागतोऽस्मि यत्कारणार्थं सम्प्राप्तवानस्मि तदाकर्ण्यतां तत्कार्यं श्रूयताम्। यदर्थम् +आगतः +अस्मि - यदर्थमागतोऽस्मि। सिद्ध्यर्थं सिद्धये नियममतिष्ठितः मे व्रतं कुर्वतः मम (विश्वामित्रस्य) सुबाहुमारीचौ राक्षसौ सुबाहुमारीचनामानौ निशिचरौ विघ्नकरौ अन्तरायकरौ वर्तेते। वर्तेते (वृतु वर्तने-आत्म-लट्-प्रपु-द्वि-व)। व्रतमध्ये व्रतानुष्ठानमध्ये क्रोधावेशः क्रोधप्रकटनं न युज्यत इति अननुयोज्यमित्यतः, शापेन आक्रोशेन तयोर्निवारणं राक्षसयोः वारणं, अशक्यं न श्क्यम्। तयोः राक्षसयोः। तयोः (द-पु-ष-द्वि-व) तस्य - तयोः - तेषाम्। विनाशाय नाशाय ज्येष्ठं पुत्रं रामं श्रेष्ठं सुतं श्रीरामं, मे दातुमर्हसि मह्यं त्वं दीयस्व, इति एवम्।

## पुनरावृत्तिः (Recap)

- मङ्गलश्लोके श्रीरामं स्तौति।
- कोसलराज्ये वैवस्वतमनुना निर्मिता अयोध्या नाम नगरी आसीत्।
- तत्र दशरथो नाम राज्ञे तिस्रः भार्याः। कौसल्या, कैकेयी, सुमित्रा चेति।
- दशरथस्य सन्ततिः नासीत् तदर्थं वसिष्टोपदेशेन पुत्रकामेष्टिं कारायामास।
- कालान्तरे दशरथस्य चत्वारः पुत्राः आसन्।
- कौसल्यातनयः श्रीरामः। कैकेयी भरतमसूत।सुमित्रायां लक्ष्मणशत्रुघ्नौ पुत्रौ अजायेताम्।
- दशरथस्य राजपुत्राः श्रीरामलक्ष्मणभरतशत्रुघ्नाः शैशवमतीत्य वेदेषु वेदाङ्गेषु सर्वेषु शास्त्रेषु च नैपुण्यं प्रत्यपद्यन्त।
- तदैकदा महामुनिः विश्वामित्रः राजधानीम् आगतवान्।
- राजा विश्वामित्रं यथोचितं पूजितवान्।
- विश्वमित्रः तस्य आगनमनोद्देश्यं राजानां व्यतिज्ञपत्।
- विश्वामित्रः तदा एवमवदत्। ‘मम यागविघ्नकारिणौ राक्षसौ सुबाहुमारीचौ वर्तेते। तयोः विनाशाय ज्येष्ठं पुत्रं रामं मे दातुमर्हसि‘इति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. सज्जनानां जीवनं भवति तत्- तत् किम्?

२. 'भूतये'इत्यस्य अर्थः कः?
३. अयोध्यायाः अधिपतिः कः?
४. विभाण्डकसूनुः कः?
५. दानार्थकधातोः प्रयोगे का विभक्तिः?
६. दिव्यपुरुषेण दत्तस्य पायसस्य अर्धभागं कस्यै लब्धम्?
७. श्रीरामस्य जन्मनक्षत्रं किम्?
८. दशरथस्य पुत्राः केषु नैपुण्यं प्रापुः?
९. दशरथपुत्राः कीदृशाः आसन्?
१०. 'दाराक्रियां प्रति चिन्तयति दशरथे' - कीदृशोऽयं प्रयोगः?
११. 'यथाविधि'इत्यस्य विग्रहः कः?
१२. 'तव'इत्यस्य अन्तलिङ्गादीन् निर्दिशत।
१३. 'अर्हसि' - कः लकारः?
१४. व्रतानुष्ठनमध्ये कः नोचितः?

## एकेन वाक्येन  द्वाभ्यां वा उत्तराणि लिखत।

**(Answer the following questions in one or two sentences)**

१. बालरामायणे वर्तमानः मङ्गलश्लोकः कः?
२. कविवरवचसां विश्रामस्थानं किम्?
३. विधानमित्यस्य कोऽर्थः?
४. 'मुमुक्षुः' विग्रहः कः?
५. कं वैश्रवणतुल्यत्वेन गणयति?
६. दशरथस्य पुत्रकामेष्टियागे किं सम्भूतम्?
७. दशरथस्य भार्याः काः?
८. दशरथस्य पुरोहितः कः?
९. तासु त्वं लप्स्यसे पुत्रान् - कासु?
१०. लक्ष्मणस्य मातुः नाम किम्?
११. लक्ष्मणः सोदरेषु कस्मिन् असाधरणीं प्रीतिं प्राकटयत्?
१२. विश्वामित्रः महामुनिः किमर्थम् अयोध्यां प्राप?
१३. राज्ञः कुशलं पर्यपृच्छत् - कः?
१४. राजा दशरथः विश्वामित्रं किमपृच्छत्?
१५. यागस्य विघ्नकारिणौ राक्षसौ कौ?
१६. कुतः यागस्य विघ्नकारिणौ राक्षसौ विश्वामित्रः न शपति?

१७. कैकेय्याः पुत्रस्य नाम किम्?

## एकैकया खण्डिकया उत्तराणि लिखत।

**(Answer the question in a paragraph)**

१. अपुत्रस्य पुत्रजन्म, तवेदमागतं मन्ये।विशदयत।

## निर्दिष्टाभ्यासः (Assignments)

१. दशरथस्य पुत्राणाम् उत्पत्तिं विशदयत।
२. बालरामायणे वर्तमानस्य प्रथमस्य गद्यस्य आशयं कैरल्यां लिखन्तु।

**निर्देशानुसारम् उत्तरं लिखत।**

**I. अर्थं लिखत।**

१. परस्परम्।
२. कोशः।
३. महातेजाः।
४. विघ्नः।

**II. विग्रहं लिखत।**

१. राजर्षिः।
२. यज्ञकर्मणि।
३. पाथेयम्।
४. नृपशार्दूलः।
५. ज्येष्ठः।
६. महातेजाः।
७. वसिष्ठशिष्यः।
८. अशक्यम्।
९. विवाहार्हे।
१०. महामुनिः।
११. हृष्टमनाः।

**III. अन्तलिङ्गविभक्तिवचनानि निर्दिशत।**

१. जनपदे।

२. नगरी।

३. तस्य।

४. दाराः।

५. सुहृत्सु।

**IV. पर्यायपदानि लिखत।**

१. सुतः।

२. नृपतिः।

३. द्रुमः।

**V. धातुपदलकारपुरुषवचनानि लिखत।**

१. अन्तर्दधे।

२. अभवत्।

३. अजायत।

४. बभूव।

५. प्रपेदे।

६. अर्हसि।

७. पर्यपृच्छत्।

८. करवाणि।

**VI. व्याकरणकार्यं लिखत।**

१. सुमित्रायै ददौ।

२. नरपतिः।

**VII. सन्धत्त।**

१. तम् + अतिथिम्।

२. तव + इदम्।

३. आगतः + अस्मि।

## उत्तराणि (Answer to Objective type questions)

१. कल्याणानां निधानम् इत्यारभ्यमाणः श्लोकः।

२. ऐश्वर्याय।

३. दशरथः।
४. ऋष्यश्रृङ्गः।
५. चतुर्थी।
६. कौसल्यायै।
७. पुनर्वसुः।
८. वेदेषु, वेदाङ्गेषु, सर्वेषु शास्त्रेषु च नैपुण्यं प्राप्ताः।
९. परस्परमतिमात्रमनुरक्ताः।
१० सतिसप्तमीप्रयोगः।
११. विधिम् अनतिक्रम्य।
१२. द-त्रिषुलिङ्गेषु समानः-ष-ए-व।
१३. लट्।
१४ शापः।

## अधिकवाचनाय ग्रन्थाः (Suggested Readings)


१. पी.एस्. अनन्तनारायणशास्त्री, बालरामायणम्, व्याख्या टि.के.रामचन्द्र अय्यर्, आर्. एस्. वाध्यार् आन्ट् सन्स्, कल्पात्ति।
२. पि.एस्. अनन्तनारायणशास्त्रि, बालरामायणम्, व्यख्या पि.जि.अजित् प्रसाद्, अनामिका पब्लिक्केषन्स्, एलुकोण्, २००८.
३. डा. पूवट्टूर् रामतृष्णापिल्ल, केरलसंस्कृतविज्ञाननिघण्डु, केरलभाषा इन्स्टिट्यूट्, अनन्तपुरी, २०९६ पुटं ३०-३१

# Unit - 2

## खण्डिका ६-१०

### उद्देश्यानि (Learning Outcomes)

- भाषापठने नितरां तात्पर्योत्पादनम्।
- गद्यसाहित्यं प्रति परिचयप्रदानम्।
- काव्यरसानुभूतिः अनुभूयते।

### प्राग्व्यपेक्षाः (Prerequisites)

अयि सुहृदः,
प्रथमे एकके पठितं कार्यं युष्माभिः ज्ञातमिति विचारयामि। अनपत्यतया दूयमानः दशरथः पुत्रकामेष्टिं चकार। कालान्तरे तस्य चत्वारः पुत्राः अजायन्त। श्रीरामादीनां यौवनं, श्रीरामस्य साहाय्यं प्राप्तुं विश्वामित्रमहर्षेः आगमनादिकमधिकृत्य पठामः।
महामुनिः यागरक्षार्थं श्रीरामस्य साहाय्यमन्विष्य राजधानीं प्राप किल, सः मुनिः दशरथं रामं ययाचे। श्रीरामगुणगुणैराकृष्टः पुत्रवत्सलः महर्षये रामं दत्तवान् वा? पश्यामः। तदर्थं द्वितीयमेककं पठामः।

### मुख्यपदानि (Keyterms)

योत्स्यते, रामलक्ष्मणौ विश्वामित्रेण सह गच्छतः, बला- अतिबला, ताटका, नागसहस्रबला।

### Discussion

अयि भोः छात्राः,
महामुनिः यागरक्षार्थं श्रीरामस्य साहाय्यमन्विष्य राजधानीं प्राप किल, सः मुनिः दशरथं रामं ययाचे। श्रीरामगुणगुणैराकृष्टः पुत्रवत्सलः महर्षये रामं दत्तवान् वा? पश्यामः।

**गद्यम् - ६**

दशरथो विश्वामित्रस्य भाषितं श्रुत्वा मुहूर्तं निस्संज्ञो बभूव। ततः संज्ञां प्रतिपद्यैवमभाषत - 'ऊनषोडषवर्षः सुकुमाराङ्गो रामः कथं वा राक्षसैर्योत्स्यते। अहमेव धनुष्पाणिर्भवदीयं व्रतचर्यां गोप्तास्मि। यावत्प्राणान् धरिष्यामि, तावन्निशाचरैर्योत्स्ये च। तत्कृपया न रामं नेतुमर्हसि'इति।

**व्याख्या**

**दशरथ इति -** विश्वामित्रस्य भाषितं भाषणं श्रुत्वा आकर्ण्य दशरथः मुहूर्तम् अल्पसमयं निस्संज्ञः बोधरहितः बभूव। ततः अनन्तरं संज्ञां बोधावस्थां प्रतिपद्य प्राप्य एवं वक्ष्यमाणप्रकारेण अभाषत अवदत्। प्रतिपद्य + एवम् +अभाषत - प्रतिपद्यैवमभाषत। ऊनषोडशवर्षः इतः परं षोडशवयमप्राप्तं सुकुमाङ्गः कोमलाङ्गः रामः कथं वा केन प्रकारेण राक्षसैः निशाचरैः योत्स्यते युद्धं करिष्यति? राक्षसैः +योत्स्यते - राक्षसैर्योत्स्यते। अहमेव दशरथ एव धनुष्पाणिः धनुर्धारी भवदीयं भवतः इयं व्रतचर्या यागकार्यं गोप्तास्मि संरक्षकः भवामि। गोप्तास्मि - गोप्ता + अस्मि। अस्मि (अस भुवि पर-लट् - उपु - एव)। अस्मि - स्वः - स्मः। यावत् यावत्कालं प्राणान् असून् धरिष्यामि वर्ते तावत् तावत्कालं निशाचरैः राक्षसैः योत्स्ये युद्धं करिष्यामि च। धरिष्यामि (धृञ् धारणे-पर-लृट्-उपु-एव)। धरिष्यामि - धरिष्यावः - धरिष्यामः। तत्कृपया अतः कृपां भूत्वा रामं नेतुं आनयितुं न अर्हसि त्वं नार्हः भवसि इति।

**गद्यम् - ७**

पुत्रविष्लेषकातरस्य दशरथस्य वचनं निशम्य विश्वामित्रः कुपितो बभाषे - 'प्रथमं यं कमपि कामं करिष्यामीति प्रतिज्ञाय सम्प्रति प्रतिज्ञां हातुमिच्छसि। किमिदं साम्प्रतमिक्ष्वाकुवंशे जातस्य भवतः? यदीदं ते क्षमं तर्हि तथा कुरुष्व। अहं यथागतं गमिष्यामि। मिथ्याप्रतिज्ञस्त्वं चिराय सुखी भव'इति।

**व्याख्या**

**पुत्रेति -** पुत्रविश्लेषकातरस्य पुत्रस्य वियोगे दुःखितस्य दशरथस्य वचनं वाचं निशम्य आकर्ण्य विश्वामित्रः कुपितः कोपाकुलः बभाषे अभाषत। प्रथमं प्रथमतः यं कमपि कामं यं कार्यं इच्छति तत्कार्यं करिष्यामीति, प्रतिज्ञाय प्रतिज्ञां कृत्वा, सम्प्रति इदानीं, प्रतिज्ञां प्रतिज्ञापरिपालनं, हातुं त्यक्तुं इच्छसि अभिलषसि किम्? कम् +अपि - कमपि। किमिदं किमेतद् साम्प्रतम् इदानीम् इक्ष्वाकुवंशे जातस्य संजातस्य भवतः दशरथस्य। यदीदं ते क्षमं इदं कार्यं तुभ्यं योग्यं तर्हि चेत् तथा कुरुष्व तथा कुरु। अहं (विश्वामित्रः) यथागतम् आगतमनतिक्रम्य (यत्रतः आगतं तत्र) गमिष्यामि व्रजिष्यामि। गमिष्यामि (गम्लृ गतौ-पर-लृट्-उपु-ए-व)। गमिष्यामि - गमिष्यावः - गमिष्यामः। मिथ्याप्रतिज्ञः मिथ्यया प्रतिज्ञां कुर्वन् त्वं दशरथः चिराय बहुकालं सुखी सुखत्वेन भव त्वं भव।

**गद्यम् - ८**

कुपिते कौशिके कृत्स्ना वसुधा भयेन चचाल। देवानामपि महद्भयं बभूव। इत्थं भूते व्यतिकरे भगवान् वसिष्ठो राजानमाबभाषे - 'अहं वेद्मि महात्मनो रामस्यानुपमं पराक्रमम्। वृथा विशङ्कया इक्ष्वाकूणां कुले जातो धर्मात्मा च भवान्न धर्मं हातुमर्हति। विश्वामित्रेण गुप्तस्य रामभद्रस्य कुतो भेतव्यम्'इति।

**व्याख्या**

**कुपित इति -** कुपिते कौशिके यदा कौशिकः विश्वामित्रः कुपितवान् तदा कृत्स्ना सम्पूर्णा वसुधा भूमिः भयेन भीत्या चचाल चलितवती। देवानां दैत्यानाम् अपि महद्भयं अतिभयं बभूव अभवत्। इत्थं भूते व्यतिकरे अनेन प्रकारेण सम्भवे भगवान् वसिष्ठः वसिष्ठमुनिः राजानं दशरथम् आबभाषे बभाषे। भगवान् (त-पु-प्र-ए-व)। भगवान् - भगवन्तौ - भगवन्तः। महात्मनो रामस्य अनुपमम् अनितरसाधारणं पराक्रमम् अहं वेद्मि जानामि।

महान् आत्मा यस्य सः महात्मा तस्य महात्मनः। इक्ष्वाकूणां कुले जातानां इक्ष्वाकुकुलजातानां धर्मात्मा धर्मिष्टः भवान् वृथा मुधा विशङ्कया संशयेन धर्मं हातुं विनाशयितुं न अर्हति। इक्ष्वाकोः गोत्रापत्यानि पुमांसः ऐक्ष्वाकवः तेषाम् इक्ष्वाकूणाम्। ऐक्ष्वाकस्य - ऐक्ष्वाकयोः - इक्ष्वाकूणाम्। विश्वामित्रेण कौशिकेन गुप्तस्य संरक्षितस्य रामभद्रस्य रामस्य कार्यं प्रति कुतो भेतव्यं भयकारणं किम् इति।

**गद्यम् - ९**

तथा वदति वसिष्टे नृपतिः प्रहृष्टो राममाजुहाव। कृतस्वस्त्ययनं सलक्ष्मणं तं कौशिकाय प्रदाय गमनायानुमेने। प्रतिष्ठमाने च कौशिकानुयायिनि रामभद्रे महती पुष्पवृष्टिरासीत्। कौशिको राघवाभ्यां सहितः सरयूं तीर्त्वा दक्षिणां तीरमाससाद। ततो रामेति मधुरमामन्त्र्य मत्तो बलामतिबलां च विद्ये सानुजो गृहाणेति तमादिदेश। रामः प्रहृष्टो भावितात्मनो महर्षेः सकाशात्ते विद्ये सानुजो जगृहे। मध्येमार्गमविप्रहतं कमपि घोरं काननं दृष्ट्वा किन्विदं दारुणं वनम् इति रामः कौशिकं पप्रच्छ।

**व्याख्या**

**तथेति -** तथा वदति वसिष्ठे वसिष्ठः यदा अवदत् तदा प्रहृष्टो सन्तुष्टो नृपतिः राजा रामं श्रीरामम् आजुहाव आहूतवान्। तथा वदति वसिष्ठे - सति सप्तमीप्रयोगः। कृतस्वस्त्ययनं कृतं स्वस्त्ययनं यस्य तम्। सलक्ष्मणं लक्ष्मणेन सहितं तं रामं कौशिकाय विश्वामित्राय प्रदाय दत्वा गमनाय गन्तुम् अनुमेने अनुमतिमदात्। कौशिकानुयायिनि विश्वामित्रम् अनुगन्तुम् उत्सुके रामभद्रे रामे प्रतिष्ठमाने (सति) यदा कौशिकेन सह रामः गन्तुं प्रस्थितवान् तदा महती पुष्पवृष्टिः कुसुमानि वृष्टिरिव आसीत् अभूत् । कौशिकानुयायिनि कौशिकानुयायी तस्मिन्। कौशिकः विश्वामित्रः राघवाभ्यां रामलक्ष्मणाभ्यां सहितः सह सरयूं सरयूनदीं तीर्त्वा तरणं कृत्वा दक्षिणं तीरं आससाद प्राप। ततः रामेति मधुरमामन्त्र्य मन्त्रणं कृत्वा मत्तः मत्सकाशात् (विश्वामित्रसकाशात्) 'बला-अतिबला' नामिके विद्ये सानुजः लक्ष्मणसहितः रामः गृहाण स्वीकुरु, इति तमादिदेश तं राममुपदिष्टवान्। राम +इति - रामेति। सानुजः - अनुजेन सहितः। प्रहृष्टः सन्तुष्टः रामः भावितात्मनः भाविकालनिर्णेतुः (त्रिकालज्ञस्य) मुनेः वसिष्ठस्य सकाशात् समीपात् ते विद्ये ते बलातिबले जगृहे स्वीचकार। मध्येमार्गं मार्गमध्ये अविप्रहतं विनाशयितुमसाध्यं किमपि किञ्चन घोरं भयानकं काननं वनं दष्ट्वा पश्यन् किं नु इदं दारुणं वनम् किमिदं भयानकं काननम्, इति रामः श्रीरामः कौशिकं विश्वामित्रं प्रपृच्छ अपृच्छत्। किम् +अपि - किमपि।

**गद्यम् - १०**

महातेजा विश्वामित्रस्तमुवाच-

'वत्स श्रूयतामस्य दारुणस्य वनस्य वृत्तान्तः। पुरा किलात्र मदलकुरूषाभिधानं स्फीतं जनपदद्वयमवर्तत।सुन्दस्य भार्या मारीचस्य रक्षसो जननी ताटका नागसहस्रबला तदीदं विनाश्य काननतां निनाय। सेयं पथिकानां प्राणहारिणी इतोऽध्यर्थयोजने वसति। तामेनां निहत्य देशमिमं निष्कण्डकं कर्तुमर्हसि'इति।

**व्याख्या**

**महातेजेति-** महातेजाः तेजस्वी विश्वामित्रः महर्षिः तं श्रीरामम् उवाच अवदत्। उवाच (ब्रूञ् व्यक्तायां वाचि-पर-लिट्-प्र-पु-एव) उवाच - ऊचतुः - ऊचुः। वत्स पुत्र, अस्य दारुणस्य भयानकस्य वनस्य अरण्यस्य वृत्तान्तः चरितः श्रूयताम् आकर्णय। श्रूयताम् (श्रु श्रवणे-आत्म-लोट्-प्र-पु-ए-व) दारुणस्य (अ-नपुं-ष-एव)।

पुरा पूर्वं मदल-कुरुषाभिधानं मदलमिति कुरुषमिति नामयुक्तं स्फीतं समृद्धं जनपदद्वयं देशद्वयम् अत्र अस्मिन् स्थले अवर्तत आसीत् किल खलु। सुन्दस्य भार्या पत्नी मारीचस्य रक्षसो जननी माता ताटका ताटकानामधेया नागसहस्रबला सहस्रनागानां बलयुक्ता तदिदं इदं वनं विनाश्य नाशयित्वा, काननताम् अरण्यावस्थां निनाय अनयत्। सेयम् इयं ताटका पथिकानां यात्रिकाणां प्राणहारिणी प्राणापहरणशीला इतः अस्मत्स्थलात् अध्यर्धयोजने मा किं अर्धाधिकयोजने दूरे वसति वासं करोति। प्राणहारिणी -प्राणान् हर्तुं शीलं यस्याः सा। तामेनां तांताटकां निहत्य हत्वा निष्कण्डकम् उपद्रवरहितं कर्तुमर्हसि इति। त्वं तस्याः प्राणान् अपहरइत्याशयः।

## पुनरावृत्तिः (Recap)

- ‘यागरक्षायै श्रीरामं मया सह प्रेषयतु’इति विश्वामित्रवचनं श्रुत्वा दशरथः मोहालस्यं प्राप।
- अहमेव गत्वा राक्षसान् हनिष्यामि’इति मोहालस्यात् विमुक्तः दशरथः विश्वामित्रं याचितवान्।
- ‘प्रथमं यं कमपि कामं करिष्यामि इति प्रतिज्ञाय पुनः प्रतिज्ञालङ्घनम् इक्ष्वाकुवंशजातस्य तवोचितं वा’इति विश्वामित्रः दशरथमभाषत।
- विश्वमित्रस्य कोपेन वसुधापि भयेन चचाल।
- वसिष्ठमुनिः तदा दशरथमभाषत - ‘श्रीरामवैभवमहं जानामि। विश्वामित्रमुनेः संरक्षणे वर्तमानस्य रामस्य न कापि हानिः सम्भविष्यति। अपि च भवतः प्रतिज्ञालङ्घनं न सम्भवति’।
- सन्तुष्टः राजा सलक्ष्मणं रामं विश्वामित्रेण सह गमनाय अनुमेने।
- तेषां गमनवेलायाम् आकाशात् पुष्पवृष्टिरजायत।
- मार्गमध्ये विश्वामित्रः बला -अतिबला नामिके विद्ये सानुजं राममुपदिदेश।
- सरयूनदीं तीर्त्वा दक्षिणां तीरं प्रापुः।
- अतिघोरं काननं दृष्ट्वा ‘किं नु इदं दारुणं वनम्’इति श्रीरामः महर्षिमपृच्छत्।
- तेजस्वी विश्वामित्रः ताटकावृत्तान्तं रामलक्ष्मणौ अकथयत्।
- मलद-कुरुषाभिधाने जनपदे नागसहस्रबला ताटका नाशितवती।
- पथिकानां प्राणनाशने तत्परां तां त्वं जहि।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. विश्वामित्रः दशरथं रामं ययाचे। तदा किं सम्भूतम्?
२. ‘अहमेव धनुष्पाणिः भवदीयं व्रतचर्यां गोप्तास्मि’- कः?

३. 'अस्मि'- कः लकारः?
४. का नाम ताटका?
५. 'महातेजाः'इत्यस्य समानार्थकं पदं किम्?
६. 'श्रूयताम्' - कः लकारः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।
**(Answer the following questions in one or two sentences)**

१. 'यदीदं ते क्षमं तर्हि तथा कुरुष्व' - कस्येदं वचनम्? कं प्रति?
२. देवानामपि महद्भयं बभूव - कदा?
३. वसिष्ठमुनिः दशरथं किमुवाच?
४. रामलक्ष्मणौ घोरमेकं वनं ददर्शतुः - कुत्र?
५. 'तथा वदति वसिष्ठे' - कीदृशोऽयं प्रयोगः?
६. विश्वामित्रेण सह यागरक्षार्थं रामलक्ष्मणयोः गमनवेलायां किं सम्भूतम्?
७. रामलक्ष्मणौ प्राप्तयोः विद्ययोः नामनी के?
८. श्रीरामं विश्वामित्रेण प्रेषयितुं दशरथः प्रथमं विमुखः आसीत्। अस्य कारणं किम्?
९. दशरथस्य वचनं निशम्य विश्वाामित्रः कुपितो बभाषे - विश्वामित्रस्य कोपस्य कारणं किम्?

## एकैकया खण्डिकया उत्तराणि लिखत
**(Answer the following questions in a paragraph)**

**आशयं विशदयत।**
१. मिथ्याप्रतिज्ञस्त्वं चिराय सुखी भव।
२. किमिदं साम्प्रतमिक्ष्वाकुवंशे जातस्य भवतः।

## निर्दिष्टाभ्यासः (Assignments)

१. रामलक्ष्मणौ विश्वामित्रेण सह यागरक्षायै अगच्छताम्। तत्कार्यं संक्षिप्य लिखत।
२. बालरामायणे वर्तमानं द्वितीयं काण्डं वाचयतु।

**निर्देशानुसारम् उत्तरं लिखत।**

**I. अर्थं लिखत।**

१. इक्ष्वाकूणाम्।
२. प्राणान्।
३. प्रतिज्ञाय।
४. गमिष्यामि।
५. स्फीतम्।

**II. विग्रहं लिखत।**

१. सलक्ष्मणम्।
२. धनुष्पाणिः।
३. पुत्रविश्लेषकातरस्य।

**III. सन्धत्त।**

१. किम् + नु + इदम्।
२. प्रतिपद्य + एवम् + अभाषत।

**IV. कस्मिन् विभागे अन्तर्भवति?**

१. श्रुत्वा।
२. नेतुम्।
३. प्रतिपद्य।
४. आनयितुम्।
५. हातुम्।

## उत्तराणि (Answer to Objective type questions)

१. दशरथः मोहालस्यं प्राप।
२. दशरथः।
३. लट्।
४. सुन्दस्य भार्या।
५. तेजस्वी।
६. लोट्।

## अधिकवाचनाय ग्रन्थाः (Suggested Readings)


१. पी.एस्. अनन्तनारायणशास्त्री, बालरामायणम्, व्याख्या टि.के.रामचन्द्र अय्यर्, आर्. एस्. वाध्यार् आन्ट् सन्स्, कल्पात्ति।

२. पि.एस्. अनन्तनारायणशास्त्रि, बालरामायणम्, व्यख्या पि.जि.अजित् प्रसाद्, अनामिका पब्लिक्केषन्स्, एलुकोण्, २००८.

३. डा. पूवट्टूर् रामतृष्णपिल्ल, केरलसंस्कृतविज्ञाननिघण्डु, केरलभाषा इन्स्टिट्यूट्, अनन्तपुरी, २०९६ पुटं ३०-३१

# Unit - 3

## खण्डिका ११-१५

## उद्देश्यानि (Learning Outcomes)

- जीवितमूल्यानि अवगच्छति।
- गद्यरचनायै पाटवम् आर्जयति।
- आशयावगतिः।

## प्राग्व्यपेक्षाः (Prerequisites)

अयि मित्राणि,
द्वितीयमेककम् अस्माभिः पठितम्।दशरथस्य सभायामागतं विश्वामित्रं राजा दशरथः यथाविधि स्वीचकार। सत्कारं स्वीकृत्य कुशलप्रश्नानन्तरं यागरक्षायै श्रीरामं प्रेषयितुं विश्वामित्रः अभ्यर्थितवान्। प्रथमं वैमनस्यं प्रकटयन्नपि राजा वसिष्ठोपदेशमनुसृत्य सानुजं श्रीरामं विश्वामित्रेण सह प्रेषितवान्। यात्रामध्ये दारुणं किमपि वनं वीक्ष्य 'किमेतद्'इति श्रीरामः विश्वामित्रमपृच्छत्। एतावत्पर्यन्तमस्माभिः ज्ञाताः किल? अस्य वनस्य कथां ज्ञातुं वयं तत्पराः। अतः तृतीयमेककं प्रविशामः।

## मुख्यपदानि (Keyterms)

ताटकावधम्, मन्त्रग्रामेः, अहल्याशापानाः, सुबाहुमारीचौ , शाम्भवधनुः, धनूरत्नम्,वीर्यशल्का सीता।

## Discussion

**गद्यम् - ११**

महर्षेराशयं शिरसा धारयन् दाशरथिर्देशहिताय तमर्थं प्रतिज्ञाय तीव्रं ज्याशब्दमकरोत्। तं शब्दमसहमाना शिलाजालं वर्षन्ती राक्षसी राममभ्यद्रवत्। अभिमुखमापतन्तीं तां शरेणोरसि विव्याध। सा सद्यधरणीतले पपात ममार च। ताटकावधेन तोषितस्य मुनिवरस्यादेशेन तौ तां रजनीं तत्र सुखमूषतुः। मुनिदत्तेन मन्त्रग्रामेण समेधितप्रभावौ राघवौ मुनिमनुगच्छन्नाश्रमपदमवापताम्। महामुनेस्तास्ताः कौतुकावहाः कथाः श्रृण्वन्तौ तौ राजपुत्रौ कदापि मार्गखेदमनुबुद्ध्येताम्।

**व्याख्या**

**महर्षेरिति** - महर्षेः विश्वामित्रमहर्षेः आशयं आग्रहं शिरसा मूर्ध्ना धारयन् वहन् दाशरथिः श्रीरामः देशहिताय जनपदहिताय तमर्थं ताटकावधार्थं प्रतिज्ञाय प्रतिज्ञां कृत्वा ज्याशब्दं धनुर्गुणाकर्षणरवं अकरोत् चकार। धारयन्

(त-पुं-प्र-ए-व)। तं शब्दं तं रवं असहमाना सोढुमसह्या शिलाजालं पाषाणसमूहं वर्षन्ती राक्षसी प्रेक्षणं कुर्वन्ती ताटका राममभ्यद्रवत् रामाभिमुखमागतवती। शिलानां जालं शिलाजालम्। अभिमुखं प्रत्यक्षम् आपतन्तीं तां आगच्छन्तीं ताटकां शरेण बाणेन उरसि वक्षसि, विव्याध विदारयामास। बाणः, अजिह्मगः, आशुगः, पृथत्कः शरस्य पर्यायपदानि। सा ताटका सद्य सहसा धरणीतले भूतले पपात अपतत् ममार मृतिं प्राप। पपात (पत्लृ पतने-पर-लिट्-प्रपु-ए-व)। पपात - पेततुः - पेतुः। ताटकावधेन ताटकायाः वधेन तोषितस्य मुनिवरस्य सन्तुष्टस्य श्रेष्ठमुनेः तौ रामलक्ष्मणौ तां रजनीं तां निशां तत्र तत्स्थले सुखं ससुखम् ऊषतुः अवसताम्। मुनिवरस्य - मुनिषु वरः मुनिवरः, तस्य मुनिवरस्य। मुनिदत्तेन वसिष्ठदत्तेन मन्त्रग्रामेण मन्त्रसमूहेन समेधितप्रभावौ संवर्धितैश्वर्यौ राघवौ रामलक्ष्मणौ मुनिमनुगच्छन् मुनिमनुसरन् आश्रमपदम् आश्रमम्, अवापतां प्रापतुः। राघवौ रघोः अपत्ये पुमांसौ। महामुनेः विश्वामित्रस्य ताः कौतुकावहाः कथाः ताः रसावहाः प्रबन्धकल्पनाः श्रृण्वन्तौ आकर्णयन्तौ तौ राजपुत्रौ तौ राजकुमारौ मार्गखेदं मार्गक्लेशं कदापि ईषदपि न अवबुद्ध्येतां न जानीयाताम्। कथाश्रवणे तत्परौ तौ मार्गक्लेशं न अजानीयताम्। कौतुकम् आवहन्तीति कौतुकावहाः।

**गद्यम् -१२**

ततो नियतेन्द्रियो मुनिवरो दीक्षां प्रविवेश। राघवौ च निर्निद्रौ महत्या श्रद्धया तपोवनस्य रक्षणे जागरूकाववर्तेताम्। षष्ठेऽहनि समागते सानुचरौ सुबाहुमारीचौ यज्ञशालामुपगम्य रुधिरौघमवर्षताम्। तावदेव राजीवलोचनो राघवो मारीचोरसि शरेण प्रहृत्य तं योजनशतं यावत्समुद्रे चिक्षेप। सुबाहुमाग्नेयास्त्रेण गतासुं पातयित्वा तदनुचराणि रक्षांसि च वायव्यास्त्रेण दूरं विद्रावयामास। तेनाद्भुतेन कर्मणा सर्वेऽपि तपोवनस्थाः नितान्तं प्रमुदिताः राघवं बहुधा प्रशशंसुः।

**व्याख्या**

**ततो इति** - ततः अनन्तरं नियतेन्द्रियः मुनिवरः जितेन्द्रियः मुनिश्रेष्ठः दीक्षां यागाचरणाय व्रतं प्रविवेश आरब्धवान्। दीक्षाम् (आ-स्त्री-द्वि-ए-व)। दीक्षां - दीक्षे - दीक्षाः। राघवौ रामलक्ष्मणौ निर्निद्रौ निद्रां त्यक्त्वा वर्तमानौ महत्या श्रद्धया अतिश्रद्धया तपोवनस्य रक्षणे तपोवनसंरक्षणे जागरूकौ नितान्तं श्रद्धालू अवर्तेताम् अभवतां च। महत्या (ई-स्त्री-तृ-ए-व)। महत्या - महद्भ्यां - महद्भ्यः। षष्ठेऽहनि समागते यदा षष्ठं दिनं समागतं तदा सानुचरौ अनुचरैः सहितौ सुबाहुमारीचौ राक्षसौ यज्ञशालां यागशालाम् उपगम्य प्राप्य रुधिरौघं रक्तसमूहम् अवर्षतां ववर्षतुः। सानुचरौ - अनुचरैः सह वर्तते इति सामुचरः तौ सानुचरौ। यावत् यदा अनुचरैः सह रक्तवर्षणं चकार तावत् तत्काले एव राजीवलोचनः राघवः कमलाक्षः श्रीरामः मारीचोरसि मारीचस्य वक्षसि शरेण बाणेन प्रहृत्य हत्वा तं योजनशतं शतयोजनदूरे समुद्रे सागरे चिक्षेप निक्षेपितवान्। राघवः - रघोः गोत्रापत्यं पुमान्। सुबाहुं सुबाहुनामानं राक्षसम् आग्नेयास्त्रेण अग्निदेवतारूपेण अस्त्रेण, गतासुं पातयित्वा प्राणवियोगं कृत्वा (हत्वा), तदनुचराणि रक्षांसि च तस्यानुचरान् राक्षसान् च वायव्यास्त्रेण वायुदेवतारूपेण अस्त्रेण दूरं बहुदूरं विद्रावयामास विद्रवणं कारयामास। पातयित्वा (पत्लृ धातुना सह णिचि क्तप्रत्ययः) तेनाद्भुतेन कर्मणा तेन विस्मापयकर्मणा सर्वेऽपि तपोवनस्थाः सकलाः तपोवने वर्तमानाः नितान्तं नितरां प्रमुदिताः सन्तुष्टाः राघवं श्रीरामं बहुधा अनेकधा प्रशशंसुः प्रशंसयामासुः।

**गद्यम् -**

अथ यज्ञे समाप्ते प्रसन्नहृदयो विश्वामित्रो राममाबभाषे - 'नरश्रेष्ठ! मिथिलाधिपतेर्जनकस्य परमपावनो यज्ञ इदानीं प्रवर्तते। तत्र सर्वे वयं यास्यामः। त्वमप्यस्माभिः सह मिथिलां गन्तुमर्हसि। तत्रत्यमप्रमेयप्रभावं शाम्भवं धनूरत्नं च द्रष्टुमर्हसि'इति। मुनेराज्ञया राघवावपि प्रतिष्ठमानं मुनिरन्वगच्छताम्। मिथिलोपवनं प्राप्तो दाशरथिः कौशिकात् विदितवृत्तान्तो गौतमाश्रमं प्रविश्य गौतमशापेनापश्यतां गतां तत्पत्नीमहल्यां शापान्तेनानुजग्राह। अहल्यासहितेन गौतमेन विधिवत्कृतां सपर्यां च प्रतिजग्राह।

**व्याख्या**

**अथेति** - अथ अनन्तरं यज्ञे समाप्ते यागे समाप्तिं गते प्रसन्नहृदयः सन्तुष्टचित्तः विश्वामित्रः कौशिकः रामं श्रीरामं आबभाषे कथितवान्। यज्ञे समाप्ते - यदा यज्ञः समाप्तः तदा। सतिसप्तमीप्रयोगः। नरश्रेष्ठ हे मानवश्रेष्ठ, मिथिलाधिपतेः मिथिलानामकस्य राज्यस्य राज्ञः जनकस्य जनकनामकस्य परमपावनः पवित्रः यज्ञः यागः इदानीम् अधुना प्रवर्तते प्रचलति। तत्र मिथिलायां वयं सर्वे यात्स्यामः गमिष्यामः। वयम् (अस्मद्शब्दः- त्रिषु लिङ्गेषु समानः-प्र-ब-व)। अहं - आवां - वयम्। त्वम् अपि भवान् अपि अस्माभिः सह साकं, मिथिलां गन्तुमर्हसि गमनार्हः । त्वम् +अपि +अस्माभिः - त्वमप्यस्माभिः। तत्रत्यं तत्र वर्तमानम् अप्रमेयप्रभावं केनापि तुलनं कर्तुमसाध्यं शाम्भवं धनूरत्नं शिवसम्बन्धः विशिष्टधनुः च द्रष्टुमर्हसि द्रष्टुं भवान् अर्हः इति। शम्भोः इदं शाम्भवम्। मुनेराज्ञया विश्वामित्राज्ञया राघवौ अपि रामलक्ष्मणौ अपि प्रतिष्ठमानं गच्छन्तं मुनिं महर्षिम् अन्वगच्छताम् अनुजग्मतुः। राघवौ +अपि - राघवावपि। मिथिलोपवनं मिथिलायाः समीपस्थं वनं प्राप्तः सम्प्राप्तः दाशरथिः श्रीरामः कौशिकात् विश्वामित्रात् विदितवृत्तान्तः ज्ञातोदन्तः गौतमाश्रमं गौतममहर्षेः आश्रमं प्रविश्य गौतमशापेन गौतममहर्षेः शापेन अदृश्यतां अदृश्यरूपं गतां तत्पत्नीं प्राप्तां गौतमभार्याम् अहल्याम् अहल्यानामिकां शापान्तेन शापावसानेन अनुजग्राह अनुग्रहीतवान्। दाशरथिः - दशरथस्य गोत्रापत्यं पुमान्। अहल्यासहितेन गौतमेन अहल्यायुक्तेन गौतममहर्षिणा विधिवत्कृतां यथाविधि कृतां सपर्यां पूजां च प्रतिजग्राह स्वीचकार।

**गद्यम् - १३**

जनको विश्वामित्रमनुप्राप्तं श्रुत्वा पुरोहितं शतानन्दं पुरस्कुर्वन् सहसा प्रत्युद्गम्य विधिवदभ्यर्हितवान्। निर्वृत्ते मिथः कुशलप्रश्ने स राजा सकुतुकं देवतुल्यपराक्रमौ काविमौ कुमाराविति कौशिकं पपृच्छ। मुनिरपि राघवानुगतं सर्वमपि वृत्तान्तं यथावद्वर्णयामास। निवेदयामास च तयोर्महाधनुषो दर्शनकौतुकम्।

**व्याख्या**

**जनक इति** - विश्वामित्रम् अनुप्राप्तं सम्प्राप्तं श्रुत्वा आकर्ण्य जनकः जनकमहाराजः पुरोहितं शतानन्दं शतानन्दनामकं पुरस्कुर्वन् पुरतः कुर्वन् सहसा सवेगं प्रत्युद्गम्य स्वीकृत्य विधिवत् यथाविधि अभ्यर्हितवान् पूजितवान्। श्रुत्वा (श्रु श्रवणे-क्त्वान्तमव्ययम्) मिथः परस्परं कुशलप्रश्ने निर्वृत्ते कुशलप्रश्नानन्तरं स राजा जनकः सकुतुकं तात्पर्येण सह देवतुल्यपराक्रमौ कौ इमौ कुमारौ इति कौशिकं विश्वामित्रं पपृच्छ अपृच्छत्। मुनिरपि विश्वामित्र अपि राघवानुगतं सर्वमपि सकलमपि वृत्तान्तम् उदन्तं यथावत् वर्णयामास विशदीकृतवान्।

तयोः रामलक्ष्मणयोः महाधनुषः शाम्भवधनुषः दर्शनकौतुकं दर्शनाय वर्तमानं तात्पर्यं निवेदयामास व्यजिज्ञपत्।
तयोः+ महाधनुषः - तयोर्महाधनुषः।

**गद्यम् - १४**

जनको मुनिमेवं व्यजिज्ञपत्। - 'इदं किल धनूरत्नं देवरातस्य राज्ञो हस्ते न्यासीकृतम्। अस्य चारोपणाय देवा दानवा गन्धर्वा रक्षांसि वा न प्रभवन्ति। अत्र यो भुजवीर्यं प्रकाशयति तस्मै मत्सुता सीता देयेति प्रतिज्ञा मया कृता। बहवो राजानः सीतामत्रागत्य वरयामासुः। तथापि धनुषोऽस्य ग्रहणेऽप्यशक्ता भग्नाशाः निववृतिरे। रामो यद्यस्य धनुषः आरोपणं कुर्यात्तर्हि सीतामवश्यं तस्मै दद्याम्'इति।

**व्याख्या**

**जनक इति** - जनकः जनकराजः मुनिं ऋषिम् एवं वक्ष्यमाणप्रकारेण व्यजिज्ञपत् विज्ञापयामास। इदं धनूरत्नं विशिष्टः अयं धनुः राज्ञः महाराजस्य देवरातस्य देवरातनामकस्य दशरथपूर्विकस्य हस्ते करे न्यासीकृतं न्यासरूपेण निक्षिप्तं किल खलु। धनुः +रत्नं - धनूरत्नम्। अस्य आरोपणाय अस्य धनुषः ज्यारोपणाय देवाः दैत्याः दानवाः असुराः गन्धर्वाः देवगायकाः रक्षांसि राक्षसाः वा न प्रभवन्ति अशक्ताः भवन्ति। च +आरोपणाय - चारोपणाय। अत्र धनुरारोपणे यः भुजवीर्यं करस्य वीर्यं प्रकाशयति प्रकटयति तस्मै तज्जनाय मत्सुता मम पुत्री सीता जानकी देया दातुं योग्या इति मया प्रतिज्ञा कृता अहं प्रतिज्ञां कृतवान्। भुजवीर्यम् - भुजस्य वीर्यं भुजवीर्यम्। बहवः अनेके राजानः भूपालाः अत्रागत्य अत्रागम्य सीतां जानकीं वरयामासुः वव्रुः। अत्र +आगत्य - अत्रागत्य। तथापि अस्य धनुषः ग्रहणे धनुरारोपणकार्ये अशक्ताः शक्तिहीनाः भग्नाशाः निराशाः (भूत्वा), निववृतिरे प्रतिन्यवर्तन्त। धनुषः +अस्य - धनुषोऽस्य। धनुषः (ष-पु-ष-ए-व)। धनुषः - धनुषोः - धनुषाम्। यदि रामः धनुषः आरोपणं कुर्यात् करिष्यति तर्हि अवश्यं निस्संशयं सीतां सीतादेवीं तस्मै रामाय दद्याम् अहं दास्यामि इति। अस्य (म-पु-ष-ए-व) अस्य - अनयोः - एषाम्।

**गद्यम् - १५**

विश्वामित्रेण 'धनुर्दर्शय रामाय'इति प्रार्थितो जनको धनुरानयनाय सचिवानादिदेश। महता प्रयासेन बहुभिः जनसमूहैः समानीतं तद्धनुश्रेष्ठं 'वत्स राम, धनुः पश्य'इति विश्वामित्रो रामाय दर्शयामास। रामो विनीतः कार्मुकस्यास्य ग्रहणे पूरणे च यतिष्य इति वदन् पश्यतां नृसहस्राणां समक्षं लीलया मध्ये गृहीत्वा यावत्पूरयामास तावदेव तन्मध्ये भग्नं बभूव। निर्घातसमेन च तस्य निस्वनेन विश्वामित्रं जनकं राघवौ च वर्जयित्वा सर्वापि जनता मोहं प्रपेदे। ततः प्रत्याश्वस्तेषु जनेषु जनको राजा विश्वामित्रं सप्रमोदमभाषत। - 'भगवन्, दृष्टवीर्याय दशरथसूनवे रामाय वीर्यशुल्कां सीतां प्रदाय सत्यप्रतिज्ञो भवितुमभिलषामि। शीघ्रमेव भवतोऽनुमत्या वार्ताहर अयोध्यां प्रयान्तु, आनयन्तु च महात्मानं दशरथं सबान्धवं सपुरोधसं सत्वरमेव'इति। जनकेन प्रेषिता दूता महता रंहसा विहितगमना अयोध्यां संप्राप्य राज्ञे दशरथाय सन्तोषवार्तां निवेदयामासुः।

**व्याव्ख्या**

**विश्वामित्रेण इति** - 'धनुर्दर्शनाय रामाय रामं धनुं दर्शयतु'इति विश्वामित्रः जनकं निर्दिदेश। तदा धनुरानयितुं जनकः सचिवान् मन्त्रीन् अदिदेश। धनुः + दर्शनाय - धनुर्दर्शनाय। अनेके जनाः महता प्रयासेन तद् श्रेष्ठं

धनुम् आनीतवन्तः। तदा विश्वामित्रः 'वत्स राम धनुं पश्य इति रामम् अवदत्। रामः धनुं ददर्श। बहुभिः अनेकैः। विनीतः विनयशाली रामः अस्य कार्मुकस्य धनुषः ग्रहणे पूरणे च गृहणाय पूरणाय च यतिष्ये यत्नं करिष्यामि इति वदन् पश्यतां नृसहस्राणां समक्षं जनसहस्राणामवलोकनसमये एव लीलया सलीलं मध्ये गृहीत्वा धनुषः मध्ये उद्धृत्य यावत् पूरयामास तावत् यदा अपूरयत् तदा एव तन्मध्ये धनुः मध्ये भग्नं खण्डितं बभूव। कार्मुकस्य + अस्य - कार्मुकस्यास्य। निर्घातसमेन सौमादिनीतुल्येन तस्य निस्वनेन घोरेण शब्देन विश्वामित्रं जनकं राघवौ च वर्जयित्वा विहाय सर्वापि जनता सर्वे जनाः मोहं प्रपेदे मोहालस्यं प्रापुः। विश्वामित्रः जनकः रामलक्ष्मणौ च न मोहिताः। इतरे सर्वे मोहालस्यं प्रापुः। तस्य - द-पु-ष-ए-व। ततः अनन्तरं प्रत्याश्वास्तेषु जनेषु जनाः यदा मोहाद्विमुक्ताः तदा राजा जनकः विश्वामित्रं सामोदं ससन्तोषम् अभाषत वक्ष्यमाणप्रकारेणअवदत् - भगवन् दृष्टवीर्याय दशरथसूनवे रामाय (रामस्य पराक्रमः अस्माभिः दृष्टः) तस्मै दशरथपुत्राय रामाय वीर्यशुल्कां सीतां वीर्येण क्रीतां जानकीं प्रदाय दत्वा सत्यप्रतिज्ञः सत्यपरिपालनतल्परः भवितुमभिलषामि भवितुमिच्छामि। दशरथस्य सूनुः दशरथसूनुः, तस्मै दशरथसूनवे। भवतोऽनुमत्या भगवतः सम्मतेन शीघ्रमेव झटित्येव वार्ताहराः दूताः अयोध्यां अयोध्यानगरीं प्रयान्तु गच्छन्तु। सबान्धवं बन्धुवर्गसहितं सपुरोधसं सपुरोहितं महात्मानं दशरथं श्रेष्ठं दशरथं आनयन्तु जनकराजधानीम् आनयन्तु इति। भवतः + अनुमत्या - भवतोऽनुमत्या। भवतः -त-पु-ष-ए-व। जनकेन प्रेषिताः दूताः महता रंहसा वेगेन अयोध्यां विहितगमनाः (विहितं गमनं येषां ते ) संप्राप्य प्राप्य दशरथाय सन्तोषवार्तां जनकाभिलाषकार्यं निवेदयामासुः व्यजिज्ञपन्।

## पुनरावृत्तिः (Recap)

- विश्वामित्रस्य यागं सुष्ठु प्राचलत्।
- विश्वामित्रः जनकराजधान्यां वर्तमानं यागदर्शनाय तत्र यातुं राघवौ उपादिशत्।
- रामः मार्गमध्ये गौतमाश्रमं प्राप्य अहल्यायै शापमोक्षमदात्।
- मिथिलां प्राप्तान् विश्वामित्रं राघवौ च जनकः सुष्ठु अर्चयामास।
- देवतुल्यपराक्रमौ इमौ कुमारौ कौ इति जनकस्य प्रश्नस्य विश्वामित्रः रामानुगतं सर्वं वृत्तान्तं कथितवान्।
- कुमारयोः शाम्भवधनुदर्शनतात्पर्यं विश्वामित्रः जनकं सूचितवान्।
- जनकः शाम्भवधनुषः वृत्तान्तं कथितवान्।
- यः भुजवीर्येण अस्य धनुषः ज्यारोपणं करोति तस्मै मत्सुतां सीतां दास्यामि इति कार्यमपि कथितवान्।
- रामः सलीलया धनुरारोपणाय उद्युक्तः अभूत्। तदा धनुः भग्नं बभूव।
- धनुषः भयानकं निस्वनमाकर्ण्य सर्वे जनाः मोहालस्यं प्रापुः। जनके विश्वामित्रे रामलक्ष्मणयोः च विवर्णता (मोहप्राप्तिः) न दृष्टा।
- प्रतिज्ञापरिपालनतत्परः जनकः सीतां रामाय दातुं निश्चिकाय।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. विश्वामित्रः मिथिलां गन्तुं रामलक्ष्मणौ उपदिशति। किमर्थम्?
२. मुनेराज्ञया तौ मुनिरन्वगच्छताम् - कौ?
३. श्रीरामः कां शापात् मोचितवान्?
४. मिथिलाधिपतिः कः?
५. 'धनुर्दर्शनाय' इत्यस्य पदच्छेदः ..............।
६. 'महता प्रयासेन बहुभिः जनसमूहैः समानीतं तद्धनुः' - अस्य धनुषः नाम किम्?
७. गौतममहर्षेः भार्या का?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।
### (Answer the following questions in one or two sentences)

१. शाम्भवं धनुः इदानीं कस्य सकाशे वर्तते?
२. अहल्या का?
३. देवतुल्यपराक्रमौ कुमारौ कौ?
४. जनकमहाराजस्य पुरोहितस्य नाम किम्?
५. मिथिलायाः अधिपः कः?
६. देवरातः कः?
७. धनुरारोपणे के के असमर्थाः बभूवुः?
८. 'पश्यतां नृसहस्राणां समक्षम्' इत्यनेन सूचितः आशयः कः?
९. सर्वापि जनता मोहं प्रपेदे - कारणं किम्?

## एकैकया खण्डिकया उत्तराणि लिखत।
### (Answer the following questions in a paraghraph)

१. ताटका वधम्, विशदयत।
२. श्रीरामः कथं विश्वामित्रस्य यागं संरक्षितवान्।

## निर्दिष्टाभ्यासः (Assignment)

| |
|---|
| १. विश्वामित्रेण साकं रामलक्ष्मणयोः गमनं ताटकावधम् अहल्यामोक्षवृत्तान्तं च संक्षिप्य लिखत। |

**निर्देशानुसारम् उत्तरं लिखत।**

**I. यथोचितं योजयत।**

| क | ख |
|---|---|
| १. जननी | मन्त्रग्रहणेन |
| २. तोषितः | प्रसूः |
| ३. मुनिवरः | रामलक्ष्मणौ |
| ४. निर्निद्रौ | विश्वामित्रः |
| ५. राघवौ | सन्तुष्टः |

**II. विग्रहं लिखत।**

१. महर्षेः।
२. आग्नेयास्त्रम्।
३. सानुचरौ।
४. राघवः।

**III. अन्तलिङ्गविभक्तिवचनानि लिखत।**

१. धारयन्।
२. अस्त्रेण।
३. ताम्।
४. उरसि।
५. रजनीम्।
६. दीक्षाम्।

**IV. अर्थं लिखत।**

१. विव्याध।
२. शिरसा।
३. शरेण।

४. श्रद्धया।
५. सपर्या।
६. यास्यामः।
७. गन्धर्वाः।
८. बहवः।
९. अर्हसि।
१०. मिथः।
११. बहुभिः।
१२. कार्मुकम्।

**V. वाक्येयोजयत।**

१. बहुधा।
२. यावत् - तावत्।
३. पपात।
४. उपगम्य।
५. नितान्तम्।
६. यदि-तर्हि।
७. प्रविश्य।
८. श्रुत्वा।
९. सहसा।
१०.आबभाषे।
११. प्रदाय।
१२. सप्रमोदम्।
१३. रंहसा।

**VI. धातुपदलकारपुरुषवचनानि लिखत।**

१. उवाच।
२. श्रूयताम्।
३. अवर्तत।
४. निनाय।
५. अकरोत्।
६. अन्वगच्छताम्।
७. पप्रच्छ।
८. वरयामासुः।
९. प्रभवन्ति।

१०. प्रतिजग्राह।
११. दर्शय।
१२. प्रपेदे।
१३. आदिदेश।
१४. यतिष्ये।

**VII. वगृह्णीत।**

१. प्रसन्नहृदयः।
२. विदितवृत्तान्तः।
३. यथाविधि।
४. शाम्भवम्।
५. देया।
६. वीर्यशुल्काम्।

**VIII. सन्धत्त।**

१. धनुः + रत्नम्।
२. मुनेः + आज्ञया।
३. च + आरोपणम्।

**IX. व्याकरणकार्यं लिखत।**

१. तस्मै अदात्।
२. यज्ञे समाप्ते सति।
३. मिथिलाधिपतेः।
४. पश्यतां नृसहस्राणां समक्षम्।

**X. प्रयोगविपरिणामं कुरुत।**

१. जनकेन दूताः प्रेषिताः।
२. राजा सचिवान् आदिदेश।

## उत्तराणि (Answer to objective type questions)

१. कश्चन यागः प्रचलति, तद्दर्शनार्थम्।
२. राघवौ
३. अहल्याम्
४. जनकः
५. धनुः + दर्शनाय
६. शाम्भवम्
७. अहल्या।

## अधिकवाचनाय ग्रन्थाः (Suggested Readings)


१. पि.एस्. अनन्तनारायणशास्त्री, बालरामायणम्, व्याख्या टि.के.रामचन्द्र अय्यर्, आर्. एस्. वाध्यार् आन्ट् सन्स्, कल्पात्ति।
२. पि.एस्. अनन्तनारायणशास्त्रि, बालरामायणम्, व्यख्या पि.जि.अजित् प्रसाद्, अनामिका पब्लिक्केषन्स्, एलुकोण्, २००८.
३. डा. पूवट्टूर् रामतृष्णपिल्ल, केरलसंस्कृतविज्ञाननिघण्डु, केरलभाषा इन्स्टिट्यूट्, अनन्तपुरी, २०९६ पुटं ३०-३१

# Unit - 4

## खण्डिका १६- शिष्टभागः १८

### उद्देश्यानि (Learning outcomes)

- अनन्तशास्त्रिनारायणमहाशयस्य भाषाशैलीं जानाति।
- आशयावगतिना साकं भाषानैपुणीं प्राप्नोति।
- अर्थः आशयं च जानाति।
- नूतनपदावलिपरिचयः।

### प्राग्व्यपेक्षाः (Prerequisites)

अयि भोः प्रियच्छात्राः,
अस्माभिः तृतीयमेककमपि पठितम्। विश्वामित्रेण सह श्रीरामः सरयूनदीं तीर्त्वा ताटकावनं प्राप। दुष्टायाः ताटकायाःनिग्रहानन्तरं रसप्रदाः अनेके कथाः विश्वामित्रात् आकर्ण्य महर्षेः तपश्चरणस्थलं प्राप। यागसमये विघ्नकरणाय आगतान् मारीचं, सुबाहुं, अनुचरान् च सानुजः रामः जघान। सर्वे श्रीरामं प्रशशंसुः पुनः विश्वामित्रस्य उपदेशानुसारं जनकराजधानीं प्राप्तःश्रीरामः सीतां परिणीतवान्। श्रीरामादीनां विवाहोत्सवः संजातः। चत्वारः राजकुमाराः चतस्रः कन्यकाः परिणीतवन्तः। पुनः सबन्धुवर्गं ते अयोध्याय प्रतस्थिरे। तेषां यात्रा कथमासीत्? तान् स्वीर्कतुम् अयोध्या सन्नद्धा वा? मार्गे यः कोऽपि विघ्नः संजातः वा? एतेषां प्रश्नानां परिहाराय चतुर्थमेककम् पठामः।

### मुख्यपदानि (Keyterms)

दशरथः मिथिलां, प्रतस्थे, चतस्रः कन्यकाः, इक्ष्वाकुकुलदैवतं, वसिष्ठः, स्वपुरीम्, जामदग्न्यः, महेन्द्रपर्वतम्, स्वमन्दिरम्, पितृभक्ताय।

### Discussion

**गद्यम् - १६**

कौशिकानुग्रहस्य फलायितं तमभ्युदयमभिनन्द्य दशरथः सचिवैः सम्मन्त्र्य मिथिलां प्रतस्थे। समागतं दशरथं सपर्यया सम्भाव्य जनकः परमं प्रहर्षं प्रपेदे। ऊर्मिलां लक्ष्मणाय प्रदास्यामीति प्रतिजज्ञे। अनन्तरं दूतान् च सम्प्रेष्य भ्रातरं कुशध्वजं स्वपुरमानयत्, यस्यापि विवाहार्हं कन्यारत्नद्वयं माण्डवीश्रुतकीर्तिनामधेयमवर्तत। ततः सर्वतः प्रवृत्ते विवाहोचिते महोत्सवे इक्ष्वाकुकुलदैवतं भगवान् वसिष्ठो वंशावलीं कीर्तयन् कन्याः चतुर्थेभ्यः

राजकुमारेभ्यः वरयामास। मुनिसंसदि ज्वलितेऽग्नेः समक्षं समं मन्त्रोदकैरानन्दाश्रूणि सिञ्चन् महीपतिरात्मनो भ्रातुश्च ताश्चतस्रः कन्यकाः चतुर्भ्यो राजनन्दनेभ्यः सप्रमोदं प्रतिपादयामास। ते च राजनन्दनाः वसिष्ठानुमत्या ताः प्रतिजगृहिरे। रामः सीतां, लक्ष्मणः ऊर्मिलां, भरतो माण्डवीं, शत्रुघ्नः श्रुतकीर्तिं चात्मनोऽनुरूपां वधुं प्राप्य सुतरां विरराज। विधिवन्निर्वर्तितविवाहैः कुमारैः समन्वितो राजा दशरथं सबान्धवं जनकमापृच्छ्य स्वपुरीं प्रतस्थे।

**व्याख्या**

**कौशिक इति** - कौशिकानुग्रहस्य विश्वामित्रानुग्रहस्य फलायितं फलरूपेण संप्राप्तं तामभ्युदयम् सीतासम्बन्धमभ्युदयम् अभिनन्द्य अभिवादनं कृत्वा दशरथः सचिवैः मन्त्रिभिः सम्मन्त्र्य आलोच्य मिथिलां प्रतस्थे यात्रां कृतवान्। समागतं सम्प्राप्तं दशरथं जनकः सपर्यया पूजया सम्भाव्य स्वीकृत्य परमं नितरां प्रहर्षं सन्तोषं प्रपेदे प्राप। सपर्यया - आ-स्त्री-तृ-ए-व। सपर्यया - सपर्याभ्याम् - सपर्याभिः। ऊर्मिलां ऊर्मिलां नामिकां कन्यकां लक्ष्मणाय प्रदास्यामीति भार्यात्वेन दास्यामीति प्रतिजज्ञे प्रतिज्ञां चकार। ऊर्मिलाम् - आ-स्त्री-द्वि-ए-व। ऊर्मिलाम् - ऊर्मिले - ऊर्मिलाः। अनन्तरं पुनः च दूतान् सम्प्रेष्य सम्प्रेर्य भ्रातरं सोदरं कुशध्वजं कुशध्वजनामानं स्वपुरीं स्वनगरीं जनकपुरीं आनयत् आनिनाय। तस्यापि तस्य कुशध्वजस्यापि विवाहार्थं विवाहाय योग्यं कन्यारत्नद्वयं गुणोपेतं कन्यकाद्वयं माणडवीश्रुतकीर्तिनामधेयं माण्डवीं श्रुतकीर्ती इति नामयुक्तां अवर्तत आसीत्। (कुशध्वजस्य द्वे पुत्र्यौ माण्डवी श्रुतकीर्ति च। उभेऽपि विवाहाय योग्ये स्तः इत्याशयः।) दूतान् - अ-पु-द्वि-ब-व। दूतं - दूतौ - दूतान्। ततः अनन्तरं सर्वतः प्रवृत्ते विवाहोचिते महोत्सवे विवाहोत्सवाय सर्वे यदा सन्नद्धाः तदा इक्ष्वाकुकुलदैवतं भगवान् वसिष्ठः इक्ष्वाकुकुलस्य पुरोहितः वसिष्ठमहर्षिः वंशावलीं वर्धयन् कन्याः स्ववंशाभिवर्धनहेतुभूताः कन्यकाः चतुर्भ्यः राजकुमारेभ्यः श्रीरामलक्ष्मणभरतशत्रुघ्नेभ्यः वरयामास ववृणे। मुनिसंसदि मुनियुक्तायां सभायां, ज्वलितेऽग्नेः समक्षं अग्निसाक्षिकत्वेन, मन्त्रोदकैः समं मन्त्रोच्चारणपूर्वकार्चनैः सह, आनन्दाश्रूणि मुञ्चन् सन्तोषातिरेकेण अश्रूणि मोचयन् महीपतिः राजा जनकः आत्मनः भ्रातुः च स्वस्य सोदरस्य च ताः चतस्रः कन्यकाः ताः चतस्रः सीता-ऊर्मिला-माण्डवी-श्रुतकीर्त्याः कन्यकाः चतुर्भ्यो राजनन्दनेभ्यः चतुसंख्याकेभ्यः राजकुमारेभ्यः सप्रमोदं ससन्तोषं प्रतिपादयामास अर्पयामास। मुनिसंसदि - द-स्त्री-स-ए-व। मुनिसंसदि - मुनिसंसद्योः - मुनिसंसत्सु। मुनियुक्ता संसद् मुनिसंसद्, तस्यां मुनिसंसदि। ते राजनन्दनाः राजकुमाराः, वसिष्ठानुमत्या वसिष्ठादेशेन, ताः कन्यकाः, प्रतिजगृहिरे स्वीचक्रुः। ते - द-पु-प्र-ब-व। सः - तौ - ते। रामः सीतां लक्ष्मणः ऊर्मिलां भरतः माणडवीं शत्रुघ्नः श्रुतकीर्तिं च आत्मनः स्वस्य, अनुरक्तां अनुयोज्यां, वधूं भार्यां, प्राप्य स्वीकृत्य, सुतरां नितरां विरराज शुशुभे। विधिवत् यथाविधि निर्वर्तितविवाहैः कृतपरिणयैः कुमारैः नन्दनैः समन्वितः सहितः राजा भूपतिः सबान्धवं बन्धुजनसहितं जनकं जनकमहाराजम् आपृच्छ्य यात्रानुमतिं स्वीकृत्य स्वपुरीम् अयोध्यां प्रतस्थे प्रस्थितवान्।

**गद्यम् - १७**

स्वगुरोरीश्वरस्य धनुः रामेण भग्नमिति जातकोपो जामदग्न्यो रामः पावक इव ज्वलन्मध्येमार्गमाजगाम। त्रिःसप्तकृत्वो मेदिनीं निःक्षत्रियां कृतवतस्तस्य दर्शनमात्रेण दशरथस्य हृदयं चकम्पे। मधुराणि सामवचनानि वदतो मुनीनगणयन् जामदग्न्यो राघवमुपगम्य मया समानीतेऽस्मिन् धनुषि ते विक्रमः प्रकाशयताम् इति भाषमाणो वैष्णवं धनूरत्नमर्पयामास। राघवो लीलया तद्गृहीत्वा तस्मिन्नमोघं शरं सन्दधे। चिरं स्वतपसार्जितेषु लोकेषु शरप्रभावेण संहृतेषु भग्नदर्पो जामदग्न्यः पुनरपि तपसे महेन्द्रपर्वतं प्रययौ।

**व्याख्या - स्वगुरोरिति।**

स्वगुरोः परशुरामस्य गुरोः शिवस्य धनुः रामेण भग्नं इति जातकोपः संजातकोपः जामदग्न्यः जमदग्निपुत्रः रामः परशुरामः पावक अग्निरिव ज्वलन् मध्यमार्गं मार्गमध्ये आजगाम आगच्छत्। धनुः +रामेण - धनूरामेण। धनुः - ष-नपुं-प्र-ए-व। धनुः - धनुषी - धनूंषि। त्रिःसप्तकृत्वः एकविंशतिवारं मेदिनीं वसुधां निःक्षत्रियां क्षत्रियशून्यां (क्षत्रियान् एकविंशतिवारं नाशितवान्) कृतवन्तः तस्य कुर्वतः अस्य परशुरामस्य दर्शनमात्रेण पश्यन्नेव दशरथस्य हृदयं चित्तं चकम्पे कम्पितवान्। निःक्षत्रियां निर्गताः क्षत्रियाः याभ्यः सा निःक्षत्रिया तां निःक्षत्रियाम्। मधुराणि सामवचनानि सान्त्वनवचनानि वदतः उक्तवतः मुनीन् ऋषीन् अगणयन् विगणयन् जामदग्न्यः परशुरामः राघवं श्रीरामम्, उपेत्य समीप्य एवम् अभाषत। 'मया, समानीते, अस्मिन् धनुषि ते विक्रमः प्रकाशयतां'इति भाषमाणः वदन् वैष्णवं विष्णुसम्बन्धि धनूरत्नं विशिष्टं धनुम् अर्पयामास समर्पितवान्। वदतः - त-पु-द्वि-ब-व। वदन्तं - वदन्तौ - वदतः। समानीते +अस्मिन् - समानीतेऽस्मिन्। राघवः श्रीरामः लीलया तद्गृहीत्वा तद्धनुम् आदाय तस्मिन् धनुषि अमोघं शरं सफलं बाणं सन्दधे प्रयुक्तवान्। तस्मिन् +अमोघम् - तस्मिन्नमोघम्। न मोघम् अमोघम्। चिरं बहुकालं स्वतपसार्जितेषु स्वतपसा सम्पादितेषु लोकेषु भुवनेषु (बहुकालं तपश्चरणेन परशुरामः भुवनत्रयमपि स्वायत्तीकृतवान्) शरप्रभावेण श्रीरामप्रेषितेन शरशक्त्या संहतेषु विनष्टेषु, भग्नदर्पः विनष्टाहङ्कारः जामदग्न्यः परशुरामः, पुनरपि मुहुरपि, तपसे तपश्चरणाय, महेन्द्रपर्वतं महेन्द्रगिरिं, प्रययौ जगाम। संहतेषु - अ-पु-स-ब-व।

**गद्यम् - १८**

गते जामदग्न्ये प्रमुदितो दशरथः सहानुयायिभिः लङ्घिताध्वा सुरेन्द्रसदनमिव विराजमानं स्वमन्दिरं सम्प्राप। ते च महात्मनो राजसूनवः कृतदारकर्मणः परमया भक्त्या पितरं शुश्रूषमाणाः तस्य महतीं प्रीतिमुत्पादयामासुः। राजमहिष्यः सर्वा अपि गुणगरीयसीः स्नुषाः प्रतिपद्य नितरां जहृषुः। रामोऽपि तया सर्वगुणसम्पन्नया सीतया समेयिवान् श्रियेव श्रीपतिः सुतरां विरेजे। तयोश्च तादृशं प्रेम संजज्ञे, यथा हृदयं हृदयेन व्यक्तमाचख्ये। भ्रातरश्च रामे दृढानुरक्ता मातृभिरुपलाल्यमाना आनन्दस्य परां सीमामभ्यगच्छन्।

**पितृभक्ताय सततं भ्रातृभिः सह सीतया।**
**नन्दिताखिललोकाय रामभद्राय मङ्गलम्।।**

**व्याख्या**

**गत इति** - जामदग्न्ये गते यदा परशुरामः अगच्छत् तदा प्रमुदितो सन्तुष्टः दशरथः अनुयायिभिः अनुचरैः सह साकं लङ्घिताध्वा मार्गम् उल्लङ्घ्य सुरेन्द्रसदनं देवेन्द्रभवनम् इव विराजमान प्रशोभमानं स्वमन्दिरं अयोध्यायाः मन्दिरं सम्प्राप। ते महात्मनः राजसूनवः राजकुमाराः कृतदारकर्मणः भार्यात्वेन स्वीकृतवन्तः परमया भक्त्या नितरातिशयभक्त्या पितरं दशरथं शुश्रूषमाणाः सेव्यमानाः तस्य दशरथस्य महतीं प्रीतिम् अत्यधिकां प्रीतिम् उत्पादयामासुः जनयामासुः। राज्ञः सूनवः राजसूनवः। सर्वाः अपि राजमहिष्यः राज्ञः भार्याः गुणगरीयसीः गुणश्रेष्ठा स्नुषाः पुत्रभार्याः प्रतिपद्य प्राप्य नितराम् अत्यधिकं जहृषुः सन्तोषयामासुः। गुणगरीयसीः - अतिशयेन गुर्वी गरीयसी, ताः गरीयसीः। गुणैः गरीयसीः गुणगरीयसीः। गुणगरीयसीः - ई-स्त्री-द्वि-ब-व।

रामोऽपि तया सर्वगुणसम्पन्नया सर्वगुणोपेतया सीतया समेयिवान् संवर्धितवान् श्रिया लक्ष्म्या श्रीपतिः विष्णुः सुतरां नितरां विरेजे शुशुभे। सर्वगुणसम्पन्नया - सर्वैः गुणैः सम्पन्ना सर्वगुणसम्पन्ना, तया सर्वगुणसम्पन्नया। तयोश्च दम्पत्योः तयोः तादृशं प्रेम तादृशी प्रियता संजज्ञे अजायत। हृदयं चित्तं हृदयेन चित्तेन व्यक्तं सुस्पष्टम् आचरव्ये अभाषत यथा इव। प्रेम - न-पु-प्र-ए-व। भ्रातरश्च सोदराश्च रामे दृढानुरक्ताः श्रीरामे नितरां भक्तिमन्तः मातृभिः जननीभिः उपलाल्यमानाः लाल्यमानाः आनन्दस्य सन्तोषस्य पराम् अधिकां सीमाम् अवस्थाम् अभ्यगच्छन् प्राप्तवन्तः।

भ्रातृभिः सोदरैः सीतया जानक्या च पितृभक्ताय पितृभक्तिमते नन्दिताखिललोकाय सर्वजनान् सन्तोषयते रामभद्राय रामचन्द्राय सततं सदा मङ्गलं मङ्गलमस्तु। भ्रातृभिः - ऋ-पु-तृ-बव।

## पुनरावृत्तिः (Recap)

- मिथिलातः अयोध्यां गमनसमये मध्येमार्गं परशुरामः सगर्वमागतवान्।
- परशुरामस्य गुरोः धनुभञ्जनेन कुपितः सः वैष्णवं चापं रामाय प्रदर्श्य 'तव पराक्रमः अस्मिन् प्रकटयतु' इत्यवदत्।
- श्रीरामः अनायासेन तस्मिन् अमोघं शरं सन्दधे।
- नष्टगर्वः परशुरामः तपसे महेन्द्रगिरिमगच्छत्।
- अयोध्यां प्राप्ताः राजकुमाराः तेषां भार्याः च पितरं मातॄः च निरतिशयभक्त्या सेवयामासुः। सर्वे सन्तुष्टाः संजाताः।
- लक्ष्म्या विष्णुरिव सीतया श्रीरामः शुशुभे।
- हृदयं हृदयेन भाषणमिव तौ दम्पती अवर्तेताम्।
- सर्वे सोदराः सोदरपत्न्यश्च सामोदं कालमनयन्।
- सततं प्रजातत्पराय भ्रातृभिः सीतया च वर्तमानाय श्रीरामाय मङ्गलानि भवन्तु।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. के परशुरामस्य पुरतः मधुराणि वाक्यानि अवदन्?
२. तद् गृहीत्वा तस्मिन्नमोघं शरं सन्दधे - कः?
३. कतिवारं परशुरामः क्षत्रियान् नाशितवान्?
४. इक्ष्वाकुकुलपुरोहितः कः?
५. अयोध्यायाः राजमन्दिरं कीदृशमासीत्?.
६. परशुरामस्य गुरुः कः?

## एकेन वाक्येन  द्वाभ्यां वा उत्तराणि लिखत।
**(Answer the following questions in one or two sentences)**

१. सचिवैः सम्मन्त्र्य दशरथः किमकरोत्?
२. दशरथं दृष्ट्वा  जनकः किमकरोत्?
३. श्रीरामादीनां विवाहं वर्णयत।
४. कुशध्वजस्य पुत्र्यौ के?
५. 'ताः चतस्रः कन्यकाः राजकुमारेभ्यः वरयामास।' ताः कन्यकाः काः?
६. श्रीरामस्य धनुरारोपणं कीदृशमासीत्?
७. केन कारणेन परशुरामः जातकोपः बभूव?
८. परशुरामः राघवं किमुवाच?
९. कदा परशुरामस्य अहङ्कारः विनष्टोऽभवत्?
१०. दशरथस्य महिष्यः कीदृशीः स्नुषाः प्राप्ताः?
११. आनन्दस्य परां सीमामभ्यगच्छन् - के?
१२. राजसूनवः कस्मिन् निरतिशयं भक्तिं प्रकटयामासुः?

## एकैकया खण्डिकया उत्तराणि लिखत।
**(Answer the following questions in a paraghraph)**

१. सीतारामयोः विवाहवृत्तान्तम्।
२. श्रीरामलक्ष्मणादीनां विवाहः।
३. परशुरामस्य गर्वभङ्गः।

## निर्दिष्टाभ्यासः (Assignments)

१. बालकाण्डस्य कथासारं स्ववाक्यैः लिखत।
२. दशरथस्य राजधान्यां विश्वामित्रस्य गमनप्रसक्तिः।
३. बालरामायणस्य अयोध्याकाण्डं पठन्तु।

**निर्देशानुसारम् उत्तरं लिखत।**

**I. अर्थं लिखत।**

१. सपर्यया।

**II. धातुपदलकारपुरुषवचनानि लिखत।**

१. विरराज।

२. जहृषुः।

३. प्रययौ।

४. चकम्पे।

५. आचरव्ये।

६. सम्प्राप।

**III. विग्रहं लिखत।**

१. कौशिकः

२. राजनन्दनाः।

३. निःक्षत्रियाम्।

४. अमोघम्।

५. शुश्रूषा।

६. वैष्णवम्।

७. भग्नदर्पः।

**IV. वाक्ये योजयत।**

१. यदा - तदा।

२. सह।

३. नितराम्।

४. चिरम्।

५. सततम्।

**V. व्याकरणकार्यं लिखत।**

१. प्रतस्थे।

२. मन्त्रोदकैः समम्।

**VI. अन्तलिङ्गविभक्तिवचनानि लिखत।**

१. वदतः।

२. प्रेम।

३. मातृभिः।

४. लीलया।
५. महतीम्।

**VII. आशयं विशदयत।**

१. श्रियेव श्रीपतिः नितरां विरेजे।
२. यथा हृदयं हृदयेन व्यक्तमाचरव्ये।

**VIII. पदच्छेदं कुरुत।**

१. धनू रामेण।
२. समानीतेऽस्मिन्।
३. रामोऽपि।
४. तयोश्च।

## उत्तराणि (Answer to objective type questions)

१. मुनयः।
२. श्रीरामः।
३. एकविंशतिः वारम्।
४. वसिष्ठः
५. सुरेन्द्रभवनमिव
६. शिवः

## अधिकवाचनाय ग्रन्थाः (Suggested Readings)


१. पि.एस्. अनन्तनारायणशास्त्री, बालरामायणम्, व्याख्या टि.के.रामचन्द्र अय्यर्, आर्. एस्. वाध्यार् आन्ट् सन्स्, कल्पात्ति।
२. पि.एस्. अनन्तनारायणशास्त्रि, बालरामायणम्, व्यख्या पि.जि.अजित् प्रसाद्, अनामिका पब्लिक्केषन्स्, एलुकोण्, २००८.
३. डा. पूवट्टूर् रामतृष्णापिल्ल, केरलसंस्कृतविज्ञाननिघण्डु, केरलभाषा इन्स्टिट्यूट्, अनन्तपुरी, २०९६ पुटं ३०-३१

BLOCK -6

# अमरकोशः
# व्याकरणविशेषः च।

# Unit -1

## अमरसिंहविरचितः अमरकोशः-द्वितीयकाण्डम्-वनौषधिवर्गः।

### (केषुचिद्ग्रन्देषु वनवर्ग इत्येव) अटव्यरण्यं इत्यारभ्य सुमनोरजः इति पर्यन्तम् ३४ पङ्क्तयः।

## उद्देश्यानि (Learning Outcomes)

- एकस्य पदस्य स्थाने बहूनि पदानि वक्तुं प्रभवति।
- भिन्नार्थकानि समानपदानि सन्ति।
- साहित्येन सह निकटतमः सम्बन्धः।
- पदश्रवणेनैव अर्थावगतिः।
- धातुना सह सम्बन्धसूचिका निरुक्तिः।
- शब्दस्य लिङ्गं निर्दिशति।
- पदस्य निर्वचनं सूचयति।
- पदस्वरूपं जानाति।

## प्राग्व्यपेक्षाः (Prerequisites)

सर्वासामपि भाषाणां अध्ययनाय निघण्टवः महत् साह्यं आचरन्ति। पदानां अर्थप्रकाशनमेव निघण्टवः मुख्यतया अनुतिष्ठन्ति। वैदिकपदानां अर्थं प्रकाशयन् निरुक्तं इति कोऽपि ग्रन्थः यास्कमुनिना विरचितः। स एव संस्कृतभाषायाः प्रथमो निघण्टुः भपति। संस्कृते निघण्टोः, कोशःइत्यपि नामास्ति। अस्यां भाषायां बहवः कोशग्रन्थाः सन्ति। तेषु अमरसिंहकृतः अमरकोश एव प्रशस्ततमो भपति। अमरकोशात् पूर्वं परं चापि बहवः कोशग्रन्थाः संस्कृतभाषायां रचिता आसन्निति ज्ञायते। उत्पलिनी, त्रिकाण्डी, शब्दसागरः, विश्वप्रकाशः, हारावली, वैजयन्ती प्रभृतयः तेष्वन्तर्भवन्ति। ततोऽपिअमरकोशस्य प्राशस्त्यं अनूनमेव विराजते।

कोशग्रन्थानां नामलिङ्गानुशासने, अर्थनिर्णयविषये च निरुक्तमेव मार्गनिदेशकं भवति। निरुक्तञ्च काणडत्रयात्मकं भवति। नैघण्टुककाण्डं, नैगमकाण्डं, दैवतकाण्डं चेति तत् काण्डत्रयम्। अस्मिन् प्रथमं काण्डद्वयं कोशग्रन्थानां रचनायै आधारभूतं वर्तते। अत्र निरुक्तमपि व्याकरणशास्त्रमेव आधारीकरोति।

अमरकोशस्य प्राशस्त्यस्य निदानां तस्य नाम्ना एव सूचितम्। तस्य ''नामलिङ्गानुशासनं''इति नाम ग्रन्थकर्त्रा कृतम्। तत्पूर्ववर्तिनः केचन कोशाः नामानुशासनमेव कुर्वन्ति। तेषु लिङ्गविवेचनं नास्ति।उदा - विश्व प्रकाशकोशः। भाषाद्ययनं कुर्वतां छात्राणां न केवलं नामानुशासनं, लिङ्गानुशासनमपि आवश्यकं भवति। केषुचिद्ग्रन्थेषु तु लङ्गानुशासनमेव विद्यते,नामानुशासनं नास्ति। उदा- व्याडिवररुचिप्रभृतीनां ग्रन्थाः । उपर्युक्तेषु विश्वप्रकाशः नानार्थप्रतिपादको भवति। एभ्यः सर्वेभ्योऽपि ग्रन्थेभ्यः समुचितान् अंशानादाय अमरसिंहः

स्वस्य नामलिङ्गानुशासनं नामकं सर्वतोमुखं किमपि कोशरत्नं रचितवान्। अस्मिन् एकस्यैव पदस्य सर्वानप्यर्थप्रकारान् प्रकाशयति, समानार्थकानां बहूनां पदानां प्रयागञ्च स्पष्टयति। एवमेव पदानां लिङ्गानि, विशेषप्रयोगाः, वचनं, अर्थभेदाः अव्ययादीनि च सुष्ठु प्रतिपाद्यन्ते।

अतः छात्राणां संस्कृताद्ययनाय अनिर्वार्य एवायं कोशग्रन्थः। साहित्यरचनायां व्याप्रियमाणानां नूतनपदप्रयोगः अनिवार्य एव। एकस्मिन् सन्दर्भे एकस्यैव पदस्य अनेकवारप्रयोगः वैरस्यं जनयति। तत् परिहृत्य रचनायां नवतां जनयितुं समानार्थकानां पदानां सम्पत्तिः प्रभवति। अमरकोशाद्ययनस्य स्पृहणीयतायां अतः परं किं प्रमाणं आवश्यकम्?

अस्मिन् कोशे त्रीणि काण्डानि, षड्विंशतिः वर्गाश्च सन्ति। अस्य प्रमुखव्याख्यानानि, व्याख्यातृनामानि च पश्यत-

अमरकोशोद्घाटनम् - क्षीरस्वामि।

बालप्रिया - कैक्कुलङ्ङर रामवारियः।

पारमेश्वरन् (मलयालम्) - वाचस्पतिः टी सी पारमेश्वरन् मूसत्।

## मुख्यपदानि (Keyterms)

अटवी, आरामः, वृक्षवाटिका, आक्रीडः, वीथिः, अङ्कुरः, वृक्षः।

## Discussion

**अमरसिंहः।**

विक्रमादित्यमहाराजस्य सदसि नवरत्नेषु अन्यतमः भवति अमरसिंहः इति सूचना अस्ति।

**धन्वन्तरिक्षपणकामरसिंहशङ्कु-**
**वेतालभट्टघटकर्परकालिदासाः।**
**ख्यातो वराहमिहिरो नृपतेः सभायां**
**रत्नानि वै वररुचिर्नवविक्रमस्य।।**

किन्तु श्लोकोऽयं कालान्तरे रचित इति ज्ञातुं शक्यते। तथाहि कालिदासस्य कालः क्रिस्तोः पूर्वं प्रथमे शतके इति प्रायेण निर्णीतं गवेषकैः। वराहमिहिरः कालिदासात्पूर्वं जीवितमधारयत् इति गणयन्ति गवेषकाः। अपि च विक्रमादित्यः इति नाम्ना प्रसिद्धाः नैके राजानः। अतः पूर्वोक्तश्लोकेन अमरसिंहे कालिदासस्य समकालिकत्वं स्थापयितुं न शक्यते। क्रिस्तोः पूर्वं चतुर्थे पञ्चमे वा शतके अमरकोशकर्ता अमरसिंहः जीवितमधारयत् इति विश्वासन्ति बहवो गवेषकाः।

भोः छात्राः, मातृशब्दः यूष्माकं सर्वेषामपि सुपरिचित एव। अस्य शब्दस्य समानार्थकानि अन्यानि पदानि यूयं जानीथ किम्?अमरसिंहः स्वस्य कोशग्रन्थे अमरकोशे 'जनयित्री प्रसूर्माता जननी' इति मात्रर्थकानि पदानि निर्दिशति। एव संस्कृतभाषायां विद्यमानानाम् अन्येषामपि पदानां पर्यायपदानि अमरकोशे उक्तानि।तादृशानि पदानि अधिकृत्य अमरकोशे वयं अधिगच्छामः।अस्य ग्रन्थस्य अपरं नाम 'नामलिङ्गानुशासनम्'इति। नाम्ना एव ज्ञातुं शक्यते यत् अस्य प्रतिपाद्यविषयः क इति। नामपदानां पुंलिङ्ग-स्त्रीलिङ्ग-नपुंसकभेदानाम्

अनुशासनं करोति आचार्यः।काण्डत्रयात्मके अस्मिन् प्रथमे काण्डे स्वर्गपर्यायपदानि देवादीनां पर्यायपदानि च विशदयति। द्वितीये काण्डे भूवर्गादयः सन्ति। अस्मिन् काण्डे वनसम्बद्धाः ओषधिवर्गादयः च अन्तर्भवन्ति।

शैलवर्गानन्तरं तत्सम्बन्धित्वेन वनवर्गः, तत्सम्बन्धित्वेन ओषधिवर्गः, पुनः मृगवर्गः च समायोजिताः। केचन पण्डिताः वन-ओषधिवर्गौ एकत्वेन विचार्य वनौषधिवर्गः इति नामकरणं कुर्वन्ति।

**अटव्यरण्यं विपिनं गहनं काननं वनम्।**
**महारण्यमरण्यानी गृहारामस्तु निष्कुटः।।१।।**

**आरामः स्यादुपवनं कृत्रिमं वनमेव यत्।**
**अमात्यगणिकागेहोपवने वृक्षवाटिका।।२।।**

*अटवी (ई-स्त्री), अरण्यं (अ-नपुं), विपिनं (अ-नपुं), गहनं (अ-नपुं), काननं (अ-नपुं), वनं (अ-नपुं) - वनस्य इति ६ पर्यायपदानि।
महारण्यं (अ-नपुं) अरण्यानी (ई-स्त्री) - उभयमपि महत् अरण्यम्।
गृहारामः (अ-पु) निष्कुटः (अ-पु) - उभयमपि उद्यानम्। गृहसमीपस्थं कृत्रिमं वनम् (उद्यानम्)।
आरामः (अ-पु) उपवनं (अ-नपुं) - कृत्रिमस्य वनस्य नाम। अर्थात् उद्यानम्। तद्वनं कृत्रिमं भवति। प्रमदवनम् (अ-नपुं) - अन्तःपुरोद्यानम्।
वृक्षवाटिका (आ-स्त्री) - अमात्यस्य गणिकायाः वा गृहस्य समीपस्थः गृहारामः।

*अटवी (ई-स्त्री) = अटवी शब्दः ईकारान्तः स्त्रीलिङ्गः इति अवगन्तव्यम्। एवमेव अरण्यशब्दः अकरान्तः नपुंसकलिङ्गः इत्यादि।

**पुमानाक्रीड उद्यानं राज्ञः साधारणं वनम्।**
**स्यादेतदेव प्रमदवनमन्तःपुरोचितम्।।३।।**

आक्रीडः (अ-पु) उद्यानं (अ-नपुं) - उभयमपि राजप्रासादस्य समीपस्थं उद्यानम्। तद्वनं कृत्रिमं भवति। प्रमदवनम् (अ-नपुं) - अन्तःपुरोद्यानम्।

**वीथ्यालिरावलिः पङ्क्तिः श्रेणी लेखास्तु राजयः।**
**वन्या वनसमूहे स्यादङ्कुरोऽभिनवोद्भिदि।।४।।**

वीथी (ई-स्त्री)आलिः आवलिः पङ्क्तिः (त्रयमपि इ-स्त्री) श्रेणी (ई-स्त्री) - वृक्षाणां पङ्क्तिः वृक्षनमूहः।
लेखाः (आ-स्त्री) राजयः (इ-स्त्री) - उभयमपि वृक्षाणाम् अतिबाहुल्यम्। सामान्यत एतानि सप्तपदान्यपि पङ्क्तिरित्यर्थे प्रयोगे सन्ति। वन्या (आ-स्त्री) - वनसमूहः। अङ्कुरः (अ-पु) – नूतनप्ररोहः।

**वृक्षो महीरुहः शाखी विटपी पादपस्तरुः।**
**अनोकहः कुटश्शालः पलाशी द्रुद्रुमागमाः।।५।।**

वृक्षः, महीरुहः (अ-पु) शाखी, विटपी (न-पु) पादपः (अ-पु) तरुः (उ-पु)

अनोकहः, कुटः, शालः (अ-पु) पलाशी (न-पु) द्रुः (उ-पु) द्रुमः, अगमः (अ-पु) - एतानि त्रयोदशपदानि वृक्षस्य पर्यायदानि भवन्ति। कुटः इत्यस्य स्थाने कुजः इति पदमपि वर्तते। कुजः - वृक्षः।

**वानस्पत्यः फलैः पुष्पात्तैरपुष्पाद्वनस्पतिः।**
**ओषध्यः फलपाकान्ताः स्यादवन्ध्यः फलेग्रहिः।।६।।**

वानस्पत्यः (अ-पु) – पुष्पात् जातैः फलैः उपलसितः वृक्षः। (यथा - आम्रः)। वनस्पतिः (इ-पु) पुष्पं विनाजातैः फलैः उपलसितो वृक्षः। (यथा - अश्वत्थः)। ओषधिः (इ-स्त्री) फलपाकान्तवृक्षः (यथा - कदली)। अवन्ध्यः(अ-पु) फलेग्रहिः (इ-पु) फलधरवृक्षः।

**वन्ध्योऽफलोऽवकेशी च फलवान् फलिनः फली।**
**प्रफुल्लोत्फुल्लसंफुल्लव्याकोशविकचस्फुटाः।।७।।**

वन्ध्यः, अफलः (अ-पु) अवकेशी (न-पु) - ऋतौ अपि फलरहितोवृक्षः। फलवान् (त-पु) फलिनः (अ-पु)फली (न-पु) -फलयुक्तः वृक्षः। प्रफुल्लः, उत्फुल्लः, संफुल्लः, व्याकोशः, विकचः, स्फुटः (अ-पु) - यथावत् विकसितः, (पुष्पितः) वृक्षः।

**फुल्लश्चैते विकसिते स्युरवन्ध्यादयस्त्रिषु।**
**स्थाणुरस्त्री ध्रुवशङ्कुर्ह्रस्वशाखाशिफ क्षुपः।।८।।**

फुल्लः, विकसितः (अ-पु) - विकसितः वृक्षः।

श्रद्धेयः - अवन्ध्यः इत्यारभ्य विकसितःइति पर्यन्तं वर्तमानानि पदानि विशेष्यपदानुसारेण त्रिषु लिङ्गेषु उपयुज्यन्ते। अवन्ध्यः वृक्षः, अवन्ध्या लता, अवन्ध्यं वनं इत्यादिवत्।

*स्थाणुः (उ-पु-नपुं) ध्रुवः (अ-पु) शङ्कुः (उ-पु) - शाखापत्ररहितः तरुः।

*ह्रस्वशाखाशिफः, क्षुपः (अ-पु) - क्षुद्रवृक्षः।

*स्थाणुरस्त्री - स्थाणुः+ अस्त्री। स्थाणुशब्दःस्त्रीलिङ्गे प्रयुज्यते। ततः अयं पुंलिङ्गे नपुंसकलिङ्गे च प्रयोक्तुं योग्यः।

**शाखा– विटपः, शिफः - वृक्षमूलम्। ह्रस्वाभिः शाखाभिः, ह्रस्वेन शिफेन च युक्तो वृक्षः क्षुप इत्युच्यते इत्यर्थः। स एव क्षुद्रवृक्षः।

**अप्रकाण्डे स्तम्बगुल्मौ वल्ली तु व्रततिर्लता।**
**लता प्रतानिनी वीरुद् गुल्मिन्यूलप इत्यपि।।९।।**

स्तम्बः, गुल्मः - (अ-पु) अप्रकाण्डवृक्षः (अविद्यमानः प्रकाण्डः यस्य सः)प्रकाण्डरहितो वृक्षइत्यर्थः। वल्ली (ई-स्त्री) व्रततिः (इ-स्त्री) लता (आ-स्त्री) वीरुत् (ध-स्त्री) गुल्मिनी (ई-स्त्री)

उलपः (अ-पु) - अधिकतया व्यापृतायाः लतायाः पर्यायपदानि। प्रतानिनीलता – पत्रैः शाखाभिश्च प्रसृतालता

**नगाद्यारोह उच्छ्रायः उत्सेधश्चोच्छ्रयश्चः सः।**
**अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधिस्तरोः।।१०।।**

उच्छ्रायः, उत्सेधः, उच्छ्रयः (अ-पु) - पर्वत -वृक्ष-हर्म्यादीनां औन्नत्यम् । प्रकाण्डः (अ-पु-नपुं)

स्कन्धः (अ-पु) - वृक्षस्य मूलादारभ्य शाखापर्यन्तो भागः।

**समे शाखालते स्कन्धशाखाशाले शिफाजटे।**

**शाखाशिफावरोहः स्यान्मूलाच्चाग्रं गता लता।।११।।**

शाखा, लता (आ-स्त्री) - वृक्षस्य श्रृङ्गं (शिखरम्)। स्कन्धशाखा, शाला (आ-स्त्री) - स्कन्धाज्जायमाना शाखा। शिफा, जटा (आ-स्त्री), अवरोहः (अ-पु) - मूलतः अग्रपर्यन्तं अवरोहरूपेण वर्तमाना लता। (वटादिवृक्षाणां शाखाभ्यः लम्बमानाजट)

**शिरोऽग्रं शिखरं वा ना मूलं बुद्ध्नोऽङ्घ्रिनामकः।**

**सारो मज्जा नरि त्वक् स्त्री वल्कं वल्कलमस्त्रियाम्।।१२।।**

शिरः (स-नपुं) अग्रं, शिखरं (अ-नपुं) - वृक्षस्य अग्रभागः। ''शिखरंवा ना''इत्युक्तत्वात्शिखरशब्दः पुंलिङ्गेऽपि प्रयुज्यते (ना = नरः)। मूलं (अ-नपुं)

बुध्नः, *अङ्घ्रिनामकः (अ. पु) - वृक्षमूलस्य पर्यायपदानि।

सारः (अ-पु) **मज्जा (न-पु) - वृक्षस्य स्थिरांशः ।

त्वक् (च-स्त्री) वल्कं, वल्कलं (अ-नपुं) वल्कलममस्त्रियांइत्युक्तत्वात्वल्कलशब्दः पुंलिङ्गेऽपिप्रयुज्यते- वृक्षस्य त्वक्।

*अङ्घ्रिनामकः इति पदस्यार्थः पाद इति संज्ञया युक्तः इति। अंघ्रि =पादः। ततः पादस्य पर्यायपदानि भवन्ति इति पारमेश्वरी व्याख्यायां स्पष्टीकृतम्।

**मज्जाइत्यस्य ''मज्जामज्जानौ मज्जान''इति नकारान्तत्वेन ''मज्जा - मज्जे - मज्जाः''इति स्त्रीलिङ्गत्वेन च गणना अस्तीति पारमेश्वरी। नटि = पुंसि = पुंलिङ्गे।

**काष्ठं दार्विन्धनं त्वेध इध्ममेधः समित् स्त्रियाम्।**

**निष्कुहः कोटरं वा ना वल्लरिर्मञ्जरिः स्त्रियाम्।।१३।।**

काष्ठं (अ-नपुं) दारु (उ-नपुं) - वृक्षस्य काष्ठम्। इन्धनं (अ-नपुं) एधः स-नपुं)

इध्मं (अ-नपुं) एधः (अ-पु) समित् (ध-स्त्री) - काष्ठस्य पर्यायपदानि(अग्निं प्रज्वालयितुम् उपयुज्यमानं शुष्कतृणादि काष्ठशब्दस्य अत्र अर्थः)।

निष्कुहः (अ-पु) कोटरं (अ-नपुं) - वृक्षे जातं कोटरम्। वृक्षस्योपरिजातं विवरम्। कोटरशब्दः पुंलिङ्गेऽपि।

वल्लरिः, मञ्जरिः (इ-स्त्री) - पुष्पस्तबकः।

**पत्रं पलाशं छदनं दलं पर्णं छदः पुमान्।**

**पल्लवोऽस्त्रि किसलयं विस्तारो विटपोऽस्त्रियाम्।।१४।।**

पत्रं, पलाशं, छदनं दलं, पर्णं (अ-नपुं) छदः अ-पु) - पर्णस्य पर्यायपदानि। पल्लवः (अ-पु) किसलयं (अ-नपुं) - किसलयस्य पर्यायपदे भवतः। (नूतनपदस्य पर्यायपदे)।पल्लवशब्दः नपुंसकेऽपि प्रयुज्यते।

विस्तारः, विटपः (अ-पु) - पल्लवसमुदायः।

**वृक्षादीनां फलं सस्यं वृन्तं प्रसवबन्धनम्।**

**आमे फले शलाटुः स्याच्छुष्के वानमुभे त्रिषु।।१५।।**

सस्यं (अ-नपुं) - वृक्षादीनां फलम्। वृन्तं (अ-नपुं) - प्रसवबन्धनम् । पुष्पाणां फलानाञ्च मातृवृक्षेण बन्धनम्। शलाटुः (उ-पु) आमफलम्, अपक्वफलम्। वानम् (अ-नपुं) शुष्कं फलम्। शलाटुः, वानं इति पदद्वयं त्रिष्वापि लिङ्गेषु प्रयुज्यते।

**क्षारको जालकं क्लीबे कलिका कोरकः पुमान्।**
**स्यात् गुच्छकस्तु स्तबकः कुड्मलो मुकुलोऽस्त्रियाम्।।१६।।**

क्षारकः (अ-पु) जालकं (अ-नपुं) - नूतना कलिका (अस्फुटकलिका)। कलिका (आ-स्त्री)
कोरकः (अ-पु) - अविकसितकुसुमम्। गुच्छकः, स्तबकः (अ-पु) विकासोन्मुखपुष्पम्। कुड्मलः, मुकुलः (अ-पु) - ईषद्विकासोन्मुखपुष्पम्।

**स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्।**
**मकरन्दः पुष्परसः परागः सुमनोरजः।।१७।।**

सुमनसः (स- नित्यं बहुवचनं स्त्री) पुष्पं, प्रसूनं, कुसुमं, सुमं (अ-नपुं) - पुष्पस्य पर्यायपदानि। मकरन्दः, पुष्परसः (अ-पु) - पुष्पमधुः। परागः (अ-पु) पुष्पस्य रजः।

**संक्षिप्तीकरणम्।**

संक्षिप्तीकरणम् अधो दीयते पट्टिकायाम्।

| पदानि | पर्यायपदानि | अर्थभेदः |
|---|---|---|
| वनम् | अटवी, अरण्यं, विपिनं, काननम् | |
| अरण्यम्-महारण्यम् | | अरण्यम् - काननम् वनम्<br>महारण्यम् - महत् अरण्यम्<br>(महत् वनम्) अरण्यानि |
| वनम् - उपवनम् | | वनं - काननम्।<br>(स्वाभाविकरीत्या वर्तमानम्)<br>उपवनम् -कृत्रिमं वनम्। |
| वृक्षः | महीरुहः, शाखी, विटपी, पादपः। | |
| वानस्पत्यः-<br><br>वनस्पतिः | | वानस्पत्यः - पुष्पात् जातैः फलैः<br>उपलक्षितो वृक्षः।<br>वनस्पतिः - पुष्पं विनाजातैः फलैः<br>उपलक्षितो वृक्षः। |
| ओषधिः - फलेग्रहिः | | ओषधिः - फलपाकान्तः वृक्षः।<br>फलेग्रहिः - यथासमयं<br>फलधरवृक्षः |

| | | |
|---|---|---|
| वन्ध्यः | अफलः, अवकेशी, वन्ध्यः | वन्ध्यः- ऋतौ अपि फलरहितो वृक्षः। |
| फली | फलिनः, फलवान्, फली | फली - फलयुक्तः वृक्षः। |
| संफुल्लः<br>स्थाणुः - क्षुपः | प्रफुल्लः, उत्फुल्लः, व्याकोशः, विकचः। | स्थाणुः -शाखापत्ररहितः तरुः।<br>क्षुपः - क्षुद्रवृक्षः। |

| पदानि | पर्यायपदानि | अर्थभेदः |
|---|---|---|
| वनम् - वानम् | | वनम् इत्यस्य काननम् इत्यर्थः।<br>वानम् इत्यस्य शुष्कं फलम् इत्यर्थः। |
| प्रततिः | वल्ली, लता, वीरुत्, गुल्मिनी | |
| उत्सेधः - स्कन्धः | | उत्सेधः - पर्वतवृक्षादीनां दैर्घ्यम्।<br>स्कन्धः -वृक्षस्य मूलादारभ्य शाखापर्यन्तः भागः। |
| काष्ठम् | दारु, इन्धनम्, एधः(सकारान्तः), एधः(अकारान्तः) | |
| कोटरम् - मञ्जरिः | | कोटरम् - वृक्षे जातं कोटरं (विवरम् )।<br>मञ्जरिः- पुष्पस्तबकः। |
| पर्णम् | पलाशं, छदनं, दलं, छदः | |
| सस्यम् - जालकम् | | सस्यम् - वृक्षादीनां फलम्।<br>जालकम् - नूतनी कलिका। |
| स्तबकः - मुकुलः | | स्तबकः - विकासोन्मुखं पुष्पम्।<br>मुकुलः - ईषद्विकासोन्मुखं पुष्पम्।<br>सुमम् - सुमनसः, पुष्पं, प्रसूनं, कुसुमम् |

## पुनरावृत्तिः (Recap)

- अटवी इति पदस्य अर्थः वनम्।
- महाराण्यं, गृहारामः, आरामः, वृक्षवाटिका च इत्यदीनां अर्थभेदाः।
- आक्रीडः, उद्यानम्- उभयमपि राजप्रासादस्य समीपस्थं उद्यानम्।
- प्रमदवनम् - अन्तःपुरोद्यानम्।
- वृक्षपदस्य चत्वारि पर्यायपदानि।
- वानस्पत्यानां स्वभावः - पुष्पाणि जायन्ते, यथाकालं फलानि च संजायन्ते।
- अवकेशिनः फलरहितवृक्षः।
- फलिनः फलयुक्तः वृक्षः।
- विकसितः वृक्षः भवति फुल्लः।
- विकसितः शाखापत्ररहितः वृक्षः भवति स्थाणुः।(छिन्नः वृक्षः)।
- वृक्षस्य सविशेषता।
- स्तम्बः, गुल्मः, इत्यादि अप्रकाण्डवृक्षः।
- लतायाः पर्यायपदानि - वल्ली, व्रततिः।
- पर्वतवृक्षादीनां धैर्घ्यं उत्सेधः।
- वृक्षस्य मूलादारभ्य शाखापर्यन्तः भागः - प्रकाण्डः, स्कन्धः।
- वृक्षस्य शिखरं शाखालता।
- प्रसूनम् इति पदस्य पर्यायपदानि सुमनसः, पुष्पम्, कुसुमम्, सुमम्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. अटवी' इत्यस्य कोऽर्थः?
२. 'अरण्यानी'इत्यस्य समानार्थं पदं किम्?
३. का नाम वृक्षवाटिका?
४. 'राजिः' - किं लिङ्गम्?
५. गुल्मः इति पदस्य समानार्थकं पदं लिखत।
६. शिफा नाम का?

७. मज्जा इति पदस्यान्तं लिङ्गं च लिखत।
८. वल्कलम् इत्यस्य समानार्थकं पदं ................। (पूरयत)

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

**(Answer the following questions one or two sentences)**

१. वृक्षपदस्य चत्वारि पर्यायपदानि लिखत।
२. वनस्पत्यानां स्वभावः कीदृशः?
३. अवकेशिनः फलिनस्य च मिथः को भेदः?
४. स्थाणोः स्वभावः कीदृशः?
५. वनम् वानम् इत्यनयोः कः भेदः?
६. कोरकः इत्यस्य समानार्थकं पदं किम्?
७. ईषद्विकासोन्मुखस्य पुष्पस्य किं नाम?
८. कुसुमम् इत्यस्य पर्यायपदानि कानि?

## निर्दिष्टाभ्यासः (Assignments)

१. वृक्षस्य पर्यायपदानां सविशेषताः
२. वारिवर्गे अन्तर्भूतान् विंशतिः श्लोकान् पठन्तु।

**निर्देशानुसारम् उत्तरं लिखत।**

**I. पूरयत।**
१. प्रफुल्लोत्फुल्लसंफुल्ल .......................... विकचस्फुटाः।
२. स्थाणुरस्त्री ध्रुवः .......................... ह्रस्वशाखाशिफः वृक्षः।
३. अटव्यरण्यं .......................... गहनं काननं वनम्।
४. वीथ्यालिरावलिः .......................... श्रेणीलेखास्तु राजयः।
५. लता प्रतानिनी .................. गुल्मिन्युलप इत्यपि।
६. .................. दार्विन्धनं त्वेध इद्ध्ममेधः समित् स्त्रियाम्।
७. पत्रं पलाशं छदनं .................. पर्णं छदः पुमान्।
८. स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमम् ..................।
**II. पर्यायपदानि लिखत।**
१. विपिनम्।

२. महीरुहः।
३. फली।
४. स्थाणुः।
५. लता।
६. पर्णम्।
७. प्रसूनम्।

**यथोचितं योजयत।**

| **I क** | | **ख** |
|---|---|---|
| १. काननम् | - | गृहारामः। |
| २. निष्कुटः | - | उद्यानम्। |
| ३. आक्रीडः | - | वन्या। |
| ४. वनसमूहः | - | वनम्। |

| **II क** | | **ख** |
|---|---|---|
| १. व्रततिः | - | पर्वतवृक्षादीनां दैर्ध्यम्। |
| २. उलुपः | - | वृक्षस्य शिखरम्। |
| ३. उत्सेधः | - | लता। |
| | - | प्रतानिनी लता। |

## उत्तराणि (Answer to Objective type questions)

१. वनम्।
२. महारण्यम्।
३. अमात्यस्य गणिकायाः वा गृहस्य समीपस्थः आरामः।
४. स्त्रीलिङ्गम्।
५. स्तम्बः।
६. मूलतः अग्रपर्यन्तम् अवरोहरूपेण वर्तमाना लता।
७. नकारान्तः पुल्लिङ्गम्।
८. वल्कम्।

## अधिकवाचनाय ग्रन्थाः (Suggested Readings)

१. अमरसिंहः अमरकोशम् व्याख्याता - टि.वि माधववारियर् , काणिप्प्यूर् पञ्चाङ्गं पुस्तकशाला, कुन्नंकुलम् २०१२, पुटं ६६ - ६९१.

२. अमरसिंहः, अमरकोशम्, व्याखाता वाचस्पतिः टि.सी.परमेश्वरन् मूसद्, नाषणल् बुक् स्टाल्, कोट्टयम्, १९८३, पुटानि २७८-२८४.

# Unit - 2

## तृतीय -चतुर्थ - पञ्चमखण्डेषु पाठ्यांशगतानां सुबन्तपदानां अन्तलिङ्गविभक्तिवचनानि।

### उद्देश्यानि (Learning Outcomes)

- शब्दानां विभक्तिज्ञानम्।
- सुबन्तानां लिङ्गज्ञानम्।
- सुबन्तानां वचनज्ञानम्।

### प्राग्व्यपेक्षाः (Prerequisites)

पदानि मित्राणि भवन्ति। शक्तं पदम्। अस्मात् शब्दात् अयमर्थो बोधव्यःइति ईश्वरसङ्केतः शक्तिः। शक्तिः अस्य अस्तीति शक्तम्। अनेकानि पदानि पठितुं लाघवं वर्तते यदि छात्राः शब्दाज्ञानवान् चेत्। यथा अकारान्तस्य कस्यचन पुंलिङ्गशब्दस्य पठनेन संस्कृते वर्तमानानि प्रतिशतं पञ्चत्रिंशत् पदानि ज्ञातुं शक्यन्ते। रामशब्दवद् भवति कृष्ण-गोपाल-शिव-जयकृष्णादयः शब्दः। अतः प्रथमम् अस्माभिः शब्दानां रूपाणि, अन्त-लिङ्ग-विभक्ति-वचनानि च पठितव्यानि।

### मुख्यपदानि (Keytems)

भूपतिः, नृपस्य ,नगरी, तस्य, राज्ञः, धनुः, ते।

### Discussion

तत्तत्पाठभागेषु सूचितानि भवन्ति। तेषु कतिपयानि अत्र वर्तन्ते।

**अन्तलिङ्गविभक्तिवचनानि (तृतीयखण्डस्य रघुवंशमहाकाव्यस्य)**

| | |
|---|---|
| वनाय | - अकारान्तः नपुंसकलिङ्गः वनशब्दः चतुर्थी एकवचनम्। |
| दयिताम् | - आकारान्तः स्त्रीलिङ्गः दयिताशब्दः द्वितीया एकवचनम्। |
| तस्य | - दकारान्तः पुंलिङ्गः तच्छशब्दः षष्ठी एकवचनम्। |
| भूपतिः | - इकारान्तः पुंलिङ्गः भूपतिशब्दः प्रथमा एकवचनम्। |
| विरावैः | - अकारान्तः पुंलिङ्गः विरावशब्दः तृतीया बहुवचनम्। |

धनुर्भृतः - तकारान्तः पुंलिङ्गः धनुर्भृत् शब्दः षष्ठी एकवचनम्।
कुञ्जेषु - अकारान्तः पुंलिङ्गः कुञ्जशब्दः सप्तमी बहुवचनम्।
तस्मिन् - दकारान्तः पुंलिङ्गः तच्छब्दः सप्तमी एकवचनम्।
प्रभा - आकारान्तः स्त्रीलिङ्गः प्रथमा एकवचनम्।
वर्त्मनि - नकारान्तः नपुंसकलिङ्गः वर्त्मन् शब्दः सप्तमी एकवचनम्।
सपर्याम् - आकारान्तः स्त्रीलिङ्गः सपर्याशब्दः द्वितीया एकवचनम्।
गौरीगुरोः - उकारान्तः पुंलिङ्गः गौरीगुरुशब्दः षष्ठी एकवचनम्।
गोप्ता - ऋकारान्तः पुंलिङ्गः गोप्तृशब्दः प्रथमा एकवचनम्।
नृपस्य - अकारान्तः पुंलिङ्गः नृपशब्दः षष्ठी एकवचनम्।
गवि - ओकारान्तः पुंलिङ्गः गोशब्दः सप्तमी एकवचनम्।
प्रहर्तुः - ऋकारान्तः पुंलिङ्गः प्रहर्तृशब्दः षष्ठी एकवचनम्।
भोगी - नकारान्तः पुंलिङ्गः भोगिन्शब्दः प्रथमा एकवचचनम्।

**(चतुर्थखण्डस्य रघुवंशमहाकाव्यस्य)**

राज्ञे - नकारान्तः पुंलिङ्गः राजन् शब्दः चतुर्थी एकवचनम्।
गुरवे - उकारान्तः पुंलिङ्गः गुरुशब्दः चतुर्थी एकवचनम्।
भर्तुः - ऋकारान्तःपुंलिङ्गः भर्तृशब्दः षष्ठी एकवचनम्।
द्यौ - वकारान्तःस्त्रीलिङ्गःदिव्शब्दः प्रथमा एकवचनम्।
प्रियायै - आकारान्तः स्त्रीलिङ्गः प्रियाशब्दः चतुर्थी एकवचनम्।
वाचा -चकारान्तः स्त्रीलिङ्गः वाच्शब्दः तृतीया एकवचनम्।

**पञ्चमखण्डस्य (बालरामायणम्।)**

नगरी - ईकारान्तः स्त्रीलिङ्गः नगरीशब्दः प्रथमा एकवचनम्।
जनपदे - अकारान्तः पुंलिङ्गः जनपदशब्दः सप्तमी एकवचनम्।
तस्य - दकारान्तः पुंलिङ्गः तच्छशब्दः षष्ठी एकवचनम्।
राजा - नकारान्तः पुंलिङ्गः राजन्शब्दः प्रथमा एकवचनम्।
धारयन् -तकारान्तः पुंलिङ्गः धारयन्शब्दः प्रथमा एकवचनम्।
ऋष्यश्रृङ्गं -अकारान्तः पुंलिङ्गः ऋष्यश्रृङ्गशब्दः द्वितीया एकवचनम्।
कौसल्यायै -आकारान्तः स्त्रीलिङ्गः कौसल्याशब्दः चतुर्थी एकवचनम्।
भगवान् - तकारान्तः पुंलिङ्गः भगवत्शब्दः प्रथमा एकवचचनम्।
दारुणस्य -अकारान्तः नपुंसकलिङ्गः दारुणशब्दः षष्ठी एकवचनम्।
दीक्षाम् -आकारान्तः स्त्रीलिङ्गः दीक्षाशब्दः द्वितीया एकवचनम्।
महत्या -ईकारान्तः स्त्रीलिङ्गः महतीशब्दः तृतीया एकवचनम्।
वयम् -अस्मद्शब्दः-त्रिषु लिङ्गेषु समानः,प्रथमा बहुवचनम्।
धनुषः -सकारान्तः पुंलिङ्गः धनुस्शब्दः षष्ठी एकवचनम्।
अस्य -मकारान्तः पुंलिङ्गः इदम्शब्दः षष्ठी एकवचनम्।

| | |
|---|---|
| राज्ञः | -नकारान्तः पुंलिङ्गः राजन्शब्दः षष्ठी एकवचनम्। |
| सर्वम् | -अकारान्तः नपुंसकलिङ्गः सर्वशब्दःप्रथमा एकवचनम्। |
| सपर्यया | - आकारान्तः स्त्रीलिङ्गःसपर्यशब्दः तृतीया एकवचनम्। |
| ऊर्मिलाम् | - आकारान्तः स्त्रीलिङ्गःऊर्मिलाशब्दः द्वितीया एकवचनम्। |
| दूतान् | - अकारान्तः पुंलिङ्गः दूतशब्दः द्वितीया बहुवचनम्। |
| मुनिसंसदि | - दकारान्तः स्त्रीलिङ्गः मुनिसंसद्शब्दः सप्तमी एकवचनम्। |
| ते | - दकारान्तः पुंलिङ्गः तच्छशब्दः प्रथमाबहुवचनम्। |
| धनुः | - सकारान्तः नपुंसकलिङ्गः धनुस्शब्दः प्रथमा एकवचनम्। |
| संहतेषु | -अकारान्तः पुंलिङ्गः संहतशब्दः सप्तमी बहुवचनम्। |
| गुणगरीयसीः | - ईकारान्तः स्त्रीलिङ्गः गुणगरीयसीशब्दः द्वितीया बहुवचनम्। |
| वदतः | - तकारान्तः पुंलिङ्गः वदत्शब्दः द्वितीया बहुवचनम्। |
| प्रेम | - नकारान्तः पुंलिङ्गः प्रेमन्शब्दः प्रथमा एकवचनम्। |

## पुनरावृत्तिः (Recap)

| | |
|---|---|
| तस्मिन् | - दकारान्तः पुल्लिङ्गः तच्छब्दः सप्तमी एकवचनम्। तस्मिन् - तयोः - तेषु। |
| राजा | - नकारान्तः पुंलिङ्गः राजन्शब्दः प्रथमा एकवचनम्।<br>राजा - राजानौ - राजानः। |
| धनुः | -सकारान्तः नपुंसकलिङ्गः प्रथमा एकवचनम्। धनुः - धनुषी - धनूंषि। |
| ते | - दकारान्तः पुंलिङ्गः तच्छशब्दः प्रथमा बहुवचनम्। सः - तौ - ते। |
| भगवान् | - तकारान्तः पुंलिङ्गः भगवत्शब्दः प्रथमा एकवचचनम्।<br>भगवान् - भगवन्तौ - भगवन्तः। |
| गुरवे | -उकारान्तः पुंलिङ्गः चतुर्थी एकवचनम्। गुरवे - गुरुभ्यां - गुरुभ्यः। |
| नगरी | - ईकारान्तः स्त्रीलिङ्गः नगरीशब्दः प्रथमा एकवचनम्। नगरी - नगर्यौ - नगर्यः। |
| वयम् | - अस्मद्शब्दः-त्रिषु लिङ्गेषु समानः-प्रथमा बहुवचनम्। अहं - आवां - वयम्। |

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. ऋष्यश्रृङ्गशब्दस्य द्वितीया एकवचने किं रूपम्?
२. दारुणस्य इति शब्दस्य विभक्तिः का?
३. दीक्षाम् - अत्र कः शब्दः?
४.राजन् शब्दस्य पञ्चमी विभक्तौ किं रूपम्?
५. तस्य इति पदस्य मूलशब्दः कः?

६. कौसल्यायै इति पदस्य किं लिङ्गम्?
७. महत्या- कस्य शब्दस्य रूपमिदम् ?
८. सपर्यशब्दस्य पञ्चमी एकवचने किं रूपम्?
९. प्रहर्तुः - कस्य शब्दस्य रूपमिदम् ?
१०. वाचा इति पदस्य लिङ्गं किम्?
११. जनपदशब्दस्य सप्तमी एकवचने किं रूपम्?
१२. नगरीशब्दस्य लिङ्गं किम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

**(Answer the following questions one or two sentences)**

१. भोगीशब्दस्य लिङ्गं विभक्तिं वचनं च लिखत।
२. तच्छशब्दस्य पुंलिङ्गे पञ्चमी विभक्तौ रूपाणि लिखत।
३. वर्त्मनि इति पदस्य अन्तलिङ्गविभक्तिवचनानि लिखत।

## निर्दिष्टाभ्यासः (Assignments)

१. यथेष्टं त्रयाणां शब्दानां सर्वाणि रूपाणि लिखन्तु।
२. अकारान्तपुंलिङ्ग-आकारान्तस्त्रीलिङ्ग-इकारान्तपुंलिङ्ग शब्देषु एकैकं सविभक्तिवचनं लिखन्तु।

## उत्तराणि (Answer to Objective type questions)

१. ऋष्यश्रृङ्गम्।
२. षष्ठी ।
३. दीक्षा।
४. राज्ञः।
५. तत्।
६. स्त्रीलिङ्गः।
७. महत्।
८. सपर्यया।
९. प्रहर्तु।
१०. स्त्रीलिङ्गः।

११. जनपदे।
१२. स्त्रीलिङ्गः।

## अधिकवाचनाय ग्रन्थाः (Suggested Readings)


१. अमरसिंहः अमरकोशम् व्याख्याता - टि.वि माधववारियर् , काणिप्प्यूर् पञ्चाङ्गं पुस्तकशाला, कुन्नंकुलम् २०१२, पुटं ६६ - ६९१.
२. अमरसिंहः, अमरकोशम्, व्याखाता वाचस्पतिः टि.सी.परमेश्वरन् मूसद्, नाषणल् बुक् स्टाल्,कोट्टयम्, १९८३, पुटानि २७८-२८४.
३. कालिदासः, रघुवंशमहाकाव्यम्, सर्गः दिवुतीयः, व्याख्याता पि.के.रामचन्द्र अय्यर्, आर्.एस्.वाध्यार् आन्ड् सन्स्, कल्पात्ति, पासक्काट्, २०१३।
४. कालिदासः, रघुवंशमहाकाव्यम्, व्याख्या,कुट्टिकृष्णमारार्, मातृभूमि पब्लिक्केषन्स्, कोट्टयम्।
५. रामचन्द्र झा,‘रूपचन्द्रिका’ चौखम्बा संस्कृतसीरीस् ओफीस् वाराणसी, २०११।
६. अप्पय्यदीक्षितः, सिद्धान्तकौमुदी बालमनोरमा तृतीयः भागः, चौखम्बा,१९६९।

# Unit - 3

## तृतीय - चतुर्थ - पञ्चमखण्डेषु पाठ्यांशगतानां क्रियापदानां धातुपदलकारपुरुषवचनानि।

### उद्देश्यानि (Learning outcomes)

- क्रियापदानां धातुज्ञानम्।
- परस्मैपद-आत्मनेपद-उभयपदग्रहणम्।
- क्रियारूपाणि विविच्य जानाति।

### प्राग्व्यपेक्षाः (Prerequisites)

पदानि त्रिधा। सुबन्त-निङन्त-अव्ययभेदात्। सुबन्तानि नामपदानि।तिङन्तानि क्रियापदानि। अव्ययपदानि व्यतियानरहितानि भवन्ति। सुबन्तानां तिङन्तानां प्रतिविभक्ति प्रतिपुरुषं च भेदाः वर्तन्ते। क्रियापदानि प्रधानतया त्रिधा। परस्मैपदिनः आत्मनेपदिनःउभयपदिनश्चेति। केचनआत्मनेपदिनः यथा भू, अस्, पठ् स्थादयः। केचनआत्मनेपदिनः यथा एध् वृतु रुच् प्रभृतयः। केचन धातवः परस्मैपदे आत्मनेपदे च वर्तन्ते। ते उभयपदिनः यथा डुकृञ्, करणे, डुपचष्, पाके प्रभृतयः। आवर्तनैव क्रियापदानि वशीकर्तुं शक्यन्ते। कालानुसारं लकाराः प्रयुज्यन्ते।वर्तमाने लट्लकारः भूते लङ् लिट् लुङ्च। लृट् लृङ् लोट् इत्येते लकाराः भविष्यत्काले प्रयुज्यन्ते। सुगमयारीत्या संस्कृताद्ययनाय धातूनां पद-लकार-पुरुषवचनानि अवगन्तव्यानि। पाठभागे वर्तमानानां कतिपयानां धातूनां सूचना अत्र सन्ति।

### मुख्यपदानि (Keyterms)

मुमोच, अन्वगच्छत्, विरराज, आनर्च, ददर्श, बिभेषि।

### Discussion

**क्रियापदानां धातुपदलकारपुरुषवचनानि।(तृतीय खण्डस्य रघुवंशमहाकाव्यस्य)**

मुमोच - 'मुच्लृमोचन' परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।
मुमोच - मुमुचतुः - मुमुचुः।

अन्वगच्छत् - अनु इत्युपसर्गपूर्वकस्य‘गम्लृ गतौ’ इति धातोः परस्मैपदी लङ् प्रथमपुरुष एकवचनम्।
अन्वगच्छत् - अन्वगच्छताम् - अन्वगच्छन्।

जुगोप - ‘गुपू रक्षणे’इति धातुः लिट् परस्मैपदी प्रथमपुरुष एकवचनम्।
जुगोप - जुगुपतुः - जुगुपुः।

न्यषेधि -‘निपूर्वकः षिध (सेध्) गत्यां’इति धातुः, कर्मणि-लङ्-प्रथमपुरुषःा एकवचनम्

अभूत् -‘भ’ूधातुः-परस्मैपदी-लुङ्-प्रथमपुरुष-एकवचनम्।
अभूत् - अभूताम् - अभूवन्।

अन्वगच्छत् -अनु उपसर्गपूर्वकस्य ‘गम्लृ गता’ धातोः-परस्मैपदी-लङ्-प्रथमपुरुष एकवचनम्।
अन्वगच्छत् - अन्वगच्छताम् - अन्वगच्छन्।

आसीत् -‘अस भुवि’ धातुः परस्मैपदी लङ् प्रथमपुरुषः एकवचनम्।
आसीत् - आस्ताम् - आसन्।

विरराज -वि पूर्वकः‘राजृ दीप्ता’ धातुः परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।
विरराज - विरेजतुः - विरेजुः।

अवाकिरन् -अव पूर्वकस्य‘कॄ विक्षेप’ इति धातोः परस्मैपदी-लङ्-प्रथमपुरुषः-बहुवचनम्।
अवाकिरत् - अवाकिरताम् - अवाकिरन्।

आपुः -‘आप्लृ गता’ इति धातुः परस्मैपदी-लिट्-प्रथमपुरुषः-एकवचनम्।
आप - आपतुः - आपुः।

सिषेवे -‘षिव् सेवने’इति धातुः आत्मनेपदी लिट् प्रथमपुरुषः एकवचनम्।
सिषेवे - सिषेवाते - सिषेविरे।

शशाम -‘शम शमन’ इति धातुः परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।
शशाम - शेमतुः - शेमुः।

आपुः -‘आप्लृ गतौ’इति धातुः परस्मैपदी लिट् प्रथमपुरुषः बहुवचनम्।

शुश्राव -‘श्रु श्रवण’ इति धातुः परस्मैपदी लिट् प्रथमपुरुषः बहुवचनम्।

बबाधे -‘बाध् बाधने’इति धातुः आत्मनेपदी लिट् प्रथमपुरुषः एकवचनम्।

प्रचक्रमे -प्र इत्युपसर्गपूर्वकः ‘क्रमु पादविक्षेपे’ इति धातुः आत्मनेपदी लिट् प्रथमपुरुषः एकवचनम्।
प्रचक्रमे - प्रचक्रमाते - प्रचक्रमिरे

अन्वग्ययौ -अन्वक् (अव्ययपूर्वक) ‘या प्रापणे’इति धातुः परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।
अन्वग्ययौ - अन्वग्ययतुः - अन्वग्ययुः।

अलञ्चक्रतुः -अलं पूर्वक ‘डुकृञ् करणे’ इति धातुः परस्मैपदी लिट् प्रथमपुरुष द्विवचनम्।
अलञ्चकार - अलञ्चक्रतुः - अलञ्चक्रुः।

| | |
|---|---|
| पपौ | -पा पानेपरस्मैपदी लिट् प्रथमपुरुष द्विवचनम्।<br>पपौ - पपतुः - पपुः। |
| आनर्च | -'अर्च पूजायां' लिट् परस्मैपदी प्रथमपुरुषः एकवचनम्।<br>आनर्च - आनर्चतुः - आनर्चुः। |
| ननन्दतुः | -'नन्द् समृद्धा' इति धातुःार-लिट्-प्रपु-द्विव।<br>ननन्द - ननन्दतुः - ननन्दुः। |
| भेजे | -'भज् सेवायां'इति धातुःआत्मनेपदी-लिट्-प्रथमपुरुषः-एकवचनम्।<br>भेजे - भेजाते - भेजिरे। |
| उदतिष्ठत् | -उत् इत्युपसर्गपूर्वकः स्था धातुः परस्मैपदी-लङ्-प्रथमपुरुषः-एकवचनम्।<br>उदतिष्ठत् - उदतिष्ठताम् - उदतिष्ठन्। |
| व्यतीयुः | -वि, अतिइत्युपसर्गद्वयपूर्वकः इण् गतौ इति धातुःपरस्मैपदी-लिट्-प्रथमपुरुषः-बहुवचनम्।<br>व्यतीय - व्यतीयतुः -व्यतीयुः। |
| ययौ | -'या प्रापण'इति धातुःपरस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।<br>ययौ-ययतुः-ययुः। |
| आनर्च | -'अर्च पूजायां'इतिधातुः परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।<br>अनर्च-आनर्चतुः-आनर्चुः। |
| व्यतीयुः | -वि अति पूर्वक इण् गतौ इति धातुः परस्मैपदी लिट् प्रथमपुरुषः बहुवचनम्। |
| आविवेश | -आङ् इति उपसर्गपूर्वस्य 'विश् विशने'इति धातोःपरस्मैपदी लिट् प्रथमपुरुषः बहुवचनम्।<br>आविवेश - आविविशतुः - आविविशुः। |
| चकर्ष | -'कृष् विलेखने'इति धातुः परस्मैपदी-लिट्-प्रथमपुरुषः-एकवचनम्।<br>चकर्ष – चकृषतुः - चकृषुः। |
| निवर्तयामास | -'नि वृत् वर्तन'इति धातोः परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।<br>निवर्तयामास - निवर्तयामासतुः - निवर्तयामासुः। |
| ददर्श | -दृशिर् प्रेक्षणे- परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।<br>ददर्श – ददृशतुः - ददृशुः। |
| ऐच्छत् | -'इष् इच्छायां'इति धातोः लङ् प्रथमपुरुषः एकवचनम्।<br>ऐच्छत् - ऐच्छताम् - ऐच्छन्। |
| अवतस्थे | -'अव' उपसर्गपूर्वकस्य (ष्ठा गतिनिवृत्तौ) 'स्था' धातोः लिट् प्रथमपुरुषः एकवचनम्।<br>अवतस्थे - अवतस्थाते - अवतस्थिरे। |
| अदह्यत | -'दह् भस्मीकरणे'इति धातोः आत्मनेपदी कर्मणि लङ् प्रथमपुरुषः एकवचनम्।<br>अदह्यत - अदह्येतां - अदह्यन्त। |

निजगाद -नि उपसर्गपूर्वक 'गद व्यक्तायां वाचि'इति धातोः परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।
निजगाद - निजगददुः - निजगदुः।

मूर्च्छति -'मूर्च्छ मोहन'इति धातोः परस्मैपदी लट् प्रथमपुरुषः एकवचनम्।
मूर्च्छति - मूर्च्छतः - मूर्च्छन्ति।

अवेहि -अव्इण् गतौ परस्मैपदी लोट् मध्यमपुरुष एकवचनम्।
अवेहि/अवेतात् - अवेतं- अवेत।

पश्यसि -दृशिर् प्रेक्षणे परस्मैपदी लट् मध्यमपुरुष एकवचनम्।
पश्यसि - पश्यथः - पश्यथ।

शुशोच -शुच् शोके परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।
शुशोच - शुशुचतुः - शुशुचुः।

निवर्तस्व -निपूर्वक 'वृतु वर्तने'इति धातुःआत्मनेपदी लोट् मध्यमपुरुषः एकवचनम्।
निवर्तस्व - निवर्तेथाम् - निवर्तध्वम्।

प्रत्यब्रवीत् -प्रति उपसर्गपूर्वकस्य 'ब्रूञ् व्यक्तायां वाचि' धातोः परस्मैपदी लङ् प्रथमपुरुषः एकवचनम्।
प्रत्यब्रवीत् - प्रत्यब्रूताम् - प्रत्यब्रूवन्।

अभिधास्ये -अभि (उपसर्ग) 'डुधाञ् धारण'इति धातुः आत्मनेपदी लृट् उत्तमपुरुषः एकवचनम्।
अभिधास्ये - अभिधास्यावहे - अभिधास्यामहे।

विसृज्यताम् -वि +सृज् विसर्गे आत्मनेपदी लोट् प्रथमपुरुषः एकवचनम्।
विसृज्यताम् - विसृज्येताम् - विसृज्यन्ताम्।

बभाषे -भाष व्यक्तायां वाचि आत्मनेपदी लिट् प्रथमपुरुषः एकवचनम्।
बभाषे - बभाषाते - बभाषिरे।

प्रतिभासि -प्रति इत्युपसर्गपूर्वक 'भा दीप्ता' इति धातुः परस्मैपदी लट् मध्यमपुरुषः एकवचनम्।
प्रतिभासि - प्रतिभाथः - प्रतिभाथ।

पासि -'पा रक्षण' इति धातुः परस्मैपदी लट् मध्यमपुरुषः एकवचनम्।
पासि - पाथः - पाथ।

बिभेषि -भी - भये धातोः परस्मैपदी लट् मध्यमपुरुषः एकवचनम्।
बिभेषि - बिभिथः/बिभीथः- बिभिथ/बिभिथ।

अभाषत -भाष व्यक्तायां वाचि आत्मनेपदी लङ् प्रथमपुरुषः एकवचनम्।
अभाषत -अभाषेतां -अभाषन्त।

**(चतुर्थखण्डस्य रघुवंशमहाकाव्यस्य)**

उवाच - ब्रूञ् व्यक्तायां वाचि परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।
उवाच - ऊचतुः - ऊचुः।

अवेहि -अव पूर्व इण् गतौ परस्मैपदी लोट् मध्यमपुरुषः एकवचनम्।

अवेहि/अवेतात् - अवेतं - अवेत।

भवेत् -भू सत्तायाम् परस्मैपदी विधिलिङ् प्रथमपुरुषः एकवचनम्।
भवेत् - भवेतां - भवेयुः।

आहुः - ब्रूञ् व्यक्तायां वाचि इति धातोः परस्मैपदी लट् प्रथमपुरुषः बहुवचनम्।
ब्रवीति - ब्रूतः - ब्रुवन्ति। (अथवा)आह - आहतुः - आहुः इति रूपाणि।

उपानयत् -उप इत्युपसर्गपूर्वक णीञ् प्रापणे परस्मैपदी लङ् प्रथमपुरुषः एकवचनम्।
उपानयत् - उपानयतां - उपानयन्।

पपात -पत्लृ पतने परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।
पपात - पेततुः - पेतुः।

अस्मि -'अस् भुवि' धातोः परस्मैपदी लट् उत्तमपुरुष एकवचनम्।
अस्मि - स्वः - स्मः।

ययाचे -याचृ याञ्चायां आत्मनेपदीलिट् प्रथमपुरुषः एकवचनम्।
ययाचे - यायाचाते - ययाचिरे।

आदिदेश -आङ् पूर्व दिश् उच्चारणे परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।
आदिदेश - अदिदिशतुः - आदिदिशुः।

इच्छामि -इष इच्छायां धातोः परस्मैपदी लट् उत्तमपुरुषः एकवचनम्।
इच्छामि - इच्छावः - इच्छामः।

प्रत्याययौ -'प्रति आङ् पूर्वस्य या प्रायेण'इति धातोः परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।
प्रत्याययौ - प्रत्याययतुः - प्रत्याययुः।

शशंस -शंस् स्तुतौ परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।
शशंस - शशंसतुः - शशंसुः।

प्रतिस्थापयामास- प्र +ष्ठा गतिनिवृत्तौ इति धातुः, णिचि आत्मनेपदी लिट् प्रथमपुरुषः एकवचनम्।
प्रस्थापयामास - प्रस्थापयामासतुः - प्रस्थापयामासुः।

प्रतस्थे -प्र +स्था गतिनिवृत्तौ आत्मनेपदी लिट् प्रथमपुरुषः एकवचनम्।
प्रतस्थे - प्रतस्थाते - प्रतस्थिरे।

पपुः -पा पाने परस्मैपदी लिट् प्रथमपुरुषः बहुवचनम्।
पपौ - पपतुः - पपुः।

आससज्ज -आङ् +सस्ज् गतौ परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।
आससज्ज - आससज्जतुः - आससज्जुः।

आधत्त -आङ् पूर्व 'डुधाञ् धारणपोषणयोः'इति धातुः आत्मनेपदी लङ् प्रथमपुरुषः एकवचनम्।
आधत्त - आदधतां - आदधत।

**पञ्चमखण्डस्य क्रियापदानां धातुपदलकारपुरुषवचनानि।(बालरामायणम्)**

अभवन् -भूधातुः परस्मैपदी लङ् प्रथमपुरुषः बहुवचनम्।
अभवत् - अभवताम् - अभवन्।

अजायत -जनी प्रादुर्भावे आत्मनेपदी लङ् प्रथमपुरुषः एकवचनम्।
अजायत - अजायेताम् - अजायन्त।

प्रयच्छ -प्र + दाण् दाने परस्मैपदी लोट् मध्यमपुरुषः एकवचनम्।
प्रयच्छ, प्रयच्छतात् - प्रयच्छतं - प्रयच्छत।

लप्स्यसे -डुलभष् प्राप्तौआत्मनेपदी लृट् मध्यमपुरुषः एकवचनम्।
लप्स्यसे - लप्स्येथे - लप्स्यध्वे।

अन्तर्दधे -'अन्तर्' पूर्वस्य 'डुधाञ् धारणपोषणयोः'इति धातोः आत्मनेपदी लिट् प्रथमपुरुषः एकवचनम्।
अन्तर्दधे - अन्तर्दधाते - अन्तर्दधिरे।

अजनयत् - जनी प्रादुर्भावे परस्मैपदी णिचि लङ् प्रथमपुरुषः एकवचनम्।
अजनयत् - अजनयताम् - अजनयन्।

बभूव - भू सत्तायां परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।
बभूव - बभूवतुः - बभूवुः।

प्रपेदे - प्र पूर्व आप्लृ प्रापणे आत्मनेपदी लिट् प्रथमपुरुषः एकवचनम्।
प्रपेदे - प्रपेदाते - प्रपेदिरे।

वर्तेते -वृतु वर्तने आत्मनेपदी लिट् प्रथमपुरुषः एकवचनम्।
वर्तते- वर्तेते-वर्तन्ते।

धरिष्यामि -धृञ् धारणे परस्मैपदी लृट् उत्तमपुरुषःएकवचनम्।
धरिष्यामि - धरिष्यावः - धरिष्यामः।

गमिष्यामि -गम्लृ गतौ परस्मैपदी लृट् उत्तमपुरुषः एकवचनम्।
गमिष्यामि - गमिष्यावः - गमिष्यामः।

उवाच -ब्रूञ् व्यक्तायां वाचि परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।
उवाच - ऊचतुः - ऊचुः।

श्रूयताम् -श्रु श्रवणे आत्मनेपदी कर्मणि लोट् प्रथमपुरुषः एकवचनम्।
श्रूयतां-श्रूयेतां-श्रूयन्ताम्।

पपात -पत्लृ पतने परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।
पपात - पेततुः - पेतुः।

अवर्तत -वृतु वर्तने-आत्मनेपदी लङ् प्रथमपुरुषः एकवचनम्।
अवर्तत-अवर्तेतां-अवर्तन्त।

निनाय - णीञ्प्रापणे परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।

निनाय-निन्यतुः-निन्युः।

| | |
|---|---|
| अकरोत् | -डुकृञ् करणे परस्मैपदी लङ् प्रथमपुरुषः एकवचनम्।<br>अकरोत्- अकुरुतां-अकुर्वन्। |
| अन्वगच्छताम् | -अनुपूर्वकस्य गम्लृ धातोः परस्मैपदी लङ् प्रथमपुरुषः द्विवचनम्।<br>अन्वगच्छत् - अन्वगच्छताम् - अन्वगच्छन्। |
| पप्रच्छ | -'प्रच्छ ज्ञीप्सायाम्'परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।<br>पप्रच्छ - पप्रच्छतुः - पप्रच्छुः। |
| वरयामासुः | -वृञ् वरणे परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।<br>वरयामास - वरयामासतुः - वरयामासुः। |
| प्रतिजग्राह | -प्रति+ ग्रह उपादाने परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।<br>प्रतिजग्राह -प्रतिजगृहतुः-प्रतिजगृहुः। |
| दर्शय | -दृशिर् प्रेक्षणे णिच् परस्मैपदी लोट् मध्यमपुरुषः एकवचनम्।<br>दर्शय/दर्शयतात् - दर्शयतं -दर्शयत। |
| आदिदेश | -आङ्पूर्वः दिश् उच्चारणे इति धातुः परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।<br>आदिदेश - आदिदिशतुः - आदिदिशुः। |
| यतिष्ये | -यती प्रयत्ने आत्मनेपदी लृट् उत्तमपुरुषः एकवचनम्।<br>यतिष्ये - यतिष्यावहे - यतिष्यामहे। |
| जहृषुः | -हृष् तुष्टौ परस्मैपदी लिट् प्रथमपुरुषः बहुवचनम्।<br>जहर्ष - जहृषतुः - जहृषु। |
| प्रययौ | -प्र + या प्रापणे परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।<br>प्रययौ- प्रययतुः - प्रययुः। |
| चकम्पे | -कपि चले कम्पने च आत्मनेपदी लिट् प्रथमपुरुषः एकवचनम्।<br>चकम्प - चकम्पाते – चकम्पिरे। |
| आचख्ये | -आङ् चक्षिङ् शब्दे आत्मनेपदी लिट् प्रथमपुरुषः एकवचनम्।<br>आचख्ये - आचख्याते - आचख्यिरे। |
| सम्प्राप | -सम प्र पूर्वस्य आप्लृगतौ इति धातोः परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्।<br>सम्प्राप - सम्प्रापतुः - सम्प्रापुः। |

## पुनरावृत्तिः (Recap)

| | |
|---|---|
| आसीत् | - अस भुवि धातु परस्मैपदी लङ् प्रथमपुरुषैकवचनम्। |
| अन्वगच्छत् | - अनु उपसर्गपूर्वकस्य 'गम्लृ गतौ' धातोः-परस्मैपदी-लङ्-प्रथमपुरुषैकवचनम्। |
| शशाम | - शम शमने धातु परस्मैपदी लिट् प्रथमपुरुषः एकवचनम्। |
| पपौ | - पा पाने-पर-लिट्-प्र-पु-ए-व। |
| बभूव | - भू सत्तायां-पर-लिट्-प्र -पु-ए-व |
| उवाच | - ब्रूञ् व्यक्तायां वाचि-पर-लिट्-प्र-पु-एव |
| अकरोत् | - डुकृञ् करणे-पर-लङ्-प्र-पु-ए-व। |
| अन्वगच्छताम् | - अनुपूर्वकस्य गम्लृधातोः-पर-लङ्-प्र-पु-द्वि-व। |
| दर्शय | - दृशिर् प्रेक्षणे णिच्-पर-लोट्-म-पु-ए-व। |

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. आसीत् इति क्रियापदस्य लकारः कः?
२. कृञ् धातोः परस्मैपदे लट् लकारे प्रथमपुरुषे एकवचनरूपं किम्?
३. अन्वगच्छत् - अत्र लकारः कः?
४. शमाम - अत्र लकारः कः?
५. स्थाधातोः लृटि प्रथमपुरुषे एकवचने किं रूपम्?
६. उदतिष्टत् इति क्रियापदस्य द्विवचनं किम्?
७. पश्यसि इति क्रियापदस्य धातुः कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।
## (Answer the following questions in one or two sentences)

१. लटि रूपाणि लिखत।
२. कृञ् धातोः परस्मैपदि लटि रूपाणि लिखत।
३. लृटि रूपाणि लिखत।

## निर्दिष्टाभ्यासः (Assignments)

१. दृशिर् धातोः दशसु लकारेषु सर्वाणि रूपाणि लिखत।

२. रघुवंशस्य द्वितीयसर्गे वर्तमानानां आघ्यानां दश श्लोकानां सुबन्तानाम् अन्तलिङ्ग विभक्तिवचनानि लिखत।

## उत्तराणि (Answer to Objective type questions)

१. लङ् लकारः।
२. करोति।
३. लङ्।
४. लिट्।
५. स्थास्यति।
६. उदतिष्ठताम्।
७. दृश् धातुः।

## अधिकवाचनाय ग्रन्थाः (Suggested Readings)


१. अमरसिंहः अमरकोशम् व्याख्याता - टि.वि माधववारियर् , काणिप्प्यूर् पञ्चाङ्गं पुस्तकशाला, कुन्नंकुलम् २०१२, पुटं ६६ - ६९१.
२. अमरसिंहः, अमरकोशम्, व्याखाता वाचस्पतिः टि.सी.परमेश्वरन् मूसद्, नाषणल् बुक् स्टाल्,कोट्टयम्, १९८३, पुटानि २७८-२८४.
३. कालिदासः, रघुवंशमहाकाव्यम्, सर्गः दिवुतीयः, व्याख्या पि.के.रामचन्द्र अय्यर्, आर्.एस्.वाध्यार् आन्ड् सन्स्, कल्पात्ति, पासक्काट्, २०१३।
४. कालिदासः, रघुवंशमहाकाव्यम्, व्याख्या, कुट्टिकृष्णमारार्, मातृभूमि पब्लिक्केषन्स्, कोट्टयम्।
५. रामचन्द्र झा,'रूपचन्द्रिका' चौखम्बा संस्कृतसीरीस् ओफीस् वाराणसी, २०११।
६. अप्पय्यदीक्षितः, सिद्धान्तकौमुदी बालमनोरमा तृतीयः भागः, चौखम्बा,१९६९।

# Unit - 4

## तृतीय- चतुर्थ - पञ्चमखण्डेषु पाठ्यांशगताः व्याकरणविशेषाः।

### उद्देश्यानि (Learning Outcomes)

- पाठभागे वर्तमानानं पदानां व्याकरणविशेषज्ञानम्।
- व्याकरणसविशेषतां गृह्णाति।
- व्याकरणविशेषताग्रहणम्।
- भाषाप्रयोगे साधुतामार्जयति।

### प्राग्व्यपेक्षाः (Prerequisites)

साधुशब्दज्ञाने धर्मः असाधुशब्दप्रयोगे अधर्मः च जायते इति महाभाष्ये अचार्येण पतञ्चलिना सूचितमेव। एकोऽपि शब्दः सुष्ठु ज्ञात्वा सम्यक् प्रयुज्यते चेत् सः कामधुक् भवति इति सूचना वर्तते।अतः साधुशब्दानां ज्ञानाय व्याकरणविशेषाः ज्ञातव्याः। प्रयोगे एव ज्ञानं धर्मश्च इत्ययःसाध्वी भाषा प्रयोक्तव्या। साधारणतया वर्तमाननियमात् ईषत् व्यतिरिक्तः शब्दः कदाचित् प्रयोगे दृश्यते। तेषां साधुत्वं कल्पितव्यम्। तादृश एव व्याकरणविशेषःइत्युच्यते।कतिपयानां तादृशानां प्रयोगः अत्र प्रदर्श्यते।

### मुख्यपदानि (Keyterms)

प्रचक्रमे, महिष्या समम्, प्रतस्थे, नरपतिः, तस्मै अदात्।

### Discussion

**तृतीयखण्डस्य रघुवंशमहाकाव्यस्य व्याकरणविशेषाः।**

प्रचक्रमे -क्रमधातुः परस्मैपदी भवति। किन्तु पूर्वकस्य क्रम् धातोः ''प्रोपाभ्यां समर्थाभ्याम्'' इति सूत्रेण आत्मनेपदित्वं सिद्ध्यति।

महिष्या समम् -अत्र सह इत्यव्ययस्य योगात् ''सहयुक्तेऽप्रधाने''इति सूत्रेण महिषी इति अप्रधानकारके तृतीयाविभक्तिः स्यात्। सह,समं, साकं, सार्धं इत्येतानि

अव्ययानि समानार्थकानि (सह इत्यर्थकानि) भवन्ति। एषां सर्वेषामपि योगे अप्रधानकारकस्य तृतीया विभक्तिः स्यात्।

अवतस्थे - स्थाधातुः परस्मैपदी भवति। किन्तु अत्रअस्यधातोः, अव इत्युपसर्गपूर्वत्वात् ''समवप्रविभ्यःस्थः''इति सूत्रेण आत्मनेपदित्वम्। सम्, अव, प्र, वि-एभ्य उपसर्गेभ्यः परस्य स्थाधातोः आत्मनेपदित्वं स्यात्।

हरये उपानयत् -उपानयत् इत्यस्य प्रददौ इत्यर्थः। ''कर्मणा यमभिप्रैति स सम्प्रदानम्''इति सूत्रेण दानस्य कर्मणा अभिप्रेतस्य कारकस्य सम्प्रदानसंज्ञा अस्ति। सम्प्रदानसंज्ञकस्य च ''चतुर्थी सम्प्रदाने'' इति सूत्रेण चतुर्थी विभक्तिः।

**चतुर्थखण्डस्य रघुवंशमहाकाव्यस्यव्याकरणविशेषाः।**

गुरवे निवेद्य -गुरवे निवेद्य इत्यस्यार्थः 'स्वान्तर्गतं गुरवे समर्प्य (दत्वा)' इति। ततः ''कर्मणा यमभिप्रैति स सम्प्रदानम्'' इति सूत्रेण दानस्य कर्मणा अभिप्रेतस्य गुरुशब्दस्य सम्प्रदानसंज्ञा, ''चतुर्थी सम्प्रदाने'' इति सूत्रेण चतुर्थी विभक्तिश्च।

प्रतस्थे -स्था धातुः परस्मैपदी। किन्तु अत्र अस्य धातोः प्र इत्युपसर्गपूर्वत्वात् ''समवप्रविभ्यःस्थः'' इति सूत्रेण आत्मनेपदित्वम्। सम्, अव, प्र, वि-एभ्य उपसर्गेभ्यः परः स्था धातुः आत्मनेपदी स्यात्।

तृप्त्यै अलम् -अत्र पर्याप्त्यर्थकस्य अलम् इत्यव्ययस्य योगे ''नमःस्वस्तिस्वाहास्वधाऽलं वषड्योगाच्च''इति सूत्रेण 'तृप्त्यै'इति चतुर्थी। पर्याप्तमित्यर्थे प्रयुज्यमानस्य अलम् इत्यव्ययस्य योगेचतुर्थी विभक्तिः स्यादिति सूत्रार्थः।

तपोवनवृत्तिपथम् -पथिशब्दः इकारान्तः। किन्तु समस्तपदानामन्ते प्रयुज्यमानस्य तस्य ''ऋक्पूरब्धूः पथामानक्षे'' इति सूत्रेण 'अ' इति प्रत्यये अन्तादेशे अकारान्तत्वं सिद्ध्यति।

भूपतिः -पतिशब्दः इकारान्तोऽपि तस्य रूपाणि तृतीयाद्येकवचनेषु हरिशब्दाद् भिन्नानि भवन्ति। ततोऽपि समासे तस्य ''पतिः समास एव''इति सूत्रेण घिसंज्ञा लभ्यते। ततश्च समासे एवपतिशब्दस्य रूपाणि हरिशब्दवद् भवन्ति।

वृष्ट्या विना -''पृथग्विनानानाभिस्तृतीयान्यतरस्याम्''इति सूत्रेण विनाशब्दः द्वितीयया, तृतीयया, पञ्चम्या वा सह प्रयुज्यते। अत्र तृतीयया सह प्रयुक्तः।

**व्याकरणविशेषाः।(बालरामायणम्।)**

सुमित्रायै ददौ -''कर्मणा यमभिप्रैति स संप्रदानम्''इति सूत्रेण अत्र दानस्य कर्मणा अभिप्रेतस्य सुमित्राशब्दस्य संप्रादानसंज्ञा, ''चतुर्थी संप्रदाने'' इति सूत्रेण चतुर्थी विभक्तिश्च।

नरपतिः -भूपतिशब्दवदेव ।

तस्मै अदात् -सुमित्रायै ददौ इतिवदेव।

यज्ञे समाप्ते सति -यदा तदा इत्यव्यययोः स्थाने सति सप्तमीप्रयेगः। 'यदा यज्ञः समाप्तः तदा'इत्यर्थः। अत्र ''यस्य च भावेन भावलक्षणम् ''इति सूत्रेण सप्तमीविभक्तिः ।

मिथिलाधिपतेः -''पतिः समास एव'' इति सूत्रेण पतिशब्दस्य समासे घिसंज्ञायां, हरिशब्दस्येव रूपाणि। समासराहित्ये तु 'पत्युः'इत्येव रूपं स्यात्।

पश्यतां नृसहस्राणां समक्षम् -अत्र ''षष्ठी चानादरे'' इति सूत्रेण पश्यत् शब्दस्य नृसहस्रशब्दस्य च षष्ठी विभक्तिः। पश्यन्ति नृसहस्राणि अनादृत्य, तेषां समक्षं इत्यर्थः।

प्रतस्थे -उपरि द्रष्टव्यम्।

मन्त्रोदकैः समम् -उपरि, महिष्या समम् इत्यत्र द्रष्टव्यम्।

**प्रयोगविपरिणामं कुरुत**

१. संस्कृतभाषायां कर्तरि, कर्मणि, भावे चेति त्रिप्रकारकाः वाक्यप्रयोगाः सन्ति।

२. कर्तरिप्रयोगे कर्तानुसारेण क्रियापदानि प्रयुज्यन्ते। कर्मणि प्रयोगे कर्मानुसारेण क्रियापदानि प्रयुज्यन्ते। भावप्रयोगे भावानुसारेण च क्रियापदानि प्रयुज्यन्ते इति ज्ञेयम्।

३. कर्तरिप्रयोगे कर्तृपदं प्रथमाविभक्तौ, कर्म द्वितीयाविभक्तौ च प्रयुज्येते। क्रियापदन्तु कर्त्रानुसारेण- कर्तृपदस्य पुरुषवचनानुसारेण, लिङ्गवचनानुसारेण वा प्रयोक्तव्यम्।

४. कर्मणिप्रयोगे कर्मपदं प्रथमाविभक्तौ, कर्तृपदं तृतीयाविभक्तौ च प्रयुज्येते। क्रियापदन्तु कर्मानुसारेण- कर्मणः पुरुषवचनानुसारेण, लिङ्गवचनानुसारेण वा प्रयोक्तव्यम्।

५. क्रियापदानि अकर्मकाणि चेत् भावस्य प्राधान्यं दत्वा भावप्रयोगः क्रियते।

६. कर्तरिप्रयोगे क्रियापदं परस्मैपदी वा आत्मनेपदी वा भवितुमर्हति।

७. कर्मणिप्रयोगे भावप्रयोगे च क्रियापदं आत्मनेपदी एव स्यात्।

८. कर्तरिप्रयोगे क्रियापदं क्तवतुप्रत्ययेन उच्यते चेत्, कर्मणि भावे च क्रिया क्तप्रत्ययान्ततयैव स्यात्।

**उदाहरणानि-**

१. बालः पाठं पठति(कर्तरि) - बालेन पाठः पठ्यते (कर्मणि)

२. पुत्रेण माता दृश्यते (कर्मणि)- पुत्रः मातरं पश्यति(कर्तरि)

३. बालिका गच्छति (कर्तरि) - बालिकया गम्यते (भावे)

४. अयोद्यानगरी मनुना निर्मिता (कर्मणि) - अयोद्यानगरीं मनुः निर्मितवान् (कर्तरि)

५. शिष्यः गुरुं वन्दते (कर्तरि) - शिष्येण गुरुः वन्द्यते (कर्मणि)

६. बालिका पाठं पठति (कर्तरि) - बालिकया पाठः पठ्यते (कर्मणि)

७. दशरथः अतिथिं समपूजयत् (कर्तरि) – दशरथेन् अतिथिः समपूज्यत (कर्मणि)

८. अहं त्वां पश्यामि (कर्तरि) - मया त्वं दृश्यसे (कर्मणि)

९. त्वं मां पश्यसि (कर्तरि) – त्वया अहं दृश्ये (कर्मणि)

१०. राज्ञा सचिवाः आदिष्टाः (कर्मणि) - राजा सचिवान् आदिष्टवान् (कर्तरि)

११. जनकेन दूताः प्रेषिताः (कर्मणि) - जनकः दूतान् प्रेषितवान् (कर्तरि)
(अत्र कर्मणिप्रयोगे जनकेन इति तृतिया एकवचनम्, दूताःइति प्रथमा बहुवचनम्, प्रेषिताःइति क्वप्रत्ययान्तं पदंच। कर्तरि तु जनकःइति प्रथमा एकवचनम्, दूतान् इति द्वितीया बहुवचनम्, प्रेषितवान् इति क्तवतुप्रत्ययान्तं पदं च)

## पुनरावृत्तिः (Recap)

- 'प्र'इत्युपसर्गपूर्वस्य क्रमु धातोः आत्मनेपदम्।
- सहार्थकानां अव्ययानां योगे तृतीया विभक्तिः।
- दानस्य कर्मणा अभिप्रेतस्य कारकस्य सम्प्रदानसंज्ञा चतुर्थीविभक्तिश्च।
- सह, साकं, समं, सार्धं इत्येतानि पदानि समानकानि, एषां योगे अप्रधानकारकस्य तृतीयाविभक्तिः।
- मन्त्रोदकैः समं इत्यत्र समं इति पदस्य सह इत्येवार्थः।
- संस्कृतभाषायां कर्तरि, कर्मणि, भावे च वाक्यानि प्रयुज्यते।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. निवेद्य इति किमन्तं पदम्?
२. संस्कृते कति प्रकारकाः वाक्यप्रयोगाः सन्ति?
३. कर्तरिप्रयोगे कर्तृपदं कस्यां विभक्तौ प्रयुज्यते?
४. कर्मणिप्रयेगे कर्म कस्यां विभक्तौ स्यात्?
५. कर्मणिप्रयोगे क्रियापदस्य नियामकं पदं किम्?
६. समं इति पदस्य योगे का विभक्तिः प्रयोक्तव्या?
७. पर्याप्त्यर्थकस्य अलंशब्दस्य प्रयोगे का विभक्तिः प्रयोक्तव्या?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।
(Answer the following questions in one or two sentences)

१. जनकेन दूताः प्रेषिताः - प्रयोगविपरिणमयत।
२. सुमित्रायै ददौ - वाक्येऽस्मिन् व्याकरणविशेषं लिखत।
३. यज्ञे समाप्ते सति - वाक्यमिदं यदा- तदा प्रयोगेण परिवर्तयत।

## निर्दिष्टाभ्यासः (Assignments)

| |
|---|
| १. ददौ, समं, विना, अलम्, भूपतिः इत्यादिषु वर्तमानं व्याकरणविशेषं लिखन्तु। <br> २. यथेच्छं कर्तरिप्रयोगे पञ्च वाक्यानि विलिख्य, तेषां कर्मणिप्रयोगे परिवर्तनं च कुर्वन्तु। |

## उत्तराणि (Answer to Objective type questions)

१. ल्यबन्तम् ।
२. त्रिप्रकारकाः।
३. प्रथमाविभक्तौ।
४. प्रथमाविभक्तौ।
५. कर्मा।
६. तृतीया।
७. चतुर्थी।

## अधिकवाचनाय ग्रन्थाः (Suggested Readings)

१. अमरसिंहः अमरकोशम् व्याख्याता - टि.वि माधववारियर् , काणिप्प्यूर् पञ्चाङ्गं पुस्तकशाला, कुन्नंकुलम् २०१२, पुटं ६६ - ६९१.
२. अमरसिंहः, अमरकोशम्, व्याखाता वाचस्पतिः टि.सी.परमेश्वरन् मूसद्, नाषणल् बुक् स्टाल्,कोट्टयम्, १९८३, पुटानि २७८-२८४.
३. कालिदासः, रघुवंशमहाकाव्यम्, सर्गः दिवुतीयः, व्याख्या पि.के.रामचन्द्र अय्यर्, आर्.एस्.वाध्यार् आन्ड् सन्स्, कल्पात्ति, पासक्काट्, २०१३।
४. कालिदासः, रघुवंशमहाकाव्यम्, व्याख्या,कुट्टिकृष्णमारार्, मातृभूमि पब्लिक्केषन्स्, कोट्टयम्।
५. वरदराजः, लघुसिद्धान्तकौमुदी,व्याख्याता,गोमतीप्रसादशास्त्री मिश्रः, चौखम्बा सुरभारतीप्रकाशन्, वाराणसी, २०११, पुटानि ११-२१.
६. वरदराजः लघुसिद्धान्तकौमुदी व्याख्याता गिरीशकुमारठाक्कुरः, कृष्णदास् अक्कादमी, वाराणसी, १९९८, पुटानि ९-१७
७. भट्टोजिदीक्षितः वैयाकरणसिद्धान्तकौमुदी चौखम्बा अमरभारतीप्रकाशन्, वाराणसी, १९९७, पुटानि ८-२३.

**Model Question Paper**

**Set-01**

# SREENARAYANAGURU OPEN UNIVERSITY

QP CODE: ………

Reg. No : ……................
Name : ……………........

FIRST SEMESTER B.A. SANSKRIT EXAMINATION
DISCIPLINE CORE- B21SN01DC - संस्कृताध्ययनविधिः
( CBCS - UG )
2022-23 - Admission Onwards

**Time: 3 Hours** **Max Marks:70**

सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः । संस्कृतलेखने देवनागरीलिपिरुपयोक्तव्या ।

**(प्रथमो भागः)**

**I.एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत।** (10 x 1= 10)

**(Answer any ten Questions in a word or Sentence)**

1. गुरुशब्दस्य सप्तमी एकवचनम् किम्?
2. ........... क्रियाः प्रयुज्यन्ते।रिक्तस्थानं पूरयत ।
3. मिथिलायाः अधिपः कः?
4. रघुवंशमहाकाव्यस्य कर्ता कः?
5. 'हे वारे' इत्यस्य विभक्तिः का?
6. इक्ष्वाकुकुलपुरोहितः कः?
7. लताशब्दस्य चतुर्थी एकवचनम् किम्?
8. अमरकोषस्य कर्ता कः?
9. लता,रमा,माता,दुर्गा- एषु व्यतिरिक्तं पदं किम्?

10. 'तस्य' इति शब्दस्य मूलशब्दः कः?

11. अभूत्, अभूताम्,..........।रिक्तस्थानं पूरयत।

12. लता प्रतानिनी ---------- गुल्मिन्युलप इत्यपि। रिक्तस्थानं पूरयत।

13. च+ आरोपणं – सन्धत्त।

14. कति परस्मैपदप्रत्ययाः सन्ति?

15. 'तेषु' इति शब्दस्य अन्तः कः?

**(द्वितीयो भागः)**

**II.एकेन वाक्येन द्वाभ्यां वाकेषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत।** **(5 x 2 = 10)**

**(Answer any five Questions in one or two sentences)**

16. कीदृशः वायुः राजानं सेवितवान्?

17. प्रधानतया पदानि कति विधानि कानि?

18. गुरोः कोपात् विमुक्तिं प्राप्तुं कं उपायं सिंहः निर्दिशति?

19. पितृशब्दस्य कानि विभक्तिरूपाणि समानानि भवन्ति?

20. दशरथपुत्राः केषु नैपुण्यं प्रापुः?

21. रामलक्ष्मणौ प्राप्तयोः विद्ययोः नामानि के?

22. 'वृक्षः' इत्यस्य चत्वारि पर्यायपदानि ?

23. महिष्या समम्- व्याकरणविशेषं लिखत?

24. धेनोः श्रृङ्गान्तरं किमर्थं पूजयामास?

25. अन्तलिङ्गविभक्तिवचनानि लिखत- 1) फलानाम्,2) धेन्वा।

**(तृतीयो भागः)**

**III.केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत ।** **(6 x 5 = 30)**

**(Answer any six Questions)**

26. विश्वामित्रस्य प्रार्थनां श्रुतवतौ दशरथस्य अवस्थां वर्णयत।

27. कृञ् धातोः लृटि परस्मैपदरूपाणि आत्मनेपदरूपाणि च लिखत।

28. बाललताः दिलीपाय कीदृशं उपचारं चक्रुः?

29. अपुत्रस्य पुत्रजन्म तवेदमागतं मन्ये- विशदयत।

30. नन्दिनी दिलीपं कथं परीक्षितवती?

31. सीतरामयोः विवाहवृत्तान्तं वर्णयत।

32. "छायेव तां भूपतिरन्वगच्छत्"। ससन्दर्भं व्याख्यात।

33. "सम्बन्धिनो मे प्रणयं विहन्तुं नार्हसि" कुतः?

34. भूधातोः लटि लङि च सर्वाणि रूपाणि लिखत।

35. "पपात विद्याधरः हस्तमुग्धाः"– किं पपात कस्योपरि?

36. "प्रस्थापयामास वशी वसिष्ठः"। ससन्दर्भं व्याख्यात।

37. वदि (वन्द्) धातोः लटि लृटि च सर्वाणि रूपाणि लिखत।

**(चतुर्थो भागः)**

IV. **केषाञ्चिद्द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** (2 x 10 = 20)

**(Write an essay on any two of the following)**

38. बालकाण्डस्य (बालरामायणम्) कथासारं लिखत।

39. सिंहदिलीपसंवादं संक्षिप्य लिखत।

40. दिलीपस्य नन्दिनीपरिचरणं निबन्धं रचयत।

41. अस्मच्छब्दस्य युष्मच्छब्दस्य च सर्वाणि रूपाणि लिखत।

**Model Question Paper**

**Set-02**

# SREENARAYANAGURU OPEN UNIVERSITY

QP CODE: ………

Reg. No : ………...............
Name : ………………...

FIRST SEMESTER B.A. SANSKRIT EXAMINATION
DISCIPLINE CORE- B21SN01DC - संस्कृताध्ययनविधिः
( CBCS - UG )
2022-23 - Admission Onwards

Time: 3 Hours | Max Marks: 70

---

सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः । संस्कृतलेखने देवनागरीलिपिरुपयोक्तव्या ।

**(प्रथमो भागः)**

**I.एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत।**

**(Answer any ten questions in a word or sentence)** **(10 x 1=10)**

1. रघुवंशे कति सर्गाः सन्ति ?
2. नन्दिनी केन दिशः पवित्रीकरोति ?
3. नन्दिनी कस्य यागधेनुः अस्ति ?
4. राजा किं सिंहाय समर्पितवान् ?
5. ततो मृगेन्द्रस्य मृगेन्द्रगामी - मृगेन्द्रगामी कः ?
6. दिव्यपुरुषेण दत्तस्य पायसस्य अर्धभागं कस्यै लब्धम् ?
7. श्रीरामः काम् शापात् मोचितवान् ?

8. सज्जनानां जीवनं भवति तत् - तत् किम् ?

9. स्त्रियः, सुमनसः, पुष्पम्, प्रसूनम्, कुसुमम्,............पुरयत।

10. ईषत्विकासोन्मुखं पुष्पं किम् ?

11. बालेषु इत्यस्मिन् पदे कः लिङ्गः का विभक्तिः?

12. पितृ शब्दस्य तृतीयाविभक्तौ रूपाणि कानि ?

13. नद्याः इति पदस्य अन्तर्लिङ्गविभक्तिवचनानि कानि ?

14. अनद्यतनभविष्यकाले लकारः कः ?

15. आकाशीः इति क्रियापदस्य धातुः कः ?

**(द्वितीयो भागः)**

**II.एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत।**

**(Answer any five questions in one or two sentences)** ( 5 x 2 = 10 )

16. धनुर्धरः केसरिणं ददर्श - कीदृशं केसरिणम् ?

17. विचारमूढः प्रतिभासि मे त्वम् - केन कारणेन ?

18. दशरथस्य कति भार्याः आसन् ? ताः काः ?

19. का नाम वृक्षवाटिका ?

20. पदानां अर्थं लिखत - अरण्यानि, अङ्कुरः, वनस्पतिः, अवकेशी

21. सुमित्रायै अदात् - व्याकरणविशेषं लिखत।

22. राज्ञः - राजन् शब्दस्य कस्यां विभक्तौ कस्मिन् वचने भवति इदं रूपम् ?

23. भूतकाले उपयुज्यमानाः लकाराः के ?

24. <u>बालाः</u> उद्याने क्रीडति । शुद्धं कुरुत।

25. दधि शब्दस्य कुत्र कुत्र रूपद्वयं वर्तते ?

**(तृतीयो भागः)**

**III. केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत ।**

**(Answer any six questions )** ( 6 x 5 = 30 )

26. नन्दिनी दिलीपं कथं परीक्षितवती ?

27. सुदक्षिणा्यां तनयं ययाचे -व्याख्यात।

28. विचारमूढः प्रतिभासि मे त्वम् - विशदयत।
29. प्रसादचिह्नानि पुरः फलानि - विशदयत।
30. कृञ् धातोः लटि परस्मैपदिरूपाणि आत्मनेपदिरूपाणि च लिखत।
31. भूधातोः विधिलिङ् आशिर्लिङ् च सर्वाणि् रूपाणि लिखत।
32. मकारान्तः पुल्लिङ्ग किम् शब्दरूपाणि लिखत।
33. वन्द् धातोः लटि लृटि च रूपाणि लिखत।
34. सुबाहुमारिचयोः वधः बालरामायणानुसारं विशदयत।
35. परशुरामस्य गर्वभङ्गः विशदयत।
36. छायेव ताम् भूपतिरन्वगच्छत् -ससन्दर्भं व्याख्यात।
37. प्रसह्य सिंहः किल तां चकर्ष - व्याख्यात।

**(चतुर्थो भागः)**

**IV.केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकमुत्तरं लिखत.**

**(Write an essay on any two of the following )** (2 x 10 =20 )

38. दिलीपस्य नन्दिनीपरिचरणम् - निबन्धं रचयत।
39. सिंहदिलीपसंवादं रघुवंशानुसारं विशदयत।
40. दशरथस्य राजधान्यां विश्वामित्रस्य गमनप्रसक्तिः।
41. मरुत् शब्दस्य मधुशब्दस्य च सर्वाणि रूपाणि लिखत।

## Regional Centres


### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikkodu,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sreeneelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

Sreeenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841